Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



ओं श्री जिनपार्श्वनाथाय नम: । जयति भुवनैकभानु: सर्वत्राभिहतकेवला लोक: नित्यो ेत: स्थिरस्तापवर्जितो वर्द्धमानजिन जयति जगदेकमङ्गल मपहतनि:शेषदुरितघनतिमिरं रविबिंबमिव यथा स्थितवस्तुविकाशं जिनेशवच: २ इह सर्वैरेवसंसारमध्यासीनेन जन्तुना नारकतिर्यग्नरामरगति निबन्धन विविधशारीरमानसानेकदुःखोपनिपातपीडितेन पीडानिर्वेदत: संसारपरिजिहीर्षया जन्मजरामरणरोगशोकाद्य शेषोपद्रवा संस्पृष्टापरमानन्द रूपनि:श्रेयसपदमधिरोढ़कामेन तदवाप्तये स्वपरसममानसीभूयस्वपरोपकाराय यतितव्यं तत्रापि महत्याआशयविशुद्धौ परोपकृति: कर्त्तुं शक्यते पृत्या शयविशुद्धिप्रकर्षसम्पादनायविशेषत:परोपकारेयत्न आस्थेय: परोपकारश्च द्विधा द्रव्यतो भावतश्च तत्र द्रव्यतो विविधान्नपानधनकांचनादि प्रदानजनित: सचानैकांतिक:कदाचित्ततो विसूचिकादिदोषसम्भवत उपकारासम्भवात् नाप्यात्यन्तिक: कियत्कालमात्रभावित्वात् भावतो जिनप्रणीतधर्म सम्पादन

## ओं नमो श्री वीतरागाय जयइ जगजीवजोणी वियाणओ जगगुरू जगाणंदो जगनाहो जगबंधूजयइ जगपियामहो

ओंनम: अथनंदीरिति क:शब्दार्थ: उच्यतेनंदननंदि: प्रमोदोहर्षइत्यर्थ:१ नंदिहेतुत्वात् ज्ञानपंचकाभिधायकं अध्ययनमपिनंदि २ नंदतिप्राणिनोनेन अस्मिन् वा इतिनंदी ३ नंदिशब्दस्य पुल्लं नंदिपुल्लिंगे अपरे तुनंदीतिपठंति स्त्रीत्वेपि व तेयंतिनंदीस्त्री लिंगेपि नंदीना ४ निखेपानामनंदी १ थाप णानंदी २ द्रव्यनंदी ३ भावनंदी ४ तिहां नामनंदीतेजीव अजीवनुं नामनंदीदीधुंते नामनंदी १ थापनानंदी तेसद्भाव असद्भावकउडाप्रमुखथाप्या ोजमाहरीनंदी तेथापनानंदी अथवाद्वादशविध: तुर्यरूपद्रव्यनंदी स्थापनास्थापनानंदी १२ वाजित्रथापी मुंक्यातेपणि थापनानंदी २ द्रव्यनंदी ो १ नोआगमथो २ आगमथो १ नोआगमद्रं २ आगमभवियशरीर ३ ए ३ नोआवश्यकवतद्रव्यनंदी ३ तद्व्यतिरिक्तते १२वाजिलसमकालिवाजें

नंदीवाजित्रं कहीयें तेनंदीते नोआगमथी ज्ञानगभवियशरीरथी व्यतिरिक्तद्रव्यनंदी ४ एनाम १ थापना२ द्रव्यनंदी३एह३ निखेपापरमार्थशून्य
नंदीद्विधा आगमतो १ नोआगमतश्च २ तत्रागमतोनंदीपदार्थस्य ज्ञाता तत्रचोपयुक्त: उपयोगोभावनिक्षेप इतिवचनात् १ नोआगम:पञ्चप्रकारज्ञानस
मुदाय: भावंमियपञ्चनाणं इति वचनात् नोशब्दस्यैकदेशवचनात् इति हत्तौ भावनंदीते आगमीउपयोगस हित नंदीनीसज्झायते १ नोआगमथी तेपांच
ज्ञानमी यथातथ्यसुद्धसूत्रपाठउपयोगथी शुद्धप्ररूपणातेभावनंदी ४ तेअत्र परूपीइक्तिं अथ नंदीसूत्रलिख्यते १ नंदीते आणंदनीदेणहारी तेआणंदनोहे
तुभणी नंदीकहीये एतले पांचज्ञान एहनेविषे परूपवाथकी नंदीजाणवी ज०जयवंताप्रवर्त्तो अष्टकर्म्मनाजीपवाथकी तथाजयहोज्यो तेविषयकषायजी
तीके तेहनो जग० धर्मास्तिकायादिकषट् द्रव्यनाविचारना सवभावभेदनाजाणछे जीव०जीवसर्वनसुखदु:खनावि०जाणछे जो० सर्वजीवनीयोनिनाजाणछे
तथासर्वविवेकछे ते हनावि० जाणछे ज० जगवमाहे सूत्रधर्म चारित्रधर्मनापरूपकते तीनजगनागुरुछे ज०सर्वजगतने सर्वजीवने आणं०
आनंद नाकरताछे तथावलीकेहवाछे अनेरादि यथावस्थितसकल पदार्थविष्य आगलिकहे तिणिकारणिजगगुरुकहीइं जईदृशांजगशब्दे सं
गीपंचेंद्री जीवते भगवंत नोरूपदीठे तथा उपदेसहो तेसांभलीनेसंगी पंचेंद्रीजीवने आणंदउपजे तिणकारणीजगाणंदज० सर्वज गतरमांहित
सथावरराखवाभणी सर्वजीवनाना० नाथछे ज० सर्वजीवनाजगतना रक्षारूपधर्मकह्यो तेमाटेतीनभुवननाबांधवछे तथावलीकेहवाछे ज०
जगतमांहि एहवाउत्तम १०८ लक्षणछे तेहनोसदाईजयहो ज०तीनजगतरमापि० पितातेपीहरकारी तथाशुद्धधर्मचलावणहारछे म०मोटाभ० सातभ
यतेहना जीपणहारछे तथाभ० भगवंत श्रीमहावीरमोटागुणेकरी सहित१ जगपिया० जगनोपिताधर्मते किम:सर्वसतानां अहिंसालक्षणोपि०ारक्षण
ताततजिमपितापुत्रनेराखे तिमधर्मसर्वजीवनी रक्षाकरे तेधर्मभगवंतेप्ररूपो तेभणीधर्म्मनो पितामहो० मोटोभगवंत इमसर्वसतानांभगवंपिता भवति:

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



जनित: सचैकांतिक: कदाचिदपि ततो दोषासम्भवात् आत्यन्तिकश्च परम्परया शाश्वतिक मोक्षसौख्यसम्पादकत्वात् जिनप्रणीतोपि च धर्मो द्विधा श्रुतध-
र्म्म चारित्रधर्म्म श्च तत्र श्रुतधर्म्मस्वाध्याय चारित्रधर्म: क्षान्त्यादिरूपो दशधा श्रमणधर्म उक्तञ्च सुयधम्मो सज्झाओ चरित्तधम्मो समणधम्मोय तत्र श्रुतधर्म्म
सम्पत्समन्विता: एव प्राय:चारित्रधर्माभ्युपगम यथावत्परिपालनासमर्था भवतीति प्रथमतस्तत्प्रदानमेवेत्याज्यन्ते तत्र परमार्हंत्यमहिमोपशोभित भगवद्वर्द्ध
मानस्वामिनिवेदितमर्थमवधार्यगणभृत्सुधर्म्मस्वामिनातत्सन्तानवर्त्तिभिश्चान्यै रपि सूत्रप्रदानमकारिनच सूत्रादविज्ञातार्थादभिलषितार्थावाप्तिरुपजायते
तत: प्रारम्भणीय:प्रवचानुयोग: स च परमपदप्राप्तिहेतुत्वाच्छ्रेयो भूत: श्रेयांसिच बहुविघ्नानि भवन्ति यत उक्तं श्रेयांसि बहुविघ्नानि भवन्ति महतामपि
अश्रेयसिप्रवृत्तानां क्वापि यान्ति विनायका: इति ततोस्य प्रारम्भएव सकलप्रत्यूहोपशमनाय मङ्गलाधिकारेनन्दिर्वक्तव्य:अथ नन्दिरिति क: शब्दार्थ: उच्यते
टुनदि समृद्धौ इत्यस्य धातो रिदितोनुमितिनुमिविहिते नन्दनं नंदि: प्रमोदो हर्षइत्यर्थ: नंदिहेतुत्वात् ज्ञानपञ्चकाभिधायकमध्ययनमपि नंदि: नंदति
प्राणिनो ने नास्मि न्वेति नंदि: इदमेव प्रस्तुतमध्ययनं आविष्टलिङ्गत्वाच्चाध्ययनेपि वर्त्तमानस्य नंदिशब्दस्य पुंस्त्वं इ: सर्वधातुभ्य: इत्यौणादिक इप्रत्यय:
अपरे तु नंदीति पठन्ति ते च इ कृष्यादिभ्य: इति सूत्रादिप्रत्ययंस मानीय स्त्रीत्वेपि वर्त्तयन्ति ततश्च इतोक्त्यर्थादिति ङीप्रत्यय: स च नंदिश्चतुर्द्धातद्यथा
नामनंदिस्थापनानंदि द्रव्यनंदि: भावनंदि: तत्र नामनंदि यस्य कस्यचित् जीवस्याजीवस्यवा नंदिशब्दार्थरहितस्य नंदिरिति नामक्रियते सनाम्ना नंदि
र्नामनंदि: यद्वानाभनामवतोरभेदोपचारात् नामचासौ नंदिश्च नामनंदि नंदिरिति नामवान्निति नंदि: तथा सद्भावमाश्रित्यलेप्यकर्मादिषु असद्भावं
चाश्रित्याक्षवराटकादिषु भावनंदि: मत:|साध्वादेर्यास्थापनानंदि: अथ द्वादशविधतूर्य्यरूपद्रव्यनंदि स्थापनास्थापनानंदि: द्रव्यनंदि द्विधा आगमतो नो
आगमतश्च तत्रागमतो नंदिपदार्थस्य ज्ञाता|तत्र चानुपयुक्त: अनुपयोगोद्रव्यमिति वचनात्नो आगमतस्त्रिधातद्यथाज्ञसरीरद्रव्यनंदि:भव्यशरीरद्रव्यनंदि:

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



यस्तु पालकोनेदानीं नंदी शब्दार्थमवबुध्यते अथवा यश्चमायत्यां तेनैव शरीरसमुच्चयेण भोत्स्यते सभाविभावनिबन्धत्वाद्भव्यशरीरद्रव्यनंदि इह हि यद्
भूतभावं भाविभावं वा वस्तु तद्यथा क्रमं विवक्षितभूतभावि भावापेक्षया द्रव्यमिति तत्त्ववेदिनां प्रसिद्धिमुपागमत् उक्तं च भूतस्य भाविनो वाभावस्य हि
कारणं तु यल्लोके तद्द्रव्यं तत्त्वज्ञैः सचेतनाचेतनं कथितं ज्ञशरीरभव्यशरीरव्यतिरिक्तस्तु द्रव्यनंदिः क्रियाविशिष्टो द्वादशविध तूर्यसमुदायः उक्तं चद्व्वे
तरसमुद्भोतानि च द्वादशविधतूर्याणि अमूनि भंभामुकुंदमद्दलकडंबझल्लरिहुडुक्ककंसाला काहलतलिमावंसा संखोपणवोयबारसमो भावनंदि द्विधा
आगमतो नो आगमतश्च तत्रागमतो नंदि पदार्थस्य ज्ञाता तत्र चोपयुक्तः उपयोगो भावनिक्षेपः इतिवचनात् नो आगमतः पंचप्रकारः ज्ञानसमुदायःभाव
मियपंचनाणांइ इति वचनात् अथवा पंचप्रकारज्ञानस्वरूपमात्रप्रतिपादकोध्ययनविशेषो भावनंदिनो शब्दस्यैकदेशवच
नात् अस्य चाध्ययनस्य सर्वश्रुतैकदेशत्वात्तथात्वं यमध्ययनविशेषः सर्वश्रुताभ्यंतरभूतो वर्त्तते ततः एकदेशः अतः
एव चायं सर्वश्रुतस्कंधारंभेषु सकलप्रत्यूहनिवृत्तये मंगलार्थमादौ तत्त्ववेदिभिरभिधीयते अस्य च मंगलस्यानप्रा
प्तस्य व्याख्या प्रक्रमे पूर्वसूरयो विनेयानां सूत्रार्थगौरवोत्पादनार्थमविच्छेदेन तीर्थकरावलिका आचक्षते ततः आ
चार्योपि देववाचकनामा ज्ञानपंचकं व्याचिख्यासुः प्रथमतः आवलिका अविधित्सुरविघ्नेन अध्यापकश्रावकपाठका
चिंतकानामभिलषितार्थसिद्धये नादिमंतस्तीर्थकरा इति ज्ञापनार्थं सामान्यतो भगवत्तीर्थकृतस्तुतिमभिधातुमाह
जयइ इत्यादि इह स्तुतिर्द्विधा प्रणामरूपा असाधारणगुणोत्कीर्तनरूपा च तत्र प्रणामरूपा सामर्थ्यगम्या यथा च सामर्थ्यगम्या तथा
नन्तरमेव वक्ष्यते असाधारणगुणोत्कीर्तनरूपा च द्विधा स्वार्थसम्पदभिधायिनी परार्थसम्पदभिधायिनी च तत्र स्वार्थसम्पत्त्वः परार्थं प्रतिसमर्थो भवतीति

For Private and Personal Use Only

प्रथमत: स्वार्थसम्पदमाह जयति इन्द्रियविषयकषायघातिकर्मपरीषहोपसर्गादि शत्रुगणपराजयात् सर्वानप्यतिशेतेइयं सर्वातिशायी च भगवान् प्रेक्षावता मवश्यं प्रणामार्हस्ततो जयतीति किमुक्तं भवति तं प्रतिप्रणतोऽस्मीति किं विशिष्टो जयतीत्याह जगज्जीवयोनि विज्ञायक: जगत् धर्माधर्माकाशपुद्गला स्तिकायरूपं जगत्त्रयं चराचरमिति वचनात् जीवा इति जीवंति प्राणान् धारयंतीति जीवा: क: प्राणान् धारयतीतिचेत् ,योमिथ्यात्वादिकलुषिततया वेदनीयादिकर्मणामभिनिर्वर्तक स्तत्फलस्य च सुखदु:खादेरुपभोक्ता नारकादि भवेषु च यथा कर्मविपाकोदयं संसर्त्ता सम्यग्दर्शनादिरत्नत्रयाभ्यास प्रकर्ष वशाच्चाशेषकर्मांशापगमत: परिनिर्वाता स प्राणान् धारयन्तीति सएव चात्मेत्यभिधीयते उक्तं च य: कर्त्ताकर्मभेदानां भोक्ता कर्मफलस्य च संसर्त्तापरि निर्वाता सह्यात्मानान्यलक्षण: १ कथमेतत्सिद्धिरिति चेत् उच्यते प्रतिप्राणिस्वसंवेदनप्रमाण सिद्धिचेतनान्यथानुपपत्तिस्तथाहि न चैतन्यमिदं भूतानां धर्मस्तद्धर्मत्वे सति पृथिव्या: काठिन्यस्येव सर्वत्र सर्वदा चोपलंभप्रसंगात् न च सर्वत्र सर्वदा चोपलभ्यते लोष्ठादौ मृतावस्थायां चानुपलम्भात् अथ तत्रा पि चैतन्यमस्ति केवलंसक्तिरूपेण ततो नोपलभ्यते तदयुक्तं विकल्पद्वयानतिक्रमात् तथाहि सा शक्तिश्चैतन्याद्विलक्षणा उतचैतन्यमेव यदि विलक्षणा तर्हि कथमारभ्यते शक्तिरूपेण चैतन्यमस्ति न हि पटे विद्यमाने पटरूपेण घटस्तिष्ठतीति वक्तुं शक्यं आह च प्रज्ञाकरगुप्तोपि "रूपांतरेण यदि तत्तदेवास्तीति मारटी: चैतन्यादन्यरूपस्य भावे तद्विद्यते कथं अथ द्वितीय: पक्षस्तर्हि चैतन्यमेव सा कथमनुपलम्भ: आवृतत्वादनुपलम्भ इति चेतत्वात्किमावरणं तच्चा वरणं किं विवक्षित परिणामभाव: उतपरिणामांतरं आहोस्विदन्यदेवभूतातिरिक्तं किंचित् तत्र न तावत् विवक्षितपरिणामाभाव: ,एकांत तुच्छतया तस्या वारकत्वाऽयोगात् अन्यथा तस्याप्यतुच्छरूपतया भावरूपतापत्ति: भावत्वे च पृथिव्यादीनामन्यतमो भावो भवेत् पृथिव्यादीन्येवभूतानि "तत्वमिति वचनात् पृथिव्यादीनि च भूतानि चैतन्यस्य व्यञ्जकानि नावारकाणीति कथमावारकत्वं तस्योपपत्तिमत् अथ परिणामान्तरं तदप्ययुक्तं परिणामान्त

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



रस्यापि भूतस्वभावतया भूतवद्याञ्जकत्वस्यैवोपपत्तेर्नावारकत्वस्य अथान्यदेवभूतातिरिक्तं किञ्चित्तदतीवासमीचीनं भूतातिरिक्ताभ्युपगमे च त्वायैच पृथि
व्यादीनि भूतानितत्वमिति तत्वसंख्याव्याघातप्रसङ्गात् अपिचेदं चैतन्यं प्रत्येकं वा भूतानां धर्मः समुदायस्य वा न तावत्प्रत्येकमनुपलम्भात् न हि प्रतिपरि
माणु संवेदनमुपलभ्यते यदि च प्रतिपरमाणु भवेत्तर्हि पुरुषसहस्रचैतन्यवृन्दमिव परस्परं विभिन्नस्वभावमिति नैकरूपं भवेत् अथ चैकरूपमुपलभ्यते
अहं पश्यामि अहं करोमीत्येवं सकलशरीराधिष्ठातैकरूपतयानुभवात् अथ समुदायस्य धर्मस्तदप्यसत्प्रत्येकमभावात् प्रत्येकं हि यदि सत्तत्समुदायेपि न
भवति यथा रेणुषु तैलं स्यादेतन्मद्यांगेषु प्रत्येकं मदशक्तिरदृष्टापि समुदाये भवता दृश्यते तद्वच्चैतन्यमपि भविष्यति को दोषस्तदयुक्तं प्रत्येकमपि मद्यांगेषु
मदशक्त्यनुयायि माधुर्यादिगुणदर्शनात्तथा हि दृश्यते माधुर्यमिक्षुरसे धातकीपुष्पेषु च मनाकविकलतोत्पादकतेत्यादि नचैवं चैतन्यं सामान्यतोपि भूतेषु
प्रत्येकमुपलभ्यते ततः कथं समुदाये तद्भवितुमर्हति मा प्रापत् सर्वस्य सर्वत्र भावप्रसक्त्यातिप्रसङ्गः किञ्चयदि चैतन्यं धर्मत्वेन प्रतिपन्नं ततोऽवश्यमस्यानु-
रूपो धर्मी प्रतिपत्तव्यः आनुरूप्याभावे जलकाठिन्ययोरिव धर्मधर्मिभावानुपपत्तेः नच भूतान्यनुरूपो धर्मी वैलक्षण्यात्तथा हि चैतन्यं बोधस्वरूपममूर्तंच
भूतानिच तद्विलक्षणानि तत्कथमेषां परस्परं धर्मधर्मिभावः नापि चैतन्यमिदं भूतानां कार्यमत्यन्तवैलक्षण्यादेव कार्यकारणभावस्याप्ययोगात् उक्तंच
काठिन्याबोधरूपाणि भूतान्यध्यक्षसिद्धितः चेतनाच न तद्रूपा सा कथं तत्फलं भवेत् अपिच यदि भूतकार्यं चेतना तर्हि किं न सकलमपि जगत्प्राणिमयं
भवति परिणतविशेषसद्भावाभावादिति चेन्ननु सोपिपरिणति विशेषसद्भावः सर्वत्रापि कस्मान्न भवति सोपिहि भूतमात्र निमित्तक एव ततः कथं तस्यापि
क्वचित्कदाचिद्भावः अन्यच्च स किं रूपः परिणतिविशेष इति वाच्यं कठिनत्वादिरूप इति चेत्तथा हि काष्ठादिषु दृश्यन्ते घुणादिजंतवोः जायमाना
स्ततो यत्र कठिनत्वादि विशेषस्तत्प्राणिमयं न शेष इति तदप्यसत्व्यभिचारदर्शनात्तथा ह्यविशिष्टेपि कठिनत्वादिविशेषे क्वचिद्भवन्ति क्वचिन्न क्वचिच्च

For Private and Personal Use Only

कठिनत्वादिविशेषमंतरेणापि संस्वेदजा नभसि च संमूर्च्छिमा जायन्ते किञ्च समानयोनिका अपि विचित्र वर्णसंस्थाना दृश्यन्ते प्राणिनः तथा हि गोमयाद्येकयोनि सम्भविनोपि केचिन्नीलतनवोऽपरे पीतकाया अन्ये विचित्रवर्णाः संस्थानमप्येतेषां परस्परं विभिन्नमेव तद्यदि भूतमात्रनिमित्तं चैतन्यं तत एकयोनिकाः सर्वेप्येक वर्णसंस्थाना भवेयुर्न च भवन्ति तस्मादात्मान एव तत्तत्कर्मवशात् तथोत्पद्यन्त इति प्रतिपत्तव्यं स्यादेतत्तदा गच्छन् गच्छन्नात्मा नोपलभ्यते केवलं देहे सति। संवेदनमुपलभ्यते देहाभावे च भस्मावस्थायां न तस्मान्नास्त्यात्मा किन्तु संवेदनमात्र मेवैकमस्ति तच्च देह कार्यं देहे एव च समाश्रितं कुड्ये चित्रवत् न चित्रं कुड्यविरहितमवतिष्ठति नापि कुड्यांतरं संक्रामति नागतं वा कुड्यांतरात् किं तु कुड्ये एव उत्पन्नं कुड्ये एव च विलीयते एवं संवेदनमपि तदप्यसत् आत्मा हि स्वरूपेणाऽमूर्त्तः आंतरमपि शरीरमति सूक्ष्मत्वान्न चक्षुर्विषयस्तदुक्तं अन्तराभवदेहोपि सूक्ष्म- त्वान्नोपलभ्यते निःक्रामन् प्रविशन्वात्मानाभावोनी क्षणादपि तत आंतरशरीरयुक्तोप्यात्मा आगच्छन् गच्छन् वा नोपलभ्यते लिङ्गतस्तूपलभ्यते एव तथा हि कृमेरपि जंतोस्तत्कालोत्पन्नस्याप्यस्ति निजशरीरविषयः प्रतिबन्धः उपघातकमुपभ्य पलायनदर्शनात् यस्य यद्विषयः प्रतिबन्धः सतद्विषयपरिशीलनाभ्यास- पूर्वकः तथा दर्शनान्न खल्वत्यन्ता परिज्ञातगुणदोषवस्तुविषये कस्याप्याग्रह उपजायते ततो जन्मादौशरीरा ग्रहः शरीरपरिशीलनाभ्यासजनितसंस्का रनिबन्धन इति सिद्धमात्मनो जन्मान्तरादागमनं उक्तञ्च शरीराग्रहरूपस्य चेतसः संभवो यदा जन्मादौ देहिनां दृष्टः किं न जन्मान्तरागतिः प्रत्यक्षतो नोपलभ्यते ततः कथमनुमानादवसीयते नैष दोषोऽनुमेयविषये प्रत्यक्षवृत्तेरनभ्युपगमात् परस्परविषयपरिहारेण हि प्रत्यक्षानुमानयोः प्रवर्त्तनमि- ष्यते ततः कथं स एव दोषः आह च अनुमेयेस्ति नाध्यक्षमिति कैवात्र दुष्टता अध्यक्षस्यानुमानस्य विषये विषयो नहि १ अथ तज्ज्ञाता येत्यप्रेपिवृत्ट- त्तिमन्तरेण कथमनुमानमुदयितुमुत्सहते न खलु यस्याविविषयाप्रत्यक्षवृत्तिर्मंहानसेपि नासीत्तस्यान्यत्र क्षितिधरादौ धूमाद्धूमध्वजानुमानं तदप्ययुक्त-

मत्रापि तज्जातीये प्रत्यक्षवृत्तिभावात्तथा ह्याग्रहोन्मत्त परि शीलनाभ्यासप्रवृत्त: प्रत्यक्षत एवोपलब्धस्तदुपष्टम्भे नेहाप्यमानं प्रवर्त्तते उक्तं च आग्रहस्तावद-भ्यासत प्रवृत्तउपलभ्यते अन्यत्राऽध्यक्षत: साक्षात्ततो देहेऽनुमान किं १ योपि चित्र दृष्टान्त: प्रागुपन्यस्त: सोप्ययुक्तो विषम्यात तथाहि चित्रमचेतनं गमनस्वभावरहितं च आत्मा च चेतन: कर्मवशाद्गत्यागती च कुरुते तत: कथं दृष्टांतदार्ष्टांतिकयो: साम्यं ततो यथा कश्चिद्देवदत्तो विवक्षिते ग्रामे कति पयदिनानि गृही भूत्वा ग्रामान्तरे गृहान्तरमास्थायावतिष्ठते तद्वदात्मापि विवक्षिते भवे देहं परिहाय भवांतरे देहांतरमारभ्यावतिष्ठते यच्चोक्तं तच्च संवेदनं देहकार्यमिति तत्र चाक्षुषादिकं संवेदनं देहाश्रितमपि कथंचिद्भवतु चक्षुरादीन्द्रियद्वारेण तस्यो त्पत्तिसम्भवात् यत्तु मानसं तत्कथं नहि तद्दे-हकार्यं घटते युक्त्ययोगात्तथा हि तन्मानसं ज्ञानं देहादुत्पद्यमानमिन्द्रियरूपाद्वा समु त्पद्येत: अनिन्द्रियरूपाद्वा केश नखादिलक्षणात् तत्र न तावदाद्य: पक्ष: इंद्रियरूपात्तत्पत्ताविन्द्रियबुद्धिवद्वर्त्तमानार्थ ग्रहणप्रसक्ते: इन्द्रियं हि वार्त्तमानिक एवार्थे व्याप्रियते ततस्तत् सामर्थ्यादुपजायमानं मानसमपि ज्ञानमिन्द्रियज्ञानमिव वर्त्तमानार्थ ग्रहणपर्यवसित सत्ताकमेव भवेत् अथ यदा चक्षुरूपविषये व्याप्रियते तदा रूपविज्ञानमुत्पादयति नशेषकालं ततस्तत् रूपविज्ञानं वर्त्तमानार्थविषयं वर्त्तमानेए वार्थे चक्षुषो व्यापारात् रूपविषयव्यापृत्यभावे च मनोज्ञानं ततो न तत् प्रतिनियतकालविषयएवं शेषेष्वपी न्द्रियेषु वाच्यं तत: कथमिव मनो ज्ञानस्य वर्त्तमानार्थग्रहणप्रसक्ति: तदसाधीयोयत इन्द्रियाश्रितं तदुच्यते यदिन्द्रियव्यापारमनुसृत्योपजायते इन्द्रियाणां च व्यापार: प्रतिनियते एव वार्त्तमानिके स्वस्वविषये ततो मनोज्ञानमपि यदि इन्द्रियव्यापारा श्रितं तत ऐन्द्रियज्ञानमिव वार्त्तमानिकार्थग्राहकमेव भवेदन्यथा इन्द्रियाश्रितमेव तन्न स्यात् उक्तञ्च चक्षुर्व्यापारमाश्रित्य भवद्यज्ज मिष्यते तद्व्यापारो न तत्रेति कथमस्य भवं भवेत् अथानिन्द्रियरूपादिति पक्षस्तदप्ययुक्तं तस्याचेतनत्वात् नत्व चेतनत्वादिति कोर्थ: यदि इन्द्रियविज्ञानविरहादिति तदिष्यतएव यदि नामेन्द्रियविज्ञानं ततो न भवति मनोज्ञानं

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



तु कस्मान्न भवति अथ मनोविज्ञानं नोत्पादयति अचेतनत्वं तदा तदेव विचार्यमाणं इति प्रतिज्ञार्थैकदेशासिद्धो हेतुस्तदप्यसत् अचेतनत्वादिति किमुक्तं भवति स्वनिमित्तविज्ञानैः स्फुरच्चिद्रूपतयानुपलब्धेः सर्वादियोऽपि स्वस्वनिमित्तविज्ञानैः स्फुरच्चिद्रूपा उपलभ्यन्ते ततस्तेभ्यो ज्ञानमुत्पद्यते इति मुक्तं केशनखादयस्तु न मनोज्ञानेन तथा स्फुरच्चिद्रूपा उपलभ्यन्ते ततः कथं तेभ्यो मनोज्ञानं भवतीति प्रतीमः आह च चेतयन्तो न दृश्यन्ते केशश्मश्रु न खादयः ततस्तेभ्यो मनो ज्ञानं भवतीत्यतिसाहसं अपि च यदि केशनखादिप्रतिबद्धमनोज्ञानं ततस्तदुच्छेदे मूलत एव नस्यात् तदुपघाते चोपहतं भवेत नच भवति तस्मान्नायमपि पक्षः क्षोदक्षमः, किञ्च मनोज्ञानस्य सूक्ष्मार्थभेदत्व स्मृतिपाटवादयो विशेषा अन्वयव्यतिरेकाभ्यामभ्यासपूर्वका दृष्टास्तथाहि तदेव शास्त्रमीहापोहादिप्रकारेण यदि पुनः परिभाव्यते ततः सूक्ष्मतरार्थावबोध उल्लसति स्मृतिपाटवं चापर्वमुज्जृंभते एवं चैकत्र शास्त्रेऽभ्यासतः सूक्ष्मार्थभेदत्वशक्तौ स्मृतिपाटवशक्तौ चोपजातायामन्येष्वपि शास्त्रान्तरेष्वनायासेनैव सूक्ष्मार्थावबोधः स्मृतिपाटवं चोल्लसति तदेवमभ्यासहेतुकाः सूक्ष्मार्थभेदत्वादयो मनोज्ञानस्य विशेषा दृष्टाः अथ कस्यचिदिहजन्माभ्यासव्यतिरेकेण दृश्यन्ते ततोऽवश्यं ते पारलौकिकाभ्यासहेतुका इति प्रतिपत्तव्यं कारणेन सह कार्यस्यान्यथा उपपन्नत्व प्रतिबन्धतोऽदृष्टतत्कारणस्यापि तत्कार्यत्वविनिश्चितेः ततः सिद्धः परलोकयायी जीवः सिद्धे च तस्मिन् परलोकयायिनि यदि कथञ्चिदुपकारी चाक्षुषादेर्विज्ञानस्य देहो भवेत् भवतु न कश्चिद्दोषः क्षयोपशमहेतु या देहस्यापि कथञ्चिदुपकारित्वाभ्युपगमात् न चैतावता तन्निवृत्तौ सर्वथा तन्निवृत्तिः न हि वह्नेरासादितविशेषो घटो वह्निनिवृत्तौ समूलोच्छेदं निवर्त्तते केवलं विशेष एव कश्चनापि यथा सुवर्णस्य द्रवता एवमिहापि देहनिवृत्तौ ज्ञानविशेषएव कोपि तत्प्रतिबद्धो निवर्त्तेत नतु पुनः समूलं ज्ञानमपि यदि पुनर्देहमात्रनिमित्तकमेव विज्ञानमिष्यते देहनिवृत्तौ च निवृत्तिमत् तर्हि देहस्य भस्मावस्थायां मा भूत् देहे तु तथाभूते एवावतिष्ठमानेऽमृतावस्थायां कस्मान्न भवति प्राणापानयोरपि हेतुत्वात्तदभावान्न भवतीति



For Private and Personal Use Only

चेत् न प्राणा पानयोर्ज्ञानहेतुत्वायोगो ज्ञानादेव तयोरपि प्रवृत्तेः तथाहि यदि मंदौ प्राणापानौ निःसृष्टुमिष्येते ततो मंदौ भवतः दीर्घौ चेत्तर्हि दीर्घाविति यदि पुनर्देहमात्र निमित्तौ प्राणापानौ प्राणापाननिमित्तं च विज्ञानं तर्हि नेत्यमिच्छावशात् प्राणापान प्रवर्त्तनं भवेत नहि देहमात्र निमित्तागौरता श्यामता वा इच्छावशात् प्रवर्त्तमानादृष्टा प्राणापाननिमित्तं च यदि विज्ञानं ततः प्राणापाननिर्ह्रासातिशयसम्भवे विज्ञानस्यापि निर्ह्रासातिशयौ स्यातामवश्यं हि कारणे परिहीयमाने हृतिवर्द्धमाने च कार्यस्यापि हानिरुपचयश्च भवति यथा महति मृत्पिण्डे महान् घटोऽल्पे चाल्पीयानन्यथा कारणमेव तत्र स्यात् न च भवतः प्राणापाननिर्ह्रातिशयसंभवे विज्ञानस्यापि निर्ह्रासातिशयो विपर्ययस्यापि भावात् मरणावस्थायां प्राणापानातिशयसंभवेपि विज्ञानस्य ह्रासादर्शनात् स्यादेतत्तदानीं वातपित्तादिभिर्दोषैर्देहस्य विगुणी कृतत्वात् न प्राणापानातिशयसंभवेपि चैतन्यस्यातिशयसंभवोऽतएवमृतावस्थायामपि न चैतन्यं देहस्य विगुणीभूतत्वात्तदसमीनतरमेवं सति मृतस्यापि पुनरुज्जीवनप्रसक्तः तथाहि मृतस्य दोषाः समी भवन्ति समीभवनं च दोषाणामवसीयते ज्वरादिविकारादर्शनात्समत्वं चारोग्यं तेषां समत्वमारोग्यं तद्वैषम्यविपर्यये इति वचनात् आरोग्यलाभाच्च देहस्य पुनरुज्जीवनं भवेत् अन्यथा देहे कारणमेव न स्याच्चेतसस्तद्विकारभावाभावा ननु विधानात् एवं हि देहकारणता विज्ञानस्य श्रद्धेया स्यात् यदि पुनरुज्जीवनं भवेत् स्यादेतदयुक्तमिदं पुनरुज्जीवनप्रसङ्गापादनं यतो यद्यपि दोषा देहस्य वैगुण्यमाधाय निवृत्तास्तथापि न तत् कृतस्य वैगुण्यस्य निवृत्तिर्न हि दहनकृतो विकारः काष्ठे दहननिवृत्तौ निवर्त्तमानो दृष्टस्तदयुक्तमिह हि किंचित् क्वचिदनिवर्त्त्यं विकारारम्भकं यथा वह्निः काष्ठे न हि श्यामता मात्रमपि वह्निना कृतं काष्ठे वह्नि निवृत्तौ निवर्त्तते किंचित्पुनः क्वचिन्निवर्त्त्यं विकारारम्भकं यथा स एवाग्निः सुवर्णे तथाहि अग्निकृतासुवर्णेद्रवता अग्निनिवृत्तौ निवर्त्तते तथा वाय्वादयो दोषा निवर्त्त्यविकारारम्भकाश्चिकित्सा प्रयोगदर्शनाद्यदि पुनरनिवर्त्त्यविकारारंभका भवेयुस्तर्हि न तद्विकारनिवर्त्तनाय चि-

कृत्वा विधीयते [illegible] न च वाच्यं [illegible] प्राग्दोषा निवर्त्त्य विकारारम्भका मरणकाले त्वनिवर्त्त्य विकारारम्भका इति एकस्यैकत्वैव निवर्त्त्या
निवर्त्त्य विकारारम्भकत्वायोगा[illegible] निवर्त्त्य विकारारम्भकमनिवर्त्त्य विकारारम्भकं च भवितुमर्हति तथा अदर्शनात् ननु द्विविधो हि व्याधिः
साध्योऽसाध्यश्च तत्र साध्यो निवर्त्त्य स्वभावः [illegible]त्यचिकित्साफलवर्त्ती असाध्यानिवर्त्तनीयः न च साध्यासाध्यभेदेन व्याधिं द्वैविध्यमप्रतीतं सकललोक
प्रसिद्धत्वात् व्याधिश्च दोषवैषम्यकृतस्ततः कथं दोषाणां निवर्त्त्यानिवर्त्त्य विकारारम्भकत्वमनुपपन्नमिति तदप्यसत् भवन्मतेनासाध्यव्याधेरेवानुपपत्तेः तथा हि
असाध्यता व्याधेः क्वचिदायुःक्षयात् यतस्तस्मिन्नेव व्याधौ समानौषध वैद्यसम्पर्केऽपि कश्चिन्म्रियते कश्चिन्न क्वचित्पुनः प्रतिकूलकर्मोदयात् प्रतिकूलकर्मोदय
जनिता हि श्वित्रादिव्याधिरौषधसहस्रैरपि कश्चिदसाध्यो भवति एतच्च द्विविधमप्यसाध्यत्वं व्याधेः पारमेश्वरप्रवचनवेदिनामेवमते संगच्छते न भवतो भूत-
मात्रतत्त्ववादिनः क्वचित्पुनरसाध्यो व्याधिर्दोषकृतविकारनिवर्त्तनसमर्थस्यौषधस्याभावाद्दूरस्य वा वैद्यौषधसम्पर्काभावे हि व्याधि सर्पेनसकलमप्यायुरुप
क्रमते ननु वैद्यौषधसम्पर्काभावादेवास्माकमपि पुनरुज्जीवनं न भविष्यति न हि तदस्ति किञ्चिदौषधं वैद्यो वा यत्पुनरुज्जीवयति तदप्ययुक्तं वैद्यौषधे हि
दोषकृतविकारनिवर्त्तनार्थमिष्यते न पुनरत्यन्तासतश्चैतन्यस्योत्पादनार्थं तथा नभ्युपगमात् दोषकृतास्य विकाराद्धतावस्थायां स्वयमेव निवृत्ता ज्वरावरे
दर्शनात् ततः किं वैद्यौषधान्वेषणेनेति तदवस्थ एव पुनरुज्जीवनप्रसङ्गः अपि च कश्चिद्दोषाणामुपशमेप्यकस्मादेव म्रियते कश्चिन्नातिदोषदुष्टत्वेपि जीवति
तदेतत् भवन्मते कथं व्यवतिष्ठते आह च दोषस्योपशमेप्यस्ति मरणं कस्यचित्पुनः जीवनं दोषदुष्टत्वेप्येतन्नस्याद्भवन्मते अस्माकं तु मतेन यावदायुः कर्म
विजृम्भते तावद्दोषैरतिपीडितोपि जीवति आयुःकर्मक्षये च दोषाणामविकृतावपि म्रियते तत्र देहमात्र निमित्तं सम्वेदनं अन्यच्च देहः कारणं संवेदनस्य
सहकारिभूतं भवेदुपादानभूतं वा यदि सहकारिभूतं त दिष्यत एव देहस्यापि क्षयोपशमहेतुतया कथंचिद्विज्ञानहेतुत्वाभ्युपगमात् अथोपादान भूतं तद

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



शुक्रमुपादानं हि तत्तस्य यद्विकारेणैव यस्य विकारो यथा मृद्घटस्य न च देहविकारेणैव विकारः सम्वेदनस्य देहविकाराभावेपि भयशोकादिना तद्विकारदर्शनात् तन्न देह उपादानं सम्वेदनस्य उक्तं च, अविकृत्य हि यद्वस्तु यः पदार्थो विकार्यते उपादानं न तत्तस्य युक्तं गो गवयादिवत् । एतेन यदुच्यते मातापितृचैतन्यं सुत चैतन्यस्योपादानमिति तत्रापि प्रतिक्षिप्तमवगन्तव्यं तत्रापि तद्विकारे विकारित्वं तदविकारे चाविकारत्वमिति नियमादर्शनात् अन्यच्च यत् यस्योपादानं तत्तस्मादभेदेन व्यवस्थितं यथा मृदो घटः मातापितृचैतन्यं चेत्सुत चैतन्यस्योपादानं ततःसुतचैतन्यं मातापितृचैतन्यादभेदेन व्यवतिष्ठेत न च व्यवतिष्ठते तस्माद्युक्तिरिक्तमेतन्न भूतधर्मो भूतकार्यं वा चैतन्यमथ चास्ति प्रतिप्राणिस्वसम्वेदनप्रमाणसिद्धमतो यस्येदृशयथोक्तलक्षणो जीवः योनय इति युमिश्रणेयुवन्ति तैजसकार्मणशरीरवन्तः सन्त औदारिकशरीरेण वैक्रियशरीरेण वाश्विति योनयो जीवानामेवोत्पत्ति स्थानानि ताश्च सचित्तादि भेदभिन्ना अनेकप्रकाराः उक्तं च सचित्तशीतसंवृतेतरमिश्रास्तच्छोभय इति जगच्च जीवाश्च योनयश्च जगज्जीवयोनयः तासां विविधमनेकप्रकारमुत्पाद्यं तद्धर्मात्मकतया जानातीति विज्ञायको जगज्जीवयोनिविज्ञायकः अनेन केवलज्ञानप्रतिपादनात् स्वार्थसम्पदमाह तथा जगत् गृणाति यथावस्थितं प्रतिपादयति शिष्येभ्य इति जगद्गुरुर्यथावस्थित सकलपदार्थप्रतिपादक इत्यर्थः एतेन यत्कैश्चित् शब्दस्य बहिरर्थं प्रतिप्रामाण्यमपाक्रियते तदपास्तं द्रष्टव्यं तथाहि ते एवमाहुः प्रमेयं वस्तुपरिच्छिन्नं प्रापयत्प्रमाणमुच्यते प्रमेयं च विषय प्रमाणस्येति प्रामाण्यं विषयवत्तयाव्याप्तं ततो यद्विषयवन्न भवति तत्प्रमाणं यथा गगनेन्दीवरज्ञानं न भवति च विषयवत् शाब्दंज्ञानमिति नचायमसिद्धो हेतुर्यतो द्विविधो विषयः प्रत्यक्षः परोक्षश्च तत्र न प्रत्यक्षः शाब्दज्ञानस्य विषयो यस्य हि ज्ञानस्य प्रतिभासेन स्फुटाभनीलाद्याकाररूपेण योऽर्थोऽनुकृतान्वयव्यतिरेकः स तस्य प्रत्यक्षस्तस्य च प्रत्यक्षस्यार्थस्यायमेव प्रतिपत्ति प्रकारः सम्भवद्यामस्तु तेनोपरः तद्विषयं च तदन्वयव्यतिरेकानुविधायिस्फुट प्रतिभासं ज्ञानं प्रत्यक्षं प्रत्यक्ष ज्ञेयत्वात्तन्न प्रत्यक्षो अर्थोऽनेकप्रकार प्रतिपत्तिविषयो यः

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



शाब्दप्रमाणस्यापि विषयोभवेत् नापि परोक्षस्तस्योपि हि निश्चित तदन्वयव्यतिरेकानां तरीयकदर्शनात प्रतिपत्तिर्यथा धूमदर्शनाद्वह्नेरन्यथातिप्रसङ्गात् न
च शब्दस्यार्थे न स हि निश्चितान्वयव्यतिरेकता प्रतिबन्धाभावात्तादात्म्यतदुत्पत्त्यनुपपत्ते तथाहि नवात्योर्थो रूपं शब्दानां नापि शब्दो रूपमर्थानां तथा
प्रतीतेरभावात् तत्कथमेषां तादात्म्यं येन व्याहृत्ति कृतव्यवस्थाभेदेपि नांतरीयकता स्यात् कृतकत्वानित्यत्ववत् अपि यदि तादात्म्यमेषां भवेत्ततोऽनला
चलत्तुरिकादिशब्दोच्चारणे वदनदहनपूरण पाटनादिदोष: प्रसज्येतन चैवमस्ति तन्नतादात्म्यं नापि तदुत्पत्तिस्तत्रापि विकल्पद्वयप्रसक्तो तथा वस्तुन:किं
शब्दस्योत्पत्तिरुत शब्दाद्वस्तुनस्तत्र वस्तुन: शब्दोत्पत्तावकृतसंकेतस्यापि पुंस: प्रथमप्रसदर्शने तच्छब्दोच्चारणप्रसङ्ग: शब्दाद्वस्तूत्पत्तौ विश्वस्यादरिद्रता
प्रसक्तिस्तत एव कटककुण्डलाद्युत्पत्ते: तदेवं प्रतिबन्धाभावान्न शब्दस्यार्थ्यैं न सहनांतरीयकता निश्चयस्तदभावान्न न शब्दान्निश्चितस्यार्थस्य प्रतिपत्तिरपि
त्वनिवर्त्ति तशंकतयाऽस्ति न वेति विकल्पितस्य न च विकल्पितमुभयरूपं वस्त्वस्ति यत्प्राप्यं सद्विषय: स्यात् प्रवर्त्तमानस्य तुपुरुषस्य तस्यार्थस्य पृथिव्या
मम जनादवस्थमन्यत् ज्ञानांतरं प्राप्तिनिमित्तमुपजायते यत: किञ्चिदवाप्यत इति शाब्दज्ञानस्य विषयत्वाभाव: तदसत् विषयवत्वाभावा सिद्धे परोक्षस्य
तद्विषयत्वाभ्युपगमात् यत्पुनरुक्तं न शब्दस्यार्थेन सह निश्चितान्वय व्यतिरेकता प्रतिबंधाभावादिति तदसमीची वाच्यवाचकभावलक्षणेन प्रतिबद्धांतरेण नांत
रायकतानिश्चयान् शब्दो हि वाच्यवस्तुवाचकस्वभावतया तन्नांतरीयकस्ततस्तन्नांतरीयकतायां निश्चितायां शब्दान्निश्चितस्यैवार्थस्य प्रतिपत्तिर्न विकल्पित
रूपस्य निश्चितं च प्रापयनविषयशाब्दं ज्ञानमिति स्यादेतत् यदि वास्तवसम्बन्धपरिकरितमूर्त्तय: शब्दास्तर्हि समाश्रय तु निरर्थकतामिदानीसंकेत: स
खलु सम्बधो यतोऽर्थप्रतीति सवज्ञा स्ततोनिरर्थक: सङ्केत स्तत एवार्थप्रतीतिसिद्धे: तदेतदत्यन्तप्रमाणमार्गानभिज्ञत्वसूचकं यतो न विद्यमानत्वे सम्बन्धो
अर्थप्रतीति निबन्धनं किंतु स्वात्मज्ञानसहकारी यथा प्रदीपस्तथाहि प्रदीपो रूपप्रकाशन भावोपि यदि स्वात्मज्ञानसहकारिस्ततः प्रकाशकस्ततो रूपं प्रकाश

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



यति नान्यथा ज्ञापकत्वात् न खलु धूमादिकमपि लिङ्गवस्तु हस्त्यावङ्गरादि प्रतिबद्धमपि सत्तामात्रेण वङ्गरादेर्गमकमुपजायते तदयुक्तमन्यैरपि ज्ञापकत्वादि सम्बन्धः स्वात्मज्ञानमपेक्ष्यते तेनासौ विद्यमानोपि नागृहीतः प्रकाशकः । सम्बन्धस्य च परिज्ञानं तदावरणकर्म्मक्षयक्षयोपशमाभ्यां तौ च सङ्केतग्रह रणाभावनाद्यनेकसाधनसाध्यो ततस्तग्रहणभावनासङ्केतादिभ्यः समुत्पन्नतदावरणकर्म्मक्षयक्षयोपशमानां शब्दादर्थाच्च केवलादप्यवैपरीत्येन वाच्यवाचक भावलक्षणः सम्बन्धोवगमनपथमवतरति तथाहि सर्वएव सर्ववेदिनः सुमेरु जंबूद्वीपादीनर्थान् गृहीतसंकेता अपि तच्छब्दवाच्या नैव प्रतिपद्यन्ते तैरेवतथा प्ररूपणात् कल्पान्तरवर्त्तिभिरन्यैरेवं प्ररूपिता इति तैरपि तथा प्ररूपिता इति चेत् ननु तेषामपि कल्पांतरवर्त्तिनां तथा प्ररूपणे को हेतुरिति वाच्यं तदन्यैरेवं प्ररूपणादिति चेत् अत्रापि स एव प्रसङ्गः समाधिरपि सएवेति चेत् ननु तर्हि सिद्धः सुमेर्वाद्यर्थानां तदभिधायीकानां च वास्तवः सम्बन्धः सर्व कल्पवर्त्तिभिरपि सर्ववेदिभिस्तेषां सुमेर्वादिशब्दवाच्यतया प्ररूपणात् अनादित्वात् संसारस्य कदाचित्कैश्चिदन्यथापि सा प्ररूपणाकृता भविष्यतीति चेत्ना तीन्द्रियत्वेनात्र प्रमाणाभावात् सर्वैरपि तथैव सा प्ररूपणा कृतेत्यत्रापि न प्रमाणमिति चेन्नात्र प्रमाणोपपत्तेः तथा हि शाक्यमुनिना सम्प्रतिसुमेर्वादिको अर्थः सुमेर्वादिशब्देन प्ररूपितः स च सुमेर्वादौ सुमेर्वादिशब्दप्रयोगः संकेतद्वारेणाप्यसत्स्वभावतायां तयो र्नोपपद्यते तत्स्वभावत्वाभ्युपगमेच सिद्धं न समीहितमनादावपि काले तयोस्तत्स्वभावत्वात्तत्समानपरिणामस्य प्रवाहतो नित्यत्वात्तत सम्बन्धाभ्युपगमात् इत्थं चैतदंगीकर्त्तव्यमन्यथा नादित्वात् संसारस्य कदाचिदन्यतोपि धूमादेर्भावो भविष्यन्तीत्येवं व्यभिचारशङ्काधूमधमध्वजादिषु प्रसरन्ती दुर्निवारेत्यलं दुर्मतिविमर्द्दितेन प्रयासेन तु यदिपार मार्थिकसम्बन्धनिबद्धस्वरूपत्वादिमे शब्दास्तात्विकार्थाभिधानप्रभविष्णवस्तर्हि दर्शनांतरनिवेशि पुरुषपरिकल्पितेषु वाच्येष्वेतेषां प्रवृत्तिर्नोपपद्येत परस्परवि- रुद्धत्वेन तेषामर्थानां स्वरूपतोऽभावात् यदपि च विनष्टमनुत्पन्नं वा तदपि स्वरूपेण न समस्तीति तत्रापि वाचो न प्रवर्त्तेरन अपि च यदि वाचां सङ्गता

For Private and Personal Use Only

र्थमन्तरेण नप्रवृत्तिस्तर्हि न स्यात्कश्चिदपि वाचोलीकता भवेत् नचैतत् दृश्यते तस्मात्सर्वमपि पूर्वोक्तं मिथ्या तदप्ययुक्तमिह द्विधा शब्दा यथा भाषा वर्गणो पादाना: सत्यभाषावर्गणोपादानाश्च तत्र ये यथा भाषा वर्गणोपादानास्ते तु तीर्थान्तरीयपरिकल्पिता: कुशास्त्रसम्यकवशसमुत्थ वासनासम्पादितसत्ताका: प्रधानरूपं जगदीश्वरकृतं विश्वमित्येवमाकारा स्तेनर्थका एवाभ्युपगम्यन्ते ते हि वन्ध्यादवलाद्दव तदर्थप्राप्त्यादिप्रसवविकला: केवलं तथाविधसंवेदनभोग- फलादृति न तैर्व्यभिचार: अथ तेपि सत्याभिमतशब्दा इव प्रतिभासन्ते तत्कथमयं सत्यविवेको निर्द्धारणीय: ननु प्रत्यक्षाभासमपि प्रत्यक्षमिवाभासते तत्र तत्रापि कथं सत्यासत्यप्रत्यक्षविवेकनिर्द्धारणं स्वरूपविषयपर्यालोचनयेति चेत्तथा हि अभ्यासदशामापन्ना: स्वरूपदर्शनमात्रादेव प्रत्यक्षस्य सत्यासत्यत्व मवधारयन्ति यथा मणिपरीक्षका मणे: अनभ्यासदशामापन्नास्तु विषयपर्यालोचनया यथाकिमयं विषय: सत्यउताहोनेति तथार्थक्रियासंवाददर्शनतस्तज्ज तस्वभावलिङ्गदर्शनतो वा सत्यत्वमवगच्छन्त्यन्यथा त्वसत्यत्वमिति तदेतत्स्वरूपविषयपर्यालोचनयासत्यासत्यत्वविवेकनिर्द्धारणमिहापि समानं तथाहि दृश्य न्तएव केचित्प्रज्ञातिशयसमन्विता: शब्दश्रवणमात्रादेव पुरुषाणां मिथ्याभाषित्वममिथ्याभाषित्वं वा सम्यगवधारयन्त: विषयसत्यासत्यत्वपर्यालोचनायां तु किमेष वक्ता यथावदाप्त उतनेति तत्र यदि यथावदाप्त इति निश्चितं ततो विषयसत्यत्वमिति स्थात्वसत्यत्वं आप्तेतरविवेकोपि परिशीलनेन लिङ्गतो वा कुत श्चिदवसेयो निपुणेन हि प्रतिपत्त्रा भवितव्यं यदप्युक्तं यदपि च विनष्टमनुत्पन्नं वा तदपि न स्वरूपेण समस्तीत्यादि तत्रापि यदि विनष्टानुत्पन्नयो दार्वामा निकविद्यमानरूपाभिधायिक: शब्द: प्रवर्त्तते तर्हि स निरर्थकोभ्युपगम्यते एव ततो न तेन व्यभिचार: यदा तु ते अपि विनष्टानुत्पन्ने विनष्टानुत्पन्नतया भिधत्ते शब्दस्तदा तद्विषयसार्वज्ञज्ञानमिव सद्भूतार्थविषयत्वात् स प्रमाणमित्थं चैतदङ्गीकर्त्तव्यमन्यथातीतकल्पांतरवर्त्ति पार्श्वादिसर्वज्ञदेशनाभविष्यत् चक्रवर्त्यादिदेशना च सर्वथा नोपपद्येत तद्विषयज्ञाने शब्दस्य हृत्यभावात् अथोच्येतानलेऽनलशब्दस्तदभिधानस्वभावतया यमभिधे परिणाममाश्रित्य

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



प्रवर्त्तते स्वजले नास्ति जलानलयोरभेदप्रसङ्गात् अथच प्रवर्त्तते सङ्केतवशात्कालेप्यनलशब्दस्तत्कथं शब्दार्थयोर्वास्तवः सम्बन्धः सदसत् शब्दस्यानेकशक्तिसमन्वितत्वेनोक्तदोषानुपपत्तेः तथाहि नानलशब्दस्यानलवस्तुगताभिधेय परिणामोपेक्षीतदभिधानविषय एवैकःस्वभावोपि तु समयाधान तत्करणपूर्वकतयाविलंबितादि प्रतीतिनिबन्धनत्वेन जलवस्तुगताभिधेय परिणामापेक्षीतदभिधानस्वभावोपि तथा तस्यापि प्रतीतेः अन्यथा निर्हेतुकत्वेन तत्प्रस्वभावप्रसङ्गात् ननु कथमेते शब्दावस्तुविषयाः प्रतिज्ञायन्ते चक्षुरादीन्द्रियसमुत्थबुद्धाविव शाब्दे ज्ञाने वस्तु नोऽप्रतिभासनात्यदेव चक्षुरादीन्द्रियबुद्धौ प्रतिभासते व्यक्तंतरानुयायि प्रतिनियतदेशकालं तदेव वस्तुतस्यैवार्थक्रियासमर्थत्वात् नेतरत्परपरिकल्पितं सामान्यं विपर्ययात्नच तदर्थक्रियासमर्थवस्तु शाब्दे ज्ञाने प्रतिभासते तस्मादवस्तुविषया एते शब्दाः तथाचात्र प्रमाणं योऽर्थशाब्दज्ञाने येन शब्देन सह संस्पृष्टो नावभासते न स तस्य शब्दस्य विषयः यथा गोशब्दस्यार्थः नावभासते चेन्द्रियगम्योऽर्थः शाब्दज्ञाने शब्देन संसृष्ट इति यो हि यस्य शब्दस्यार्थः स तेन शब्देन सह संस्पृष्टः शाब्दे ज्ञाने प्रतिभासते यथा गोशब्देन गोपिण्डः एतावन्मात्र निबन्धनत्वाद्वाच्यत्वस्येति तदेतदसमीचीनमिन्द्रियः गम्यार्थस्य शाब्दे ज्ञाने न सदा नवभासासिद्धेः तथा हि कृष्णं महांतमखण्डं मसृणमपूर्वमपवरकात् घटमानयेत्युक्तः कश्चित्ज्ञानावरणक्षयोपशमयुक्तस्तमर्थतथैव प्रत्यक्षमिव शाब्दे ज्ञाने प्रतिपद्यते तदन्यघटमध्ये तदानयनायतं प्रतिभेदेन प्रवर्त्तनात् तथैव च तत्प्राप्तेः अथ तत्राप्यस्फुटरूपएव वस्तुनः प्रतिभासोऽनुभूयते स्फुटाभंच प्रत्यक्षं तत्कथं प्रत्यक्षगम्यं वस्तुशाब्दज्ञानस्य विषयः नैषदोषः स्फुटास्फुटरूपप्रतिभासभेदमात्रेण वस्तुभेदायोगात् तदाह्येकस्मिन्नेव नीलवस्तुनि दूरासन्नवर्त्ति प्रतिपत्तृज्ञाने स्फुटास्फुटप्रतिभासे उपलभ्येतेन च तत्र वस्तुभेदाभ्युगमः द्वयोरपि प्रत्यक्षप्रमाणतयाभ्युगमात् तथैहाप्येकस्मिन्नपि वस्तुनीन्द्रियजशाब्दज्ञाने स्फुटास्फुटप्रतिभासे भविष्यतो नच तन्नोपरवस्तुभेदः अथ सत्यभावपि शाब्दज्ञानप्रतिभासा विशेषात्सत्यपि वस्तुनि शाब्दं ज्ञानं न तद्याथात्म्यसंस्पर्शितद्भावाभाव योरननुविधानात् यस्य हि

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



ज्ञानस्य प्रतिभासो यस्य भावाभावावनुविधत्ते तत्तस्य परिच्छेदकं न च शाब्दज्ञानप्रतिभासो वस्तुनो भावाभावावनुविधत्ते वस्त्वभावेपि तदविशेषात्
तत्र वस्तुनः परिच्छेदकं शाब्दज्ञानं रसज्ञानमिव गंधस्य प्रमाणं चात्र यत्ज्ञानं यदन्वयव्यतिरेकानुविधायि न भवति न तत्तद्विषयं यथा रूपज्ञानं
रसविषयं न भवति चेन्द्रियगम्यार्थान्वयव्यतिरेकानुविधायि शाब्दं ज्ञानमिति व्यापकानुपलब्धिः प्रतिनियतवस्तुविषयत्वं च हि ज्ञानस्य निमित्तव
त्तया व्याप्तं अन्वयव्यतिरेकानुविधानाभावे च निमित्तवत्वाभावः स्यात् निमित्तांतरासम्भवात् तेन तद्विषयत्वं च निमित्तवत्त्वाभावाद्विपक्षाद्व्याप
कानुपलब्ध्या व्यावर्त्तमानमन्वयव्यतिरेकानुविधानेन व्याप्यते इति प्रतिबन्धसिद्धिः तदयुक्तं प्रत्यक्षज्ञानेप्येवमविषयत्व प्रसक्तेः तथाहि: यथा जलवस्तुनि जलो
ल्लेखिप्रत्यक्षमुदयपदमासादयति तथा जलाभावेपि मरौ मध्याह्नमार्त्तण्डमरीचिका स्वक्षणजलप्रतिभा समुदयमानमुपलभ्यते ततो जलाभावेपि जलज्ञान
प्रतिभासाविशेषात् सत्यपि जले जलप्रत्यक्षप्रादुर्भवन् न तद्यथात्म्यसंस्पर्शि तद्भावाभावयोरनुकारादित्यादि सर्वं समानमेव अथ देशकालस्वरूपपर्यालोच
नया तत्प्राप्त्यभावादिना च मरुमरीचिकासु जलोल्लेखिनः प्रत्यक्षस्य भ्रांतत्वमवसीयते भ्रान्तं चाप्रमाणं ततो न तेन व्यभिचारः प्रमाणभूतस्य च वस्त्व
न्वयव्यतिरेकानुविधायित्वादव्यभिचार एव तदेतदन्यत्रापि समानं तथाहि यथार्थदर्शनादिगुणयुक्तः पुरुष आप्तस्तत्प्रणीत शब्दसमुत्थं च ज्ञानं प्रमाणं न च
तस्य वस्त्वन्वयव्यतिरेकानुविधायित्वव्यभिचारसम्भवः यत्पुनरनाप्तप्रणीतशब्दसमुत्थं ज्ञानं तदप्रमाणमप्रमाणत्वाच्च न तेन व्यभिचारः यदपि च प्रमाणमु
पन्यस्तं तदपि हेतोरसिद्धत्वान्न साध्यसाधनायालं असिद्धता च हेतोराप्त प्रणीतशब्दस्य वस्तुव्यतिरेकेण प्रवृत्त्यसम्भवात् यत्पुनरिदमुच्यते शब्दश्रूयमाणो
वक्त्रभिप्रायविषयं विकल्पप्रतिबिंबं तत्कार्यतया धूमइव वह्निमनुमापयति तत्र स एव वक्त्राविशिष्टार्थाभिप्रायशब्दयोराश्रयो धर्मी अभिप्रायविशेषः साध्यः
शब्दः साधनमिति तदाह वक्तुरभिप्रेतं सूचयेयुरिति स एव तथा प्रतिपद्यमानस्य आश्रयो स्थिति तत्पापात्मापीयः तथा प्रतीतेरभावात् न खलु कश्चिदिह



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



धूमादिवह्निं तत्कार्यतया शब्दादभिप्रायविषयं विकल्प प्रतिबिम्बमनुमिमीते अपि तु वाचकत्वेन बाह्यमर्थं प्रत्येति देशांतरे कालान्तरे च तथा प्रवृत्त्यादि
दर्शनात् नच देशान्तरादावपि तथा प्रतीतावन्यथा परिकल्पनं श्रेयातिप्रसङ्गप्राप्तेनाग्निधूमं जनयति किन्त्वदृष्टः पिशाचादिरित्यस्या अपिकल्पनाया प्रस-
ङ्गात् अपिचार्थक्रियाया प्रेक्षावान् प्रमाणमन्वेषयति नचाभिप्रायविषयं विकल्पप्रतिबिंबं विवक्षितार्थक्रियासमर्थं किंतु बाह्यमेव वस्तु नच वाच्यमभिप्राय
विषय विकल्पप्रतिबिंबं ज्ञात्वा बाह्ये वस्तुनि प्रवर्त्तिष्यते तेनायमदोष इति अन्यस्मिन् ज्ञाने अन्यत्र प्रवृत्त्यनुपपत्ते: न हि घटे परिच्छिन्ने पटे प्रवृत्ति
र्युक्ता एतेन विकल्पप्रतिबिंबकं शब्दवाच्यमिति यत्प्रतिपन्नं तदपि प्रतिक्षिप्तमवसेयं तत्रापि विकल्पप्रतिबिंबके शब्देन प्रतिपन्ने वस्तुनि प्रवृत्त्यनुपपत्ते:
दृश्यविकल्प्यावर्थावेकीकृत्यवस्तुनि प्रवर्त्तते इति चेत् तथाहि तदेव विकल्पप्रतिबिंबकं बहीरूपतयाध्यवस्यति ततो बहि प्रवर्त्तते तेनायमदोष इति न
तयोरेकाकरणासिद्धे: अत्यन्तवैलक्षण्येन साधर्म्यायोगात् साधर्म्यं चैकाकरणनिमित्तमन्यथातिप्रसंगात् अपिच कश्चैतावेकाकरोतीति वाच्यं सएव विक
ल्पइति चेन्न तत्र बाह्यस्वलक्षणानवभासात अन्यथाविकल्पत्वायोगादनवभासिते नचेकीकरणासंभवादतिप्रसक्ते: अथ विकल्पादन्यएव कश्चिद्विकल्पमे
वार्थं दृश्यमित्यध्यवस्यति हंततर्हि स्वदर्शनपरित्यागप्रसंग: एवमभ्युपगमेसति बलादात्मास्तित्वप्रसक्ते: तथाहि निर्विकल्पकं न विकल्पमर्थं साक्षात्करोति
तदगोचरत्वात् ततो न तत्दृश्यमर्थं विकल्पेन सहैकीकर्तुमलं न च देशकालस्वभाव व्यवहितार्थविषयेषु शाब्दविकल्पेषु तद्विषयो निर्विकल्पकसंभवस्तत्
कथं तत्र तेन दृश्यविकल्पार्थैकीकरणं ततो विकल्पादन्य: सर्वतदृश्यविकल्प्यावर्थावेकी कुर्वन् बलादात्मैवापपद्यते न च सोभ्युपगम्यते तस्माच्छब्दो बाह्य
स्यार्थस्य वाचकइत्यकामेनापि प्रतिपत्तव्यं इतश्च प्रतिपत्तव्यमन्यथा संकेतस्यापि कर्तुमशक्यत्वात्तथाहि येन शब्देन इदं तदित्यादिना संकेतोविधेयस्तेन
किं संकेति तेन उतासंकेति तेन न तावत् संकेति तेनानवस्थाप्रसंगात् तस्यापि हि येन शब्देन संकेत: कार्यस्तेन किं संकेति तेन उतासंकेति तेनत्यादि

For Private and Personal Use Only

तदेवायत्तं ते यथासंकेतित तेन सिद्धस्तर्हि शब्दार्थयोर्वास्तव: संबंधइति तथा जगदानंद: इह जगच्छब्देन संज्ञि पंचेंद्रियपरिग्रहस्तेषामेव भगवद्दर्शनदेशना दिना आनंदसंभवात्ततश्च जगतां संज्ञिपंचेंद्रियाणां मध्वस्यंदिसत्त्विदर्शनमात्रतो निःश्रेयसाभ्युदय साधकधर्मोपदेशद्वारेण चानंदहेतुत्वादैहिकामुष्मिक प्रमोदकारणत्वाज्जगदानंद: अनेन परार्थसंपदमाह तथा जगन्नाथ: इहजगच्छब्देन सकलचराचरपरिग्रहो नाथशब्देन च योगक्षेमकृदभिधीयते योगक्षेम कृतनाथ इति विद्वत् प्रवादात्ततश्च जगत: सकलचराचररूपस्य यथावस्थितस्वरूपप्ररूपणाद्वारेण वितथप्ररूपणापायेभ्य: जनाश्चनाथ इवनाथो जगन्नाथ: अनेनापि परार्थसंपदमाह तथा जगद्वंधु: इहजगच्छब्देन सकलप्राणिगणपरिग्रह: प्राणिन एवाधिकृत्यवंधुत्वोपपत्ते: ततश्च जगत: सकलप्राणिसमुदाय रूपस्याव्यापादनोपदेशप्रणयनेन सुखस्थापकत्वात् बंधुरिवबंधुर्जगद्वंधु: सकलजगदव्यापादनोपदेशप्रणयनं च भगवत: सुप्रतीतं तथाचाचारसूत्रं सव्वे पाणासव्वेभूया सव्वेजीवा सव्वेसत्तानहन्तव्वा नअज्जावेयव्वा न परिघेत्तव्वा न उवद्दवेयव्वा एसधम्मे सुद्धेधुवेनीए सासए समेच्चलोदं खेयन्ने हिं पवेइए इत्यादि एतेन संसारमोचकानां व्यापाद्योपकृतये दु:खितसत्वव्यापादनमुपदिशता सकलमार्गप्रष्टत्वमावेदितं द्रष्टव्यं एतस्ते एवमाहु: यत्परिणामसुंदरं तदापातकटुकमपि परेषामाधेयं यथारोगोपशमनमौषधं परिणामसुंदरं च दु:खितसत्वानां व्यापादनमिति तथाहि कृमिकीटपतङ्गमसकालावकचटककुष्टि महादरिद्रांधपंग्वादयो दु:खितजंतव: पापकर्मोदयवशात् संसारसागरमभिसवंते ततस्तेवश्यं तत्पापक्षपणाय परोपकारकरणैकरसिकमानसेन व्यापादनी या: तेषां हि व्यापादनेन महादु:खमतीवोपजायते तीव्रदु:खवेदनाभिभववशाच्च प्राग्बद्धं पापकर्मोदीर्योदीर्यानुभवन्त: प्रतिक्षिपन्ति स्यादेतत् किमत्र मार्णं यत्ते व्यापाद्यमानास्तीव्रवेदनानुभवत: प्राग्बद्धं पापकर्मोदीर्योदीर्यपरिक्षिपंति न पुनरार्त्तरौद्रध्यानोपगमत: प्रभूततरं पापमावर्जयन्तीति उच्यते युष्मत्सिद्धांतानुगतमेव नारकस्वरूपापदर्शकं वच: तथाहि नारकानिरंतरं परमाधार्मिकसुरैस्ताडनभेदनोत्कर्त्तनशूल्यारोपणाद्यनेक प्रकारमुपहन्यमाना:

परमाधार्मिकसुराभावे परस्परोदीरित तीव्रवेदना रौद्रध्यानोपगता अपि प्राग्बद्धमेव कर्मक्षपयंति नापूर्वपापमधिकतरमुपार्जयंति नारकायुर्बंधासंभवात् तदसंभवश्चानंतरं भूयस्तत्रैवोत्पादाभावादपि च यतएव रौद्रध्यानोपगता अतएव तेषां प्रभूततरप्राग्बद्धपापकर्मपरिक्षय: तीव्रसंक्लेशभावात् न खलु तीव्रसंक्लेशाभावे परमाधार्मिकसुरा अपि तेषां कर्मक्षपयितुं शक्तास्ततो रौद्रादिध्यानमुपजनयंतोपि व्यापादका व्यापाद्यानामुपकारकारकद्भूत्वं च व्यापादनतस्तेषामुपकारसंभवे येतद्व्यापादनमुपेक्षंते प्रतिषेधंति वा तेमहापापकारिण: येपुन: प्रागुपात्तपुण्यकर्मोदय: वशत: सुखासिकामनुभवंतोवतिष्ठं तेनतेव्यापादनीयास्तेषां व्यापादने सुखानुभववियोगभावेनोपकारसंभवात् नच परहितनिरता: परोपकृतये संरंभमातन्वंते तदेतदयुक्तं परोपकाराद्धि सएव सुधिया विधेयोय आत्मनउपकारको नच परेषां व्यापादनेनोपकृतिकरणे भवत: कमप्युपकारमाचक्ष्महे तथाहि परेषां व्यापादनेकाभवत: उपकार: किंपुण्यबंध: उतकर्मक्षय: तत्रननावत् पुण्यबंध: परेषामन्तरायकरणात्तेहि परे यदिभवतानव्यापाद्येरंस्ततस्तेपराम् सत्वान् व्यापाद्यपुण्यमुपार्जयेयुर्व्यापादिनाश्च परवधे अशक्तादूति व्यापादनं पुण्योपार्जनांतरायकरणं नच पुण्योपार्जनांतरायकृत् पुण्यमुपार्जयति विरोधात्सर्वस्य पुण्यबंधप्रसक्तेश्च एतेन यदुक्तं परिणामसुंदरं दु:खितसत्वानांव्यापादनमिति तदसिद्धं द्रष्टव्यं पुण्योपार्जनांतरायकरणेन परिणामसुंदरत्वायोगात् अथ कर्मक्षयइति पक्ष: ननु तत्कर्मकिं सहेतुकमुताहेतुकं सहेतुकमपि किमज्ञानहेतुकमुत हिंसाजन्यमुताहोवधजन्यं तत्र न तावदज्ञानहेतुकमज्ञानहेतुकतायां हिंसातोनिवृत्त्यसंभवात् यो हि यन्निमित्तोदोष: सतत्प्रतिपक्षसेवायां निवर्त्तते यथाहिमज्जनितं शीतमनलासेवनेन आज्ञानस्य हिंसाप्रतिपक्षभूता किंतुसम्यग्ज्ञानं तत्कथमज्ञानहेतुककर्महिंसातोविनिवर्त्तते अथाहिंसाजन्यमितिवदेत् तदपि न युक्तमेवं सतिमुक्तानामपि कर्मबंधप्रसक्तेस्तेषामहिंसकत्वात् अथ हिंसाजन्यमेवं तर्हि कथं हिंसात: एवतस्य निवृत्तिर्नहियत एवयस्य प्रादुर्भावस्ततएव तस्य निवृत्तिर्भवितुमर्हतिविरोधात् न खलुजीर्णप्रभवोरोगोमुहुरजीर्णकरणाद्धि

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



निवर्त्तते ततः प्राणिहिंसोत्पादितकर्म्म निवृत्त्यर्थमवश्यमहिंसासेवनीय उक्तं च तम्हापाणिवहोवज्जियव्वो कम्मस्स खवणहेउ उवहविरई कायवासंवरूव त्तिनियमेण अथाहेतुकं न तद्धितदस्ति खरविषाणवत् तत्कथं तदपगमाय प्राणिवधोद्यमो भवतः अथाहेतुकमप्यस्ति यथाकाशतद्योकाशस्ते वतस्यापिन कथंचन विनाशदृत्यफलत्वान्नकार्यप्राणिवधः यदप्युक्तं ये तु प्रागुपात्तपुण्यकर्मवशतः सुखासिकामनुभवन्तोवतिष्ठंते न ते व्यापादनीया इति तदप्ययुक्तं यतः पुण्यपापक्षयान् मुक्तिस्ततो यथापरेषां पापक्षपणाय व्यापादनेभवतः प्रवृत्तिस्तथा पुण्यक्षपणायापि भवतु अथ पापदुःखानुभवफलं ततो व्यापादनेन दुःखोत्पादनतः पापं क्षपयितुं शक्यं पुण्यं वासातानुभवफलं ततस्तत्कथं दुःखोत्पादनेन क्षपयितुं शक्यं सातानुभवफलं हि कर्मसातानुभवोत्पादनेनैव क्षप यितुं शक्यं नान्यथा तदपि न समीचीनं यतोयत् पुण्यं विशिष्टदेव भववेदनीयं तन्मनुष्यादिभवव्यापादनेन प्रत्यासन्नीक्रियते प्रत्यासन्नीकृतं च प्रायःस्वल्प कालवेद्यं भवति ततएवं पुण्यक्षपणस्यापि संभवात्कथं न व्यापादनेन पुण्यपरिक्षयः अथ व्यापादनानन्तरं विशिष्टदेव भववेदनीयः पुण्योदयः संदिग्धः कस्यचित् पापोदयस्यापि संभवात् ततोनव्यापादनं पुण्यमनुभवतः कर्तुमुचितं यद्येवमितरत्नकथं निश्चयः इतरत्रापिहि संदेहएव तथाविधदुःखितोपियदि मार्यते तर्हिनरकदुःखानुभवभागी भवति अमारितस्य सन् कदाचनापि प्रभूतसत्वव्यापादनेन पुण्यमुपार्ज्य विशिष्टदेवादिभवसुखभागीभवेत् ततो दुःखिता नामपि व्यापादनं न भवतोयुक्तमेवं च सति संदिग्धामैकोपि हेतुर्व्यापादनस्य परिणामसुंदरत्वसंदेहात् यदप्युक्तं दुष्प्राप्यसिद्धांतानुगतं नारकस्वरूपोदर्शकं वचइत्यादि तदप्यसमीचिताभिधानं सम्यगस्मत्सिद्धांतापरिज्ञानात् अस्मत्सिद्धांतेह्येवं नारकस्वरूपव्यावर्णनानारकाणां परमाधार्मिकसुरोदीरितदुःखानां परस्परोदीरितदुःखानां वावेदनातिशयभावतः संमोहमुपागतानां मातीवपरवसंक्लेशो यथात्रैव केषांचित् मानवानां संमूढानां तथाहि मानवालकुटा दिप्रहारजर्जरीकृतशिरः प्रभृत्यवयवावेदनातिशयभावतः संमूढचेतनानातीव परवसंक्लिश्यमाना उपलभ्यन्ते तथानारका अपि सदैव द्रष्टव्याः ततस्तथा

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



विधतीव्रसंक्लेशाभावान्नारकाणां नाभिनवप्रभूततरपापोपचय: यद्येवं तर्हि समोहोमहोपकारी तथाहि सम्मोहवशान्नपरत्रातीव संक्लेशस्तीव्रवेदनाभाव तश्च प्राग्बद्धपापकर्मपरिक्षय: संमोहश्च हिंस्रव्यापारादुपजायते ततोहिंसकामहोपकारीण इति सिद्धमस्मत्समीहितं तदयुक्तं हिंसकानां परपीडोत्पादनत: क्लिष्टकर्मबंधप्रसक्त: न खलु पापस्य परपीडामतिरिच्यान्यन्निबंधनमीक्षामहे यदिस्यात्तर्हिमुक्तानामपि पापबन्धप्रसंगस्तेषामहिंसकत्वात्तत: कथमिवसचे तनो मनसापिपरं व्यापादयितुमुत्सहे इत्यलंपापचेताभि:सहप्रसंगेन तथाजयति जगत्पितामह इति ग्रंथाग्रंथ ५३७ इहजगच्छब्देन सकलसत्वपरिग्रहा ततश्च जगतां सकलसत्वानां नरकादिकुगतिविनिपातभयापायरक्षणात्पितेव पितासम्यग्दर्शनमूलोत्तरगुणसंहतिस्वरूपो धर्म्म: स हि दुर्गतौ प्रपततो जंतून् रक्षतिशुभेच नि:श्रेयसादौ स्थाने स्थापयति तथाचोक्तं निरुक्तशास्त्रवेदिभि: दुर्गतिप्रसृतान् जंतून्यस्माद्धारयतेत: धत्तेचैतान् शुभेस्थाने तस्माद्धर्म इतिस्मृत: तत: सकलस्यापि प्राणिगणस्य पितृतुल्य: तस्यापि च भगवान् अर्थतस्तेन प्रणीतत्वात् ततो भगवान् जगत्पितामह: जयतीति पुन: क्रिया भिधानंस्तवाधिकाराददुष्टं उक्तंच सज्झायज्झाणतवओ सहेसुउवए सथुइपयाणेसु संतगुणकित्तणेसु यनहोंतिपुणरुत्तदोसाउ १ अनेनापि परार्थसंपद माह भगवानिति भग: समग्रैश्वर्यादिलक्षण: आहच ऐश्वर्यस्य समग्रस्यरूपस्य यशस: श्रिय: धर्मस्याथप्रयत्नस्य षण्णांभगइतींगना२ भगोऽस्यास्तीति भगवान् अनेन स्वपरार्थसंपदमाह स्वपरोपकारित्वादैश्वर्यादे: स देवमनादिमंतोनंता स्तीर्थकृत इति ज्ञापनार्थं सामान्यतस्तीर्थकृन्नमस्कारमभिधाय सांप्रतं

सूत्र

## भयवं १ जयइ सुयाणं पभवो तित्थयराणं अपच्छिमो जयइ जयइ गुरुलोगाणं जयइ महप्पामहावीरो२ भद्दं जगु

भाषा

ज०जयवंताप्रवर्त्तो जयहोज्योतेहनो जिणे विषयकषायरूप असुचिके तेहनेटालवेकरी सदापवित्रछे ज्ञानेकरीप० मोटीप्रभा छे जेहनोतथासु० स्रुतसिद्धांत

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



सकल सांसारिकदुःखातंकसमुच्छेदा प्रतिहतशक्तिपरमौषध कल्पप्रवचन प्रतिपादकतया सत्त्वोपकारित्वाद्वर्त्तमानतीर्थाधिपते र्भगवद्वर्द्धमानस्वामि नो नमस्कारमभिधित्सुराह जयइत्यादि जयतीति पूर्ववत् श्रुतानां स्वदर्शनपरदर्शनानुगतसकलशास्त्राणां प्रभवंति सर्वाणि शास्त्राण्यस्मादिति प्रभवः प्रथमं उत्पत्तिकारणं तदुपदिष्टमर्थमुपजीव्य सर्वेषां शास्त्राणां प्रवर्त्तनात् परदर्शनशास्त्रे ष्वपि हि यः कश्चित्समीचीनोऽर्थः संसारासारता स्वर्गापवर्गादि हेतुः प्राणातिपातादिरूपः सभगवत्प्रणीतशास्त्रेभ्य एव समुद्धृतोवेदितव्यो न खल्व तीन्द्रियार्थपरिज्ञानमंतरेणातींद्रियः प्रमाणाऽबाधितोऽर्थः पुरुष मात्रे णोपदेष्टुं शक्यते अविषयत्वात् न चातींद्रियार्थपरिज्ञानं परतीर्थकानामस्तीत्येतदग्रेवक्ष्यामः ततस्ते भगवत्प्रणीत शास्त्रेभ्यो मौलं समीचीनमर्थ लेशमुपादाय पश्चादभिनिवेशवशतः स्वस्वमत्यनुसारेणतास्ताः स्वस्वप्रक्रियाः प्रपंचितवंतः उक्तं च स्तुतिकारेण सुनिश्चितंनः परतंत्रयुक्तिषु स्फुरंति याः काश्चनसूक्तिसंपदः तवैवताः पूर्वमहार्णवोत्थिताजगुः प्रमाणं जिनवाक्यविप्रुषः १ शाकटयनोपियपचापनाय यतिग्रामाग्रणीः स्वोपज्ञशब्दानुशासनवृत्तावादौ भगवतः स्तुतिमेवमाह श्रीवीरममृतं ज्योतिर्नत्वादि सर्ववेदसां अत्र च न्यासकृताव्याख्या सर्ववेदसां सर्वज्ञानानां स्वपरदर्शनसंबंधि सकलशास्त्रानुगत परिज्ञानानामादि प्रभवंप्रथममुत्पत्तिकारणमिति अतएव चेहश्रुतानामित्यत्र बहुवचनमन्यथैक वचनमेव प्रयुज्यते प्रायः श्रुतशब्दस्य केवल द्वादशांगमात्र वाचिनः सर्वत्रापि सिद्धांतेएकवचनांततया प्रयोग दर्शनात् सर्वश्रुतकारणत्वेन भगवतः स्तुतिप्रतिपादने इदमप्यावेदितं द्रष्टव्यं सर्वाण्यपि श्रुतानि पौरुषे

भाषा नोप० मोटोउत्पतिस्थानकछे ति०धर्मतिर्थनाथापणाहार एहवाउत्तमगुणाकरीने पूजितछे तेर४तीर्थंकरामेविशेष० श्रमणभगवंत श्रीमहावीरदेवचरमछे हलोतेहनीजयहोज्यो सर्वदाकालेवली ज०जयहोज्योगु०लोकतेसाधसाधवी श्रावकश्राविकादि कतीनलोकनागु० गुरुतेसर्वनाहितभणी धर्म नाकहणहा रछे तेहनोज०जयहोज्योम० जेकर्मंरुपसत्रुनेजीपवे करीतेहनोम०मोटोज्ञानअप्पा आत्माछेतयामहा०घोरपरिसहनासहणहार जीपणहारछे तेभणीमो

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



याख्येवम किमप्यपौरुषेयमस्ति असंभवात् तथाहि शास्त्रं वचनात्मकं वचनंच तात्वोष्टपुटपरिस्पंदादिरूप पुरुषव्यापारान्वया व्यतिरेकानुविधायिततस्तद
भावे कथं भवतिन खलु पुरुषव्यापारमंतरेण वचनमाकाशेध्वनदुपलभ्यते अपिच तदपौरुषेयं वचनमकारणत्वान्नित्यमभ्युपगम्यते सदकारणवन्नित्यमिति
वचनप्रमाण्यात् ततस्तत्रविकल्पयुगलमवतीर्यते तदपौरुषेयंवच: किंमुपलभ्यस्व भावमुतानुपलभ्यस्वभाव तत्र यद्यनुपलभ्यस्वभाव तर्हितस्य नित्यत्वेनाभ्युप
गमात्कदाचिदपि स्वभावाप्रच्युते: सर्वदैवोपलंभाभावप्रसंग: अथोपलंभस्वभावं तर्हिसर्वदानुपरमेमोपलभ्येत अन्यथा तत्स्वभावताहानिप्रसंगात् अथोपल
भ्य स्वभावमपि सहकारिप्रत्यय मपेक्ष्योपलंभमुप जनयतितेन न सर्वदोपलंभप्रसंगस्तदयुक्तमेकां नानित्यस्य सहकार्यपेक्षाया अयोगात् ततोविशेष प्रतिलंभ
लक्षणाहितस्य तत्रोपेक्षायदाह धर्म्मकीर्त्तिरपेक्षाया विशेष प्रतिलंभ लक्षणत्वादिति नच नित्यस्य विशेषप्रतिलंभोस्ति अनित्यत्वापत्ति: तथाहि सविशेष
प्रतिलंभस्तात्वात्मभूतस्ततो विशेष जायमाने सएव पदार्थस्तेन रूपेण जातोभवति प्राक्तनंत्वविशिष्टावस्था लक्षणंरूप विनिष्टमित्यनित्यत्वापत्ति: अथोच्येत
सविषेष प्रतिलंभोनतस्यात्मभूत: किंतुव्यतिरिक्ततत् कथमनित्यत्वापत्ति: यद्येवंतर्हिकथंसतस्य सहकारीनहि तेन सहकारिणा तस्य वचनस्यकिमप्युपक्रि
यते भिन्नविशेषकरणात् अथभिन्नोपि विशेषस्तस्यसंबंधीतेन तत्संबंध विशेष करणात्तस्यास्युपकारो द्रष्टव्यइति सहकारीव्यपदिश्यते ननुविशेषेणापि
सह तस्य वचनस्यक: संबंधोनतावत्तादात्म्यं भिन्नत्वेनाभ्युपगमात् नापि तदुत्पत्तिर्विकल्पद्वयानतिक्रमात्तथाहि किंवचनेन विशेषोजन्यते उतविशेषेण
वचनं तत्रन तावदाद्य:पेक्षा विशेषस्य सहकारिणोभावात् नापिद्वितीयोवचनस्यनित्यया कर्त्तुमशक्यत्वात् अथमाभूद्वचन विशेषयोर्जन्य जनकभाव आधारा
धेयभावो भविष्यति तदप्यसमीचीनाधाराधेय भावस्यापि परोपकार्योपकारक भावापेक्षत्वात् तथाहि बदरंपतन धर्मकं सत्कुंडेनस्थानंतर देशस्थायि तथा
परिणामिजन्यते ततस्तयोराधाराधेयभाव उपपद्यते वचनेनतु नविशेषोजन्यते तस्यान्यतोभावात्तत: कथमनयोराधाराधेयभाव: अथ तेन विशेषेणवचनस्यो

For Private and Personal Use Only

प्रकार: कश्चित् क्रियते ततः स्तस्य संबंधीनमुस उपकारस्ततो भिन्नाभिन्नोवेत्यादितदेवावर्त्तते इत्यनवस्था अपिचकुतःप्रमाणाद्वचनस्था पौरुषेयत्वाभ्युपगमः
कर्त्तुर स्मरणादिति चेन्नतस्था सिद्धत्वात्तथाहि स्मरंति जिनप्रणीतागम तत्त्ववेदिनो वेदस्यकर्त्तृनपि प्रवादप्रभातन सकर्तृस्मरणवादस्तेषां मिथ्यारूप
इतिचेत् कद्दानोमे वंसतिपौरुषेयः सर्वस्याप्यपौरुषेयत्वप्रसक्ते स्तथाहि कालिदासादयोपि कुमार संभवादिष्वात्मनमन्यंवा प्रणेतार मुपदिशंत एवं
प्रतिहंतुंशक्यंते मिथ्यात्वमात्मन मन्यंवा कुमार संभवादिषु प्रणेतार मुपदिशतीति ततः कुमार संभवादयोपि ग्रंथाः सर्वेप्यपौरुषेया भवेयुस्तथाचकः
प्रति विशेषो वेदेयेन स एव प्रमाणतयाभ्युपगम्य तेन शेषागमाः अपिच यौष्माकीणैरपि पूर्वमहर्षभिः सकर्तृत्वं वेदस्याभ्युप गतमेव तथाचतद्ग्रंथः
ऋग्गिराद्वचस्यकुः सामानि सामगिराविति अथ तत्र करोतिः स्मरणे वर्त्तते न निष्पादने इष्टश्च करोतिरर्थांतरेपि वर्त्तमानो यथासंस्कारः तथाच
ल.कोवकारः पृष्टमे कुरुपादौ मेकुर्विं ति अलङि संस्कारे एव करोति वर्त्ततेना पूर्वनिवर्त्तनं संभवत्य शाक्यक्रियत्त्वात्ततोऽन्यथा नुपपत्त्यासंस्कारे एव
करोतिर्वर्त्तते वेदविषयेतु नान्यथानुपपन्यत्वं किमपि निबंधनमस्ति ततः कथं तत्रस्मरण वर्त्तयितुं शक्यते स्यादेतद्यदि वेदविषये करोति स्मरणेन
वर्त्त्येत तर्हि वेदस्य प्रमाण्यं नस्यादथच प्रमाण्यमभ्युपगम्यते तच्चा पौरुषेयत्वा देवान्यथा सर्वागमानामपि प्रामाण्यप्रसक्तेः ततोऽत्रापि करोति प्रमाण्या
न्यथानुपपत्त्या स्मरणेवर्त्त्यते इति तदेतदसत् इतरेतराश्रयदोष प्रसंगात् तथाहि प्रमाण्ये सिद्धेसति तदन्यथानुपपत्त्याकरोतेः स्मरणे वर्त्तनं करोते स्मरणे
वृत्तौचापौरुषेयत्वसिद्धितः प्रामाण्यमित्येका सिद्धावन्यतरासिद्धिः अनैकांतिकं च कर्त्तुरस्मरणं वटेवटे वैश्रमण इत्यादि शब्दानां पौरुषेयाणामपि कर्त्तुर
स्मृतेः यत्नवान् तत्कर्त्तारमुपलभ्यते एवेतिचेत् नावश्यंतदुपलंभसंभवनियमा भावात् किंवा पौरुषेयत्वेनाभ्युपगतस्य वेदस्य कर्त्तानैवास्ति कश्चित्पौरुषेयत्वेना
भ्युपगतस्य वटेवटे वैश्रवण इत्यादिरस्तीति न प्रमाणात्कुतश्चिद्विनिश्चयः किंतु परोपदेशात् सवभवतो न प्रमाणं परस्य रागादि परीतत्वेन यथावस्तु



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



तत्वार्थापरिज्ञानात् ततः कर्तृभाव संदेह इति संदिग्ध सिद्धोप्ययं हेतुः एतेन यदन्यदपि साधनम वादीद्दवादी वेदाध्ययनं सर्वं गुर्वध्ययन पूर्वकं वेदाध्ययन त्वादधुनातन वेदाध्ययनवदिति तदपि निरस्तमवसेयं पौरुषेयत्व साधने सर्वस्यापि पौरुषेयत्व प्रसक्तेस्तथाहि कुमार संभवोध्ययनं सर्वं गुर्वध्ययनपूर्वकं कुमार संभवाध्ययनत्वादिदानींतन कुमारसंभवाध्ययनवदिति कुमार संभवादीनामध्ययनादिता सिद्धेरपौरुषेयं दुर्निवारं न च तेषाम पौरुषेयत्वं स्वयं करणपूर्वकत्वेनापि तदध्ययन स्वभावादेवं वेदाध्ययनमपि किंचित्स्वयं करण पूर्वकमपिभविष्यतीति वेदाध्ययनत्वादिति व्यभिचारी हेतुः स्यादेतद्वेदाध्ययनं स्वयं करण पूर्वकं न भवति वेदानां स्वयं कर्त्तुमशक्तेः तथाचात्रप्रयोगः पूर्वेषां वेदरचनायामशक्तिः पुरुषत्वादिदानींतन पुरुषवदिति तदप्ययुक्तमत्रापि हेतो र्व्यभिचारात् तथाहि भारतादिष्विदानींतन पुरुषानामशक्ता अपि कस्यचित्पुरुषस्य व्यासादेःशक्तिः श्रूयते एवं वेदविषयेपि संप्रति पुरुषाणां कर्त्तुमशक्ता अपि कस्य चित्प्राक्तनस्य पुरुष विशेषस्य शक्तिर्भविष्यतीति अपिच यथाग्नि सामन्यज्वालाप्रभवत्वमरणि निर्मथन प्रभवत्वंच परस्परमबाध्यबाधकत्वान्नविरुध्यते कोप्यत्र विरोधोग्निस्य स्यात्कदाचिदरणिनिर्मथनपूर्वकः कदाचित् ज्वालान्तरपूर्वकश्च ततो यथाद्योपि पथिकस्ततोग्नि ज्वालान्तरपूर्वको नारणिनिर्मथन पूर्वकः पथिकाग्नित्वादाद्यानंतराग्निवदित्ययं हेतुर्व्यभिचारी विपक्षे वृत्तिसम्भवात्तथा वेदाध्ययनमपि विपक्षे वृत्तिसम्भवाद्व्यभिचारि च तथाहि वेदाध्ययने स्वयं करणपूर्वकत्वमध्ययनान्तर पूर्वकत्वं च परस्परमबाध्यबाधकत्वादविरुद्धं ततश्च वेदाध्ययनमपि स्यात्किंचित्स्वयं करणपूर्वकमपीति यदा त्वेवं विशेष्यते यस्तु तथाविधः स्वयं कृत्वाध्येतुमसमर्थस्तस्य वेदाध्ययनमध्ययनान्तरपूर्वकमिति तदा न कश्चिद्दोषः यथा यादृशोऽग्नि र्ज्वालाप्रभवो दृष्टस्तादृशः सर्वोपि ज्वालाप्रभवइति अस्तु वा सर्वं वेदाध्ययनमध्ययनान्तरपूर्वकं तथाप्येवमनादिता सिद्धेर्वेदस्य नापौरुषेयत्वं यथातएवानादितामात्रादपौरुषेयत्वसिद्धिरिष्यते तर्हि डिम्भकपांशु क्रीडादेरपि पुरुषव्यवहारस्यापौरुषेयत्वापत्तिस्तस्यापि पूर्वपूर्वदर्शनप्रवृत्तित्वेनानादित्वात् अपिच स्युरपौरुषेयावेदा यदि पुरुषामादिः

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



स्याद् दाध्ययनं धानादि तदप्यादा पुरुषस्याध्ययनान्तरपूर्वकं न सिध्यति अध्यापयितुरभावात् नच पुरुषस्य ताल्वादिकरणग्रामाव्यापाराभावात् स्वयं शब्दा ध्वनंति ततो वेदस्य प्रथमोध्येता कर्त्तैववेदितव्य: अपि च यद्दस्तु यद्धेतुकमन्वयव्यतिरेकाभ्यां प्रसिद्धं तज्जातीयमन्यदप्यदृष्टहेतुकं ततो हेतोर्भवतीति सम्प्रतीयते यथेन्धनादेको वह्निर्दृष्टस्ततसमानस्वभावोऽपरोप्यदृष्टहेतुक: तत्समानहेतुक: सम्प्रतीयते लौकिकेन च शब्देन समानधर्मा सर्वोपि वैदिक: शब्दराशिस्ततो लौकिकवद्वैदिकोपि शब्दराशि: पौरुषेय: संप्रतीयतां स्यादेतद्वैदिके तु शब्देषु यद्यपि न पुरुषो हेतुस्तथापि पौरुषेयाभिमतशब्दसमानाविशिष्ट पदवाक्यरचना भविष्यति तत: कथं तत्समानधर्मतामवलोक्य पुरुषहेतुकता तेषामनुमीयते तदेतद्बालिशजल्पितं पदवाक्यरचना हि यदि हेतुमन्तरेणापी ष्यते तत आकस्मिकी सा भवेत् ततश्चाकाशादावपि सा सर्वत्र सम्भवेत् अहेतुकस्य देशादिनि यमा योगात् न च सा सर्वत्रापि सम्भवति तस्मात्पुरुषएव तस्या हेतुरित्येव वश्यं प्रतिपत्तव्यं अन्यच्च पुरुषस्य रागादिपरीतत्वेन यथावस्तु परिज्ञानाभावात्तत्प्रणीतं वाक्यमयथार्थमपि सम्भाव्यते इति संशयहेतु: पुरुषो कीर्णः स च संशयो पौरुषेयत्वाभ्युपगमेपि वेदवाक्यानांतदवस्थएव तथा हि स्वयं तावत्पुरुषो वेदस्यार्थं नावबुध्यते रागादिपरीतत्वात् नाप्यन्यत: पुरुषान्तरात्तस्यापि रागादिपरीतत्वेन यथा तत्त्वमपरिज्ञानादथ जैमिनिश्चिरतरपूर्वकालभावी पटुप्रज्ञ: सम्यक्वेदार्थस्य परिज्ञाता सा तत: परिज्ञानमभ दिति नहि सर्वेपि पुरुषा: समान प्रज्ञा मेधादिगुणा इति वक्तु शक्यं सम्प्रत्यपि प्रतिपुरुषं प्रज्ञादेस्तारतम्यस्य दर्शनात् ननु सज्जैमनि: पुरुषो वेदस्यार्थं यथावस्थितमवगच्छतिस्मे ति कुतो निश्चय: प्रमाणेन सम्वादादितिचेत् तत्रतीन्द्रियेष्वर्थेषु न प्रमाणस्यावतारो यथाग्निहोत्र हवनस्य स्वर्गसाधनत्वे यद्दवस्था तीन्द्रिया अर्थावेदिष्यावर्ण्यन्ते तत्कथंतत्र सम्वाद अथ येष्वर्थेष्वस्मादृशां प्रमाणसम्भवस्तद्विषये प्रमाणसंवाददर्शनादतीन्द्रियाणामप्यर्थानां स सम्यक् परिज्ञाताभ्युपगम्यते तदयुक्तं रागादिकलुषिततया तस्यातीन्द्रियार्थपरिज्ञानासम्भवादन्यथा सर्वेषामप्यतीन्द्रियार्थ प्रदर्शित्व प्रसक्तिस्ततसात्क तातीन्द्रियार्थव्याख्या

For Private and Personal Use Only

मिथिच्च अपिचागमोऽर्थत: परिज्ञातः सन् प्रेक्षावतामुपयोगविषयो भवति नापरिज्ञातार्थशब्दोपलम्भमात्रं ततोऽर्थ: प्रधान सचेत्पुरुषप्रणीत: किं शब्दमात्रस्या
पौरुषेयत्वपरिकल्पनेन निरर्थकत्वात् तत्राप्यतोपि वेदार्थस्य सम्यगवगम: नापिवेद: स्वकीयमर्थमुपदेशमन्तरेण स्वयमेव साक्षादुपदर्शयति ततो वेदस्येष्टार्थ
प्रतिपत्त्युपायाभावादग्निहोत्रं जुहुयात् स्वर्गकामइति श्रुतौ यथावेदप्रामाणिकैरयमर्थ: परिकल्प्यते घृताद्याहुतिं प्रक्षिपेत् स्वर्गकाम इति तथा यमप्यर्थ
स्तै: किं न कल्पते खादेत्श्वमांसं स्वर्गकामइतिनियामकाभावाद्युक्तंच स्वयं रागादिमान्नार्थं वेत्तिवेदस्य नान्यत: नवेदयति वेदोपि वेदार्थस्य कुतो गति? त
तोऽग्निहोत्रं जुहुयात्स्वर्गकामइति श्रुतौखादेत्श्वमांसमित्येषनार्थ इत्यत्रकाप्रमाणमथयएवशाब्दो व्यवहारोलोकेप्रसिद्ध: सएववेदवाक्यार्थनिश्चय निबंधनन
च लोकेग्निहोत्र शब्दस्य श्वमांसंवाच्यं नापिजुहुयादित्यस्य भक्षणंतत्कथमयमर्थ: परिकल्प्यते तदयुक्तं नानार्थाहि लोकशब्दारूढायथागोशब्द: अपि च
सर्वेशब्दा: प्राय: सर्वार्थानांवाचका: देशादिभेदतोद्रुत विलंबितादिभेदे न तथाप्रतीतिदर्शनात्तथाहिद्रविडस्यार्यदेश मुपगतस्य मारिशब्दात् झटितिवर्ष
विषयाप्रतीतिरूपजायते विलम्बितावोपसर्ग विषयाचार्य देशोत्पन्नस्य द्रविडदेशमुपगतस्य शीघ्रमुपसर्ग विषयाप्रतीतिर्विलंबितावर्ष विषयाएवमनयादिशा
सर्वदिशा सर्वेषामपि शब्दानां सर्वार्थवाचकत्वं परिभावनीयं नचवाच्यमेवंसति घटशब्दमात्र श्रवणा दखिलार्थप्रतीति प्रसंगोयथाक्षयोपशममवबोधप्रवृत्त:
क्षयोपशमश्चसंकेताद्यपेक्ष इति तदभावेनभवति ततोऽग्निहोत्रादि शब्दस्य श्वमांसादिवाचकत्वे प्यविरोधइति लौकिकशाब्दस्य व्यवहाराच्च सर्वोपिनवेदिक
वाक्यानामभिलषितनियतार्थप्रतिपत्ति: किंचलौकिक प्रसिद्धेनैवशाब्देन व्यवहारेणवयं वेदवाक्यानां प्रतिनियतमर्थं निश्चेतुमुद्यता: लौकिकश्चशाब्द व्यवहा
रानैकधा परिणममानोदृष्ट: संकेतवशत: प्राय: सर्वेषामपिशब्दानां सर्वार्थप्रतिपादनशक्ति संभवात् ततोलौकिके नैवशाब्देन व्यवहारेणास्माकमाशंकोदयादि
कोनार्थ: स्यात्किंघृताद्याहुतिंप्रक्षिपेत् स्वर्गकामइति उताहोश्वमांसंखादेदिति तत्कथंततएवनिश्चय: कर्तुं बुध्यते नह्येयोयत्रसंशयहेतु: स तत्रनिश्चयमुत्पाद

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



यितुं यत्न इति अपिचनैकांते न वेदे लौकिकशब्द व्यवहारानुसरणं स्वर्गोर्वश्यादि शब्दानामरूढार्थानामपि तत्र व्याख्यानात् यथा स्वर्गः सुखविशेषः उर्वशी चरणिरिति तथा शब्दांतरेष्वप्यरूढार्थं कल्पना किं न संभविनी उक्तं च स्वर्गोर्वश्यादिशब्दस्य दृष्टो रूढार्थवाचकः शब्दांतरेषु तादृक्षु तादृश्येवास्तु कल्पना स्यादे तदग्निहोत्रादिवाक्यस्य श्वमांसभक्षणप्रसंगो न युक्तो वेदेनैवान्यत्र तस्यान्यथा व्याख्यानात्तदयुक्तं तत्रापि व्याख्यार्थस्य निर्णयाभावात् यथोक्तं प्राक् न हि अप्रसि द्धार्थस्य वाक्यस्य अप्रसिद्धार्थमेव वाक्यांतरं नियतार्थं प्रसाधनायलं तुल्यदोषत्वात् अथेष्टमाचक्षाणायतार्थेन काचित्प्रमाणबाधा सोऽर्थो ग्राह्यो न चाग्निहो त्रादिवाक्यस्य घृताहुति प्रक्षेपरूपेऽर्थे प्रमाणबाधामुत्पश्यामस्तत्कथं तमर्थं न गृह्णीमः तदेतत् श्वमांसभक्षणलक्षणेऽप्यर्थे समानं न हि तत्रापि काचित्प्रमाण बाधामीक्षामहे अपि च यदि प्रमाणबलात् प्रवृत्तिमीहसे तर्हि पौरुषेयमेव वचस्त्वयोपादेयमस्यक् लोक प्रतीत्यनुसारितया संप्रदायतोऽधिगतार्थतया च प्रायो युक्तिविषयत्वान्नापौरुषेयं विपरीततया तत्र युक्तेरसंभवात् तथा हि कात्र युक्तिर्यया श्वमांस भक्षणात् स्वर्गप्राप्तिर्बाध्यते न घृताद्याहुति प्रक्षेपादिति घृताद्याहुति प्रक्षेपादीनां स्वर्गप्रापणादिशक्तेरतींद्रियत्वेन प्रत्यक्षाद्यगोचरत्वात्संप्रदायस्य चार्थे नियत्यकारिणोऽसंभवादेतच्चानंतरमेव वक्ष्यामः अथाग मार्थाश्रयायुक्ति श्वमांसभक्षणात् स्वर्गप्राप्ते र्बाधिका भविष्यति तदयुक्तमागमार्थं स्याद्याप्यनिश्चयादनिश्चितार्थस्य चाबाधकत्वायोगात् अथ संप्रदायादर्थनिश्चयो भविष्यति तथा हि प्रथमतो वेदे न जैमनयेस्वार्थ उपदर्शितः पश्चात्तेनान्यस्मा अभ्युपदिष्ट इति तदप्यसत् वेदस्य हि यदि स्वार्थोपदर्शनशक्तिस्ततोऽस्मभ्यमभि स्वार्थं किं नोपदर्शयति तस्माज्जैमनयेपि न ते न स्वार्थोपदर्शितः किंतु स्वयं सुखेनात्मानमेवार्थे नियमस्रष्टारमुपदर्शितवान् यथा कश्चित्केनचित् पृष्टः कोमार्गः पाटलिपुत्र स्य स प्राह एष स्थाणुर्ब्रुवमानो वक्ति अयं मार्गः पाटलिपुत्रस्य तत्र न स्थाणोर्वचनशक्तिः केवलस्थाणुसुखेन स एवात्मानं मार्गोपदेष्टारं कथयति एवं वेद स्यापि न स्वार्थोपदर्शनशक्तिः स्वतस्तन् सुखेन जैमनि रात्मानमेवार्थे नियमस्रष्टार मुपदर्शितवान् तत्र लौकिकशब्द व्यवहारानुसरणान्नापि युक्तेनापि

For Private and Personal Use Only

च संप्रदायाद्वेदस्यार्थे निश्चयो नापि तस्यापौरुषेयत्वसाधकं किमपि प्रमाणमित्थं संभवपौरुषेयं उक्तं च वांध्येयखरविषाण तुल्यमपौरुषेयमिति ननु यदि वांध्येय खरविषाणतुल्यमपौरुषेयं भवेत्तर्हि न वेदाववोधपौरुषेयतया शिष्टाः प्रतिगृह्णीयुरथच सर्वेष्वपि देशेषु शिष्टाः प्रतिगृह्णंतो दृश्यन्ते तस्मात्प्रभव्य पौरुषेय तदत्र पृच्छामः के शिष्टाः ननु किमत्र प्रष्टव्यं ये ब्राह्मणीयोनि सम्भविनो वेदोक्त विधिसंस्कृतावेद प्रणीताचार परिपालनैकनिषण्णचेतसस्ते शिष्टा तदेतदयुक्तं विचाराक्षमत्वात् तथाहि किमिदंनाम ब्राह्मणत्वं यद्योनिसम्भवाच्छिष्टत्वं भवेत् ब्रह्मणोऽपत्यं ब्राह्मणइति व्यपदिशन्ति पूर्वर्षयः न एवं सति चाण्डालस्यापि ब्राह्मणत्वप्रसक्तेः तस्यापि ब्रह्मतनोरुत्पन्नत्वात् उक्तं च ब्रह्मणोपत्यतामात्राद्ब्राह्मणत्वमिष्यते न कश्चिदब्रह्मतनोरुत्पन्नः क्वचिदिष्यते यदप्युक्तं वेदोक्तविधिसंस्कृतावेदप्रणीताचारपरिपालनैक निषण्णचेतसइति तदप्ययुक्तमितरेतराश्रयदोष प्रसङ्गात्तथाहि वेदस्य प्रामाण्ये सिद्धे सति तदुक्तविधिसंस्कृतास्तदर्थसमाचरणाच्छिष्टा भवेयुः शिष्टत्वे च तेषां सिद्धे सति तत्परिग्रहणोवेदप्रमाणमित्येकाभावे अन्यतरस्याप्यभावः स्याच्च शिष्टैः परिगृहीतत्वे त्वदन्योन्यसमाश्रयः वेदार्थाचरणात्शिष्टास्तदाचाराच्च सप्रमा १ स्यादेतद्भवतोपि तत्वतो पौरुषेयं वचनमिष्टमेव तथाहि सर्वोपि सर्वज्ञो वचनपूर्वकएवेष्यते तपश्चियाचरिष्णा इतिवचन प्रामाण्यात् ततोनादित्वात्सिद्धं वचनस्या पौरुषेयत्वमिति तदयुक्तमनादितायामप्य पौरुषेयत्वायोगात् तथाहि सर्वज्ञ परंपरोप्येषाऽनादिरिष्यते ततः पूर्वः पूर्वः सर्वज्ञः प्राक्तन सर्वज्ञप्रणीत वचनपूर्वकोभावान्नविरुद्ध्यते किंचवचनंद्विधा शब्दरूपमर्थरूपंच तत्र शब्दरूपवचनापेक्षया नायमस्माकंसंगरोयदुत सर्वोपिसर्वज्ञोवचनपूर्वकइति मरुदेव्यादीनां तदंतरेणापि सर्वज्ञत्वश्रुतेः किंत्वर्थरूपापेक्षयाततःकथंशब्दापौरुषेयत्वाभ्युपगमः नत्वर्थ परिज्ञानमपि शब्दमंतरेणनोपपद्यते तत्कथं मशब्दरूपापेक्षयापि संगरस्तदसच्छब्दमंतरेणापि शिष्टक्षयोपशमादि भावतोऽर्थ परिज्ञानस्य संभवात्तथाहि दृश्यते तथाविधक्षयोपशम भावतो मार्गानुसारि बुधैर्वचनमंतरेणापि तदर्थ प्रतिपत्तिरिति कृतप्रसंगेन प्रकृतं प्रस्तुमः तत्र सर्वज्ञस्तप्रभवाक्षप्रभादयोप्या

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



सीरभ्यते संप्रतिस्तोतुं प्रस्तुताइति तद्यवच्छेदार्थं विशेषणांतरमाह तीर्थंकराणाम पश्चिमोजयति तत्र जन्म जरा मरण सलिल संभृतं मिथ्यादर्शना
विरतिगंभीरं महाभीम कषायपातालं दुरवगाह महामोहावर्त्तभीषणं रागद्वेष पवन विक्षोभितंविविधानिष्टेष्ट संयोगवियोग घाचानिचय संकुलं उच्चै स्तर
मनोरथ सहस्रवेला कलितं संसारसागरं तरंतियेनतत्तार्थं तच्चसकल जीवाजीवादिपदार्थसार्थप्ररूपकं अत्यंतानवद्यं ऐषातीर्थांतरीयविख्यात चरणकरण
क्रियाधारं सकल त्रै लोक्यांतर्गत विशुद्धधर्म संपत् समन्वितं महापुरुषाश्रयम विसंवादि प्रवचनं तत्करणशीलास्तीर्थंकरा: तेषां तीर्थंकराणामस्मिन् भारते
वर्षेऽधिकृतायामवसर्प्पिण्यांनविद्यते पश्चिमोऽस्मादित्यपश्चिम: सर्वांतिम: पश्चिमइतिनोक्तमधिक्षेपरूप कत्वात्पश्चिमशब्दस्य ननु सर्वोपि प्रेक्षावान् फलार्थी
प्रवर्त्तते अन्यथाप्रेक्षा वत्ताक्षितिति प्रसंगात्ततोसौ तीर्थं कुर्वन्नवश्यं फलमपेक्षते फलंचापेक्षमाणो अस्मादृशइव व्यक्तमवीतराग: तदयुक्तं यतस्तीर्थंकरनाम
कर्म्मोदयसमन्वितो सनहि सर्वेपि भगवंतो वीतरागास्तीर्थं प्रवर्त्तनाय प्रवर्त्तंते तीर्थंकरनाम कर्मच तीर्थप्रवर्त्तनफलं ततो भगवान् तीर्थंकरेऽपि वीतरागो
पि तीर्थंकरनाम कर्म्मोदय तस्तीर्थं प्रवर्त्तनस्वभाव: सवितेव प्रकाशमुपकार्योपकारानपेक्ष तीर्थं प्रवर्त्तयतीतिन कश्चिद्दोष: उक्तंच तीर्थप्रवर्त्तनफलं यत्प्रोक्त
कर्म्म तीर्थंकरनाम तस्योदयात् कृतार्थोप्यर्हं तीर्थप्रवर्त्तयति तत् स्वभाव्यादेव प्रकाशयति भास्करो यथालोकं तीर्थप्रवर्त्तनाय प्रवर्त्तते तीर्थंकरएवं ननु
तीर्थप्रवर्त्तननाम प्रवचनार्थं प्रतिपादनं प्रवचनार्थंचेत् भगवान् प्रतिपादयति तर्हि नियमाद सर्व्वज्ञ: सर्व्वस्यापि वक्तुरसर्वज्ञतयोपलम्भात् तथाचात्र
प्रयोगऽविवक्षित: पुरुष: सर्वज्ञो न भवति वक्तृत्वाद्रथ्या पुरुषवदिति तदसत् सन्दिग्धव्यतिरेकतया हेतोरनैकांति कत्वात् तथाहि न वचनं सर्वेदनेन
सह विरुध्यते इतीन्द्रियेण सह विरोधा निश्चयात् द्विविधो हि विरोध: परस्परपरिहारलक्षण: सहानवस्थानलक्ष यत्र तत्र परस्पर परिहारलक्षण
स्तादात्म्य प्रतिषेधे यथा घटपटयो नं खलु घट: पटात्मको भवति नापि पटोघटात्मक: नसत्तासदतरमुपैतीति वचनात् ततो नयो: परस्परपरिहारलक्षणो

For Private and Personal Use Only

विरोध: एवं सर्वेषामपि वस्तूनां भावनीयमन्यथा वस्तु साङ्कर्यप्रसक्ते: यस्तु सहानवस्थान लक्षणो विरोध: स: परस्परं बाध्यबाधकभावसिद्धौ सिध्यति नान्य
था यथा वह्निशीतयो: तथाहि विवक्षिते प्रदेशे मन्दं मंदमभिज्वलितवति वह्नौ शीतस्यापि मंदं मंदं भावं यदा पुनरत्यर्थमभिज्वालाविमुचति वह्निस्तदा
सर्वथा शीतस्याभाव: इति भवत्यनयोर्विरोध: उक्तञ्च अविकलकारणमेकं तदपरभावे यदा भवन्न भवेत् भवति विरोध: सतयो: शीतहुताशात्मनोर्दृष्ट: १
नचैवं वचनसंवेदनयो: परस्परं बाध्यबाधकभावो नहि सम्वेदने तारतम्येनोत्कर्षमासादयति वचस्यितायास्तारतम्येनापकर्ष उपलभ्यते तत्कथमनयो सहा
नवस्थालक्षणो विरोध: अथ सर्ववेदीवक्ता नोपलब्ध इति विरोध उद्घोष्यते तदयुक्तमत्यन्तपरोक्षो हि भगवान् तत: कथमनुपलम्भमात्रेण तस्याभावनिश्चयो
अदृश्यविषयस्यानुपलम्भस्याभावनिश्चायकत्वायोगात् आहच प्रज्ञाकरगुप्त: बाध्यबाधकभाव: क: स्यातां यत् शुद्धि सम्विदौ तादृशानुपलब्धिश्चेदुच्यतां सैव
साधनं १ अनिश्चयकरं प्रोक्तमीहत्वानुपलंभनं नशत्यंन परोक्षेषु सदसत्ताविनिश्चयौ अथ वचनं विवक्षाधीनं विवक्षाच वक्तुकामता साच रागो रागादिमतश्च
सर्वज्ञ त्वाभावो वीतरागस्य सर्वज्ञत्वाभ्युपगमात् तत: कथमिव वक्तृत्वान्नासर्वज्ञत्वानुमानमिति तदसत् वक्तुकाममायारागत्वायोगादभिष्वङ्गलक्षणो हि
रागो नच भगवत: क्वाप्यभिष्वङ्ग: किमर्थं तर्हि देशनेतिचेत् ननूक्तंतीर्थंकरनामकर्मोदयात्अमूढलक्षो हिभगवान् ततो यत्कर्म यथावेद्यं तत्तथैवाभिष्वंगा
द्यभावेपि वेद्यते तथाचाद्यापि दृश्यन्ते परमौचित्यवेदिन: क्वचित्प्रयोजनेऽवश्यकर्त्तव्यतामवेत्याभिष्वंगाद्य भावेपि प्रवर्त्तमाना: तीर्थंकरनामकर्मच देशना
विधानेन वेद्यं तं च कहंवेइज्जइ अगिलाए धम्मदेसणाईहिं इति वचनात्ततो न कश्चिद्दोष: स्यादेतन्माभूत् रागादिकार्यतया वचनादसर्वज्ञतासिद्धि: रागा
दिसहचरितयानुभविष्यति तथाहि रागादिसहचरितं सदैव वचनमुपलभ्यते ततो वचनाद्रागादिप्रतीतावसर्वज्ञत्वसिद्धि: तदयुक्तं सहदर्शनमात्रस्यागमक
त्वादन्यथा क्वचिद्वक्तरि गौरत्वेन सहवचनमुपलब्धमिति गौरत्वाभावे कृष्णेवक्तरिन स्यात् अथच तत्राप्युपलभ्यते तन्न सहदर्शनमात्रं गमकं ततो विपक्षेव्याह

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



त्तिसंदेहाद्वक्तृत्वादिति संदिग्धानैकान्तिको हेतुः अथवा विरुद्धोपि विपक्षेण सह प्रतिबन्धनिश्चयात् तथाहि वचनं संवेदनादेवोपजायते अन्वयव्यतिरेकाभ्यां तथा निश्चयात् कथमन्वयव्यतिरेकौ प्रतीताविति चेत् उच्यते इह यथा२ संवेदनमुत्कर्षमासादयति तथा२ वचस्विता अप्युत्कर्षउपलभ्यते सर्वसंवेदनोत्कर्षाभावेव वचस्विताया अपकर्षोत्कर्षाणां स्वलभावितत्योपलम्भात् ततो यथादृष्टतारतम्येन गिरिनदीपूरस्य तारतम्यदर्शनात् सर्वोत्कृष्टपूरदर्शने सर्वोत्कृष्टानुमानं तथेहापि भगवतः सर्वोत्कृष्टवक्तृत्वदर्शनात् सर्वोत्कृष्टसंवेदनमनुमीयते अपरञ्चेह वचनं वितर्कविचारपुरस्सरतयोपलम्भात् वितर्कविचारौ च विकल्पात्मकौ विकल्पस्यास्पष्टप्रतिभासस्ततो भगवतोपि देशनां कुर्वतोऽस्पष्टप्रतिभासवैकल्पिकं ज्ञानं प्रसक्तं तच्च भ्रान्तमिति कथमभ्रान्तः सर्ववेदीतदसद्यतो वितर्कविचारावतरेणापि केवलज्ञानेन यथावस्थितं वस्तूपलभ्य भगवान् वचनं परावबोधाय प्रयुङ्क्ते यथा शब्दव्यवहारनिष्णातः प्रत्यक्षतः स्तंभमुपलभ्य स्तंभशब्दं न च तस्य तदा स्तम्भशब्दं प्रयुञ्जानस्य वितर्कविचारौ नापि तस्यास्पष्टप्रतिभासता तथा तद्वदेवं भगवतोपि द्रष्टव्यं उक्तं चान्यैरपि नचास्पष्टावभासित्वादेव शब्दः प्रवर्त्तते प्रत्यक्षदृष्टे स्तम्भादावपि शब्दप्रवर्त्तनात् अयं स्तम्भ इति प्राप्तमन्यथा स्यात्प्रवर्त्तनं नचास्पष्टावभासित्वमत्र ज्ञानस्य लक्ष्यते तथाऽन्यत्रापि शब्दानां प्रवृत्तिर्न विरुध्यते तदेवं यतो भगवान् सर्वश्रुतानां प्रभवः सर्वतीर्थकृतां चापश्चिमतीर्थंकरस्ततः सकलसत्वानां गुरुस्तथा चाह जयति गुरुर्लोकानामिति लोकानां सत्वानां गृणाति प्रवचनार्थमिति गुरुः प्रवचनार्थप्रतिपादक तथा पूज्य इत्यर्थः तथा जयति महात्मा महावीरः महान् अचिन्त्यशक्त्युपेत आत्मा स्वभावो यस्य स महात्मा शूरवीरविक्रान्तौ वीरयतिस्मेति वीरो विक्रान्तः महान् कषायोपसर्गपरीषहेन्द्रियादिशत्रुगणजयादतिशायी विक्रान्तो महावीरः अथवा ईरगति प्रेरणयोः विशेषेण ईरयति गमयति स्फेटयति कर्म प्रापयति वा शिवमिति वीरः अथवा ईरि गतौ विशेषेण अपुनर्भावेन ईर्त्ते स्म याति स्म शिवमिति वीरः महांश्चासौ वीरश्च महावीरः जयतीति पूर्ववद्भूयोऽस्याभिधानं च स्तवाधिकाराददुष्टं पुनरप्यस्यैव भगवतो महावीरस्या



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



तिशय द्वारेण स्तुतिमभिधित्सुराह भद्रमित्यादि भद्रंकल्याणं भवतु कस्य सर्वजगदुद्योतकस्य सर्वं समस्तं जगत् लोकालोकात्मकं उद्योतयति प्रकाशयति केवल ज्ञानदर्शनाभ्यामिति सर्वं जगदुद्योतकस्तस्य भद्रापुण्यक्षेम सुखहिताऽहितैराशिषीति विकल्पेन चतुर्थी विधानात् षष्ठ्यपि भवति यथा आयुष्यं देव दत्ताय आयुष्यं देवदत्तस्य अनेन ज्ञानातिशयमात्र ननु विशेषणंतदुपादीयते यत्र भवति संभवेव्यभिचारेच विशेषणमिति वचनात् नच सर्वजगदुद्योतकत्वं संभवति प्रमाणेनाग्रहणात् तथाहि सर्वजगदुद्योतकत्वं भगवतः किं प्रत्यक्षेण प्रतीयते उतानुमानेन आहोस्विदागमेन उताहोउपमानत अथवार्थापत्त्या

सूत्र

ज्जोयगस्स भद्दं जिणस्स वीरस्स भद्दं सुरासुरनमंसियस्सभद्दं धूयरयस्स ३ गुणभवणगहण सुयरयण भरियदंसणवि

भाषा

टावी०सुरवीरपुरुषसदाचा रीकताछेरभ० भद्रतेकल्याणहोज्योश्रीअनंत ज्ञानीनोस०तेजिणभगवंतेसर्वजगतमे सर्वलोकालोकनो स्वरुपज्ञानप्रकाशकरीउ० प्रकाश्योउद्योतकीधोभ० भद्रकल्याणहोज्योतेजि० जिणेजीतीछे आठकर्मनी १४ प्रकृतिघातीअघातीकसर्वतेम० मोटोवो० श्रीमहावीरतीर्थंकरेजीताछे भ०भद्रकल्याणहोज्योजेहनेसुरु संयमतपसीलआचारने आदरिवेकरीनेसु० वैमानिकजोतिषीअसु० भवनपतिवाणव्यं तरतेच्यार जातिनादेवता पूजनी कहवाछे एहवावीरपुरुषने नम० सर्वनमस्कारकरेछे जेहनेभ० भद्रकल्याणहो जेहनोधू० झाटकीछे क०आठकर्मरूपरीर० रजदूरकीधीछे जिणेकरी जी वरुपीउवस्त्रनिर्मलोकीधोछे तिणेइ एहपूर्वे महावीरस्वामीनो वर्णवकह्यो हिवे जेहनो स्वामी संघछेवे तेभणी अर्थांतरसंघवर्णवेछे गु० उत्तरगुण अविग्रहादिकभ० भवनते घरछे तेघररूप नगरमध्ये ग०तेहना समूहघणा कह्या तीर्थंकरे सु०वारे अंगरूपर० रत्नछेतिणेकरीने संघरूपनगरघणो भ०भर्यो दं०समकितरूपवि० असारमिथ्यात्वरूपकचरे करीने रहितनिर्मलो अथ हिवे द्वितीयार्थ कहेछे भ०भर्योछे संघरूपनगर जेसमकितरूपते भेदरूपवि०

For Private and Personal Use Only

तत्रन तावत्प्रत्यक्षेण भगवतश्चिरातीतत्वात् अपिच परविज्ञानं सदैव प्रत्यक्षा विषयोतींद्रियत्वात्ततस्तदा विपिन प्रत्यक्षेणाग्रहणं नाप्यनुमानेन तद्धि लिंग लिंगिसंबंध ग्रहणपुरस्सर मेव प्रवर्त्तते लिंगलिंगिसंबंध ग्रहणंच किं प्रत्यक्षेण उतानुमानेन तत्रन प्रत्यक्षेण सर्व वेदनस्यात्यंतपरोक्षतया प्रत्यक्षेण तस्मि न्नगृहीते तेन सहलिंगस्याविना भाव निश्चया योगात् नचानिश्चिताविनाभावंलिंग लिंगिनोगमकमतिप्रसंगात् यतः कुतश्चिद्यस्यतस्यवा प्रतिपत्तिप्रसक्तेः नाप्य नुमाने लिंगलिंगि संबंध ग्रहणम नवस्थाप्रसंगात् तथाहि तदप्यनुमान लिंगलिंगि संबंध ग्रहणतोभवेत् तत्रस्तत्रापि लिंगलिंगि संबंध ग्रहणमनुमानांतरा त्कार्त्स्न्यंतत्रापि चेयमेव वार्त्तेत्यनवस्थानाप्यगमतः सर्ववेदनविनिश्चयः सहिपौरुषेयोवास्यादपौरुषेयोवापौरुषेयोपि सर्वज्ञ कृतोरथ्यापुरुष कृतोवातत्रन ताव त्सर्वज्ञकृतः सर्वज्ञासिद्धे सर्वज्ञकृतत्वस्यैवाविनिश्चयात् अपिचैव मभ्युपगमेसती तरेतराश्रय दोषप्रसंगः तथाहि सर्वज्ञ सिद्धोततत्कृतागमसिद्धिः तत् कृतागम सिद्धौच सर्वज्ञसिद्धिः अथरथ्यापुरुष प्रणीतइतीति पक्षस्तर्हिन सप्रमाणमुन्मत्तक प्रणीतशास्त्रवत् अप्रमाणाच्च तस्मान्न सुनिश्चित सर्वज्ञसिद्धिरप्रमाणात् प्रमेयासिद्धेरन्यथा प्रमाणपर्येषणं विशीर्येत अथापौरुषेयइति पक्षस्तर्हि ऋषभः सर्वज्ञोवर्द्धमानस्वामी सर्वज्ञइत्यादिरर्थोवादः प्राप्नोति ऋषभाद्य भावेपि भावात् तथाहि सर्वकल्पस्थायी आगम ऋषभादयस्त्वधुनातन कल्पवर्त्तिनस्ततऋषभाद्य भावेपि पूर्वमप्यस्यागमस्यैव मेव भावात्कथमे तेषां ऋषभादीनामभि धानं तत्परमार्थं सतस्मादर्थवादएषनसर्वज्ञ प्रतिपादनमिति अपिच यद्यपौरुषेयागमाभ्युपगमस्तर्हि किमिदानीं सर्वज्ञेन आगमादेवधर्माधर्मादि व्यवस्था सिद्धेः तस्मान्नागमगम्यः सर्ववेदीनाप्युपमानगम्यः तस्यप्रत्यक्ष पूर्वकत्वात् तथाहि प्रत्यक्षसिद्ध गोपिंडस्य यथागौ स्तथागवयइत्यागमाहित संस्कारस्याट व्यां पर्यटतोगवय दर्शनानंतरं तन्नाम प्रतिपत्तिरुपमानं प्रमाणं वर्ण्यते न चैकोपि सर्वज्ञः प्रत्यक्षसिद्धो येन तत्सादृश्यावष्टंभेनान्यस्य विवक्षितपुरुषस्योप मानप्रमाणतः सर्वज्ञ इति प्रतीतिर्भवेत् नाप्यर्थापत्तिगम्यः साहि प्रत्यक्षादिप्रमाणगोचरीकृतार्थान्यथानुपपत्त्या प्रवर्त्तते नच कोप्यर्थः सर्वज्ञमन्तरेणोपप

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



ज्ञाते तत्कथमर्थापत्तिगम्यस्तदेवं प्रमाणपंचकाकल्पेरभावप्रमाणमेव सर्वज्ञं कोडीकरोति उक्तं च प्रमाणपञ्चकं यत्र वस्तुरूपेण जायते वस्तुसत्तावबोधार्थं तत्राभावप्रमाणता। अपिच सर्ववस्तु जानाति भगवान् केन प्रमाणेन किं प्रत्यक्षेण उत यथासम्भवं सर्वैरेवप्रमाणैः तत्र न तावत्प्रत्यक्षेण देशकालविप्रकृष्टेषु सूक्ष्मेष्वमूर्त्तेषु च तस्याप्रवृत्तेरिन्द्रियाणामगोचरत्वात् यदि पुनस्तस्यापीन्द्रियं व्याप्रियेत तर्हि सर्वः सर्वज्ञो भवेत् अथेन्द्रियप्रत्यक्षादन्यदतीन्द्रियं प्रत्यक्षमस्यास्ति तेन सर्वं जानातीति मन्येथाः तदप्ययुक्तं तस्यास्तित्वे प्रमाणाभावात्नच प्रमाणमन्तरेणप्रमेयसिद्धिः सर्वस्य सर्वेष्टार्थसिद्धिप्रसक्तेः अथवा अस्तु तदपि सर्वमेतावदेव जगति वर्त्तते इति न निश्चयो न खल्वतीन्द्रियमप्यवधिज्ञानं सर्ववस्तुविषयं सिद्धं तदपरिच्छिन्नानामपि धर्माधर्मास्तिकायादीना सम्भवादेवं केवलज्ञानापरिच्छिन्नमपिकिमपिवस्तु भविष्यतीत्याशङ्कानिवृत्तेर्न सर्वविषयेकेवलज्ञानं वक्तुं शक्यं तथाचकुतःसर्वज्ञस्यापि स्वयमात्मनःसर्वज्ञविनिश्चयः अथ यथायथं सर्वैरेव प्रमाणैः सर्वं वस्तु जानातीति पक्षः नन्वेवं सति य एवागमे कृतपरिश्रमः सएव सर्वज्ञत्वं प्राप्नोत्यागमस्य प्रायः सर्वार्थविषयत्वात् तथाच कः प्रतिविशेषो वर्द्धमानस्वाम्यादौ येन सएव प्रमाणमिष्यते तच्छैमिनिरिति अथच यथावस्थितसकलवस्तुवेदी सर्वज्ञ इष्यते ततोऽशुच्यादिरसानामपि यथावस्थिततया संवेदनादशुच्यादिरसास्वादप्रसङ्गः आहच अशुच्यादिरसास्वाद प्रसङ्गश्चानिवारितः किञ्च कालतो माद्यनन्तः संसारो जगति च सर्वदाविद्यमानान्यपि वस्तून्यनन्तानि ततः संसारवस्तूनि च क्रमेण विदन् कथमनंतेनापि काले न सर्ववेदी भविष्यति उक्तं च क्रमेण वेदनं कथमिति अत्र प्रतिविधीयते तत्र यत्तावदुक्तं सर्वजगदुद्योतकत्वं भगवतः केनप्रकारेण प्रतीयते इत्यादि तत्रागमप्रमाणादिति ब्रूमः सचागमः किञ्चिन्नित्यः प्रवाहतोनादित्वात्तथा हि यामेव द्वादशांगीकल्पलताकल्पां भगवान् ऋषभस्वामी पूर्वभवेधीतवान् अधीत्य च पूर्वभवे इह भवे च यथावत्पर्युपास्यफलभूतकेवलज्ञानमवाप्तवान् तामेवोत्पन्न केवलज्ञानः सन् शिष्येभ्य उपदिशति एवं सर्वतीर्थकरेष्वपिद्रष्टव्यं ततो सा वागमोर्थरूपापेक्षया नित्यः तथाच वक्ष्यति एसा दुवालसंगी

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



नकथा विनाशीनकथाविनश्विनकथाविनभविष्यदे ध्रुवानीया शाश्वता अक्षया अव्यया अव्याबाधा अवस्थियानिसा इति अस्मिं श्चागमे यथा संसारी संसारं पर्यटति यथा कर्मणामभिसमागमो यथाच तप: संयमादिना कर्मणामपगमे केवलाभिव्यक्ति स्तथासर्वं प्रतिपाद्यते इतिसिद्ध आगमात्सर्वज्ञ: अस्य क्तं सयौ रुषेयोवा पौरुषेयो वा इति तत्राऽयंतो पौरुषेय: स च न सर्वज्ञप्रकाशितत्वादेव प्रमाणं किंतु कथंचित् स्ततोपि निश्चिता विपरीतप्रत्ययोत्पादकत्वात्ततो ने तरेतराश्रयदोषप्रसङ्ग: सर्वज्ञप्रणीतत्वावगस्य भावेपि निश्चिता विपरीतप्रत्ययोत्पादकतया तस्यप्रमाण्यनिश्चयाम्नत: सर्व्वज्ञसिद्धि: अयैवमागमात्सर्वज्ञ: सामान्यत: सिद्ध्यति न विशेषनिर्देशेन यथायं सर्वज्ञ इति [तत: कथं सर्वज्ञकालेपि सर्व्वज्ञोयमिति व्यवहार: उच्यते दृष्टचिन्तितसकलपदार्थप्रकाशनात् तथा हि यत् यत् भगवान् पृच्छते यत्र यस्य चेतसि प्रष्टाचिन्तयति तत् तत्सर्वं प्रत्ययपूर्वमुपदिशति ततो सौ ज्ञायते यथा सर्व्वज्ञ इति तेन यदुच्यते भट्टेनसर्वज्ञो साविति ह्यो तत् तत्कालपि बुभुत्सु भि: तत् ज्ञानज्ञेयविज्ञानरहितैर्गम्यते कथमिति तदपास्तं द्रष्टव्यं दृष्टचिन्तित सकलपदार्थ प्रकाशनेन तस्य सर्व्वज्ञत्व निश्चयात् नन्वेवं व्यवहारतो निश्चयो न निश्चयतो [निश्चयतो हि तदा सर्व्ववेदि विदितो भवति यदातत्ज्ञेयं सर्वं विदित्वा सर्व्वत्र संवादोऽवलोक्यते न चै तत्कर्तुं शक्यं अथैकत्र संवाद दर्शनादन्यत्रापि स संवादी द्रष्टव्य: एवं तर्हि मायावी बहुजल्पाक: सर्व्वोपि सर्व्वज्ञ: प्राप्नोति तस्याप्येकदेशसंवाद दर्शनादाह च एक देशपरिज्ञानं कस्य नामनविद्यते मत्तोकं नास्ति सत्यार्थं पुरुषे बहुजल्पिनि तदयुक्तं व्यवहारतोपि निश्चयस्य सम्यग् निश्चयत्वात् वैयाकरणादि निश्चय तत् तथाहि वैयाकरण: कतिपय दृष्ट शब्दव्याकरणादय सम्यग् वैयाकरण इति निश्चियते एवं दृष्टचिन्तितार्थ प्रकाशना सर्वज्ञोपि न चैवं मायाविनोपि सर्वज्ञत्व प्रसङ्ग: मायाविनिसर्वेषु दृष्टेषुचार्थेषुचिंतितेषु संवादायोगात् निपुणेनच प्रतिपत्त्रा भवितव्यं यथ वैयाकरणो न्येन वैयाकरणेन सकल व्याकरण शास्त्रार्थ संवादानिश्चयतोपि ज्ञातुं शक्यते ननु सर्वज्ञोप्यऽन्येन सर्वज्ञेन यथावत् ज्ञातुं शक्यते एवेति समानं यथ

तदानीमन्येन सर्वज्ञेन निश्चयतो विज्ञायतामिदानींतु स कथं ज्ञायते उच्यते इदानींतु सम्प्रदायादव्याहत प्रवचनार्थ प्रकाशनाच्च यदप्यवादीत् ऋषभः
सर्व्वज्ञो वर्द्धमानस्वामि सर्वज्ञ इत्यादिरर्थवादः प्राप्नोतीत्यादि तदप्यसारमागमस्येयं कल्पोयोयः सर्वज्ञ उत्पद्यते तेन तत्तत्कालप्रवर्त्तिनां तीर्थकृतां सर्वेषा
मप्यवश्यं चरितानि वक्तव्यानि ततोन ऋषभाद्यभिधानमर्थवादः यदप्यभिहितं माप्युपमान प्रमाणगम्य इत्यादि तदप्ययुक्तमेकं सर्व्वज्ञं यदा व्यवहारतो
यथावद्विनिश्चित्यान्यमपि सर्वज्ञं व्यवहारतः परिज्ञाय एषोपि सर्वज्ञइति व्यवहरति तदा कथंनोपमान प्रमाणविषयः अर्थापत्तिगम्योपि भगवान् अन्यथा
गमार्थस्य परिज्ञानासम्भवात् न खल्वतींद्रियार्थ दर्शनमन्तरेणागमस्यार्थोतीन्द्रियः पुरुषमात्रेण यथावदवगन्तुशक्यते तत आगमार्थ परिज्ञानान्यथानुपप
त्यासर्वज्ञोऽवश्यमभ्युपगन्तव्यः एतेन यदुक्तं प्राक्किमिदानीं सर्वज्ञेनागमा देव धर्म्माधर्म व्यवस्था सिद्धेरिति तत्प्रतिक्षिप्तमवसेयं सर्वज्ञमन्तरेणागमार्थ
स्यैव सम्यक् परिज्ञानासम्भवात् यच्चोक्तं सर्ववस्तु जानाति भगवान् केन प्रमाणेनेत्यादि तत्र प्रत्यक्षेणेति पक्षस्तदपि च प्रत्यक्षमतीन्द्रियमवसेयं ननु तत्रा
प्युक्तं तस्याखिलत्वे प्रमाणाभावादिति उक्तमिदमयुक्तं तत्र तदखिलत्वेऽनुमान प्रमाण सद्भावात् तच्चानुमान मिदं यत्तारतम्यवत्तत्सर्वोत्तिम प्रकर्षभाक् यथा
परिमाणं तारतम्यवच्चेदं ज्ञानमिति नचायम सिद्धोहेतु तथाहि दृश्यते प्रतिप्राणी प्रज्ञामेधादि गुणपाटव तारतम्यं ज्ञानस्य ततो वश्यमस्य सर्वान्तिम
प्रकर्षेण भवितव्यं यथा परिमाणस्याकाशे सर्वान्तिम प्रकर्षश्च ज्ञानस्य सकल वस्तुस्तोम प्रकाशकत्वं अथ यद्विषयस्तरतमभावः सर्वान्तिम प्रकर्षोपि तद्विषयएव
युक्तस्तरतम भावश्चेन्द्रियाश्रितस्य ज्ञानस्योपलभ्यस्तत: सर्वान्तिम प्रकर्षोपि तस्यैवेति कथमतीन्द्रिय ज्ञानसम्भवः इन्द्रियाश्रितस्यसच ज्ञानस्य प्रकर्ष भावे
पि न सर्वविषयतातस्य स्वत्त्मादाव प्रवृत्तेः अथोच्यते मनोज्ञानमप्यतीन्द्रिय ज्ञानमुच्यते तस्य च तरतमभावः शास्त्रादौदृष्ट एव तथाहि तदेव शास्त्रं कश्चि
त्झटित्येव पतति अथ धारयन्ति अपरस्तुमंदं बोधतोपि कश्चित् सकुलितार्थावबोधम परोवशिष्टावबोधमेव मन्यास्वपि कलास्वयथा योगं मनोविज्ञानस्य

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



तारतम्यं परिभाव्यते ततस्तस्य सर्वान्तिमः प्रकर्षः सर्वविषयोन भविष्यति तदसत् यतो मनोविज्ञानस्यापि [तरतमभावः][शास्त्राद्यालम्बन एवोपलभ्यतः
प्रकर्षभावोपि तस्य शास्त्राद्यालम्बन एवयुक्त्योपपद्यते न सर्वविषयः न खल्वन्यविषयोऽभ्यासोऽन्यविषयं प्रकर्षभावमुपजनयति तथा चानुपलब्धेः उक्तः
शास्त्राद्यभ्यासतः शास्त्रप्रभत्येवावगच्छत साकल्यवेदिनस्त्व स्वरूत एवागमिष्यति अत्रोच्यते इह तावदिंद्रीय ज्ञानाश्रितस्तरतम] भावेन शास्त्रोऽतींद्रिय
प्रत्यक्ष साधनायहेतो रूपन्यासात् तथाहि सकल वस्तु विषयमतींद्रिय प्रत्यक्षमिदानीं साधयितुमिष्टं ततस्तरतमभावोपि हेतुत्वेनोपन्यस्तोऽतीन्द्रिय
ज्ञानस्यैव वेदितव्योन्यथा भिन्नाधिकरणस्य हेतोः पक्षधर्मत्वायोगात् साक्षाज्ज्ञातीन्द्रियग्रहणं न कृतं प्रस्तावादेव लब्धत्वात् अतीन्द्रियंच ज्ञानमि
न्द्रियानाश्रितं सामान्येन द्रष्टव्यं तेन मनोज्ञानमपि गृह्यते यदप्युक्तं मनोज्ञानस्यापितरतमभावः शास्त्राद्यालम्बन एवेति प्रकर्षभावोपि तद्विषय
एव युक्तइति तदप्यसमीचीनं शास्त्रादि व्यतिक्रांतस्यापि तरतमभावस्य सम्भवात् तथाहि योगिनः परमयोगमिच्छन्तः प्रथमतः शास्त्रमभ्यसितुमु
द्यतंते यथाशक्तिच शास्त्रानुसारेण सकलमप्यनुष्ठानमनुतिष्ठन्ति माभूत्किमपि क्रियावैगुण्यं प्रमादाद्योगाभ्यासयोग्यता हानिर्वेतिकृत्वा ततोनिरंतरमेव
यथोक्तानुष्ठानपुरस्सरं शास्त्रमभ्यसतां शुद्धचेतसां प्रतिदिवसमभिवर्द्धन्ते प्रज्ञामेधादिगुणास्ते चाभ्यासादभिवर्द्धमाना अद्यापि स्वसंवेदनप्रमाणेनानुभूयन्ते
ततो नासिद्धाः ततः शनैः शनैरभ्यासप्रकर्षे जायमाने शास्त्रसन्दर्शितोपाया वचनगोचरातीताः शेषप्राणिगणासंवेदनागम्याः सिद्धिपदसम्पद्धे तवः सूक्ष्मा
सूक्ष्मतरार्थविषयामनाकसमुल्लसत् स्फुटप्रतिभासाज्ञानविशेषाः समुद्यन्ते ततः किञ्चिदूनात्यन्तप्रकर्षसंभवे मनसोपि निरपेक्षं मत्यादिज्ञानप्रकर्षपर्यन्तोत्तर
कालभाविकेवलज्ञानादर्वाक्तनं सवितुरुदयात्प्राक् तदालोककल्पमशेषरूपादिवस्तु विषयं प्रातिभं ज्ञानमुदयात् तच्च स्पष्टाभतयेन्द्रियप्रत्यक्षादधिकतरं मध्ये
दप्रसिद्धं सर्वदर्शनेष्वप्यध्यात्मशास्त्रेषु तस्याभिधानात् अथ प्रथमतो मनः सापेक्षमभ्यासमारब्धवान् अभ्यासप्रकर्षेतपजायमाने] कथं मनोपि नालंबते

For Private and Personal Use Only

उच्यते अत्यन्ताभ्यासप्रकर्षवशतो मनो निरपेक्षमपि शक्तत्वात् तथाहि तरणं शिक्षमाणः प्रथमं तरंडमपेक्षते ततोऽभ्यासप्रकर्षयोगतस्तरणनिष्णातस्तरंडम
परित्यजति एवं योग्यपि वेदितव्यः ततः सर्वोत्कृष्टप्रकर्षसंभवेऽतीव स्फुट प्रतिभासं सकललोकालोकविषयमनुपममबाध्यं केवलज्ञानमुदयते ततो यदुक्तं
शास्त्राद्यभासतः शास्त्रमप्यत्येवावगच्छत इत्यादि तदत्यन्तमभ्यासशास्त्रयाथात्म्यवेदि गुरुसंपर्कवद्भिर्भूतत्वस्वचक्रमेव सेयं स्यादेतत्तारतम्यदर्शनादस्तु ज्ञानस्य
प्रकर्षसंभवानुमानं सतुप्रकर्षः सकल वस्तु विषय इति कथंज्ञेयं न खलु लंघनमभ्यास तत्तारतम्यवदप्युपलभ्यमानं सकल लोक विषयमुपलभ्यते तदसत्
दृष्टान्तदार्ष्टान्तिकयोर्वैषम्यात् तथाहि न लंघनमभ्यासादुपजायते किन्तु बलविशेषतः तथाहि समानेपि गवच्छाखाखगशावके योरभ्यासेन समानं लङ्घनं
उक्तं च गवलच्छाखाखगयोर्लङ्घनाभ्याससत्त्वे समानेपि समानत्वं लङ्घनस्य न विद्यते अपिच पुरुषयोरपि द्वयोः समानप्रथमयौवनयोरपि समानेप्यभ्यासे
एक प्रभूतं लङ्घयितुं शक्नोति अपरस्तु स्तोकं तस्मादबलापेक्षं लङ्घनं नाभ्यासमात्र हेतुकमभ्यासस्तु केवलं देहे वैगुण्यमात्रमपनयति तच्च बलं वीर्यान्तराय
कर्मक्षयोपशमात् क्षयोपशमश्च जातिभेदापेक्षी द्रव्यक्षेत्राद्यपेक्षी च ततो यस्य यावद्बलं तस्य तावदेवलङ्घनमिति तत्र सकललोकविषयं जीवस्तु शशांकइव
स्वरूपेण सकलजगत्प्रकाशनस्वभावः केवलमावरणघनपटल तिरस्कृतप्रभावत्वात् न तथा प्रकाशेन उक्तं च स्थितः शीतांशुवज्जीवः प्रकृत्याभावशुद्धया चन्द्रि
कावच्च विज्ञानं तदावरणमभ्रवत् १ ततो यथा प्रचण्डनैर्ऋतपवन प्रहताघनपटलपरमाणवः शनैः शनैर्निस्नेहा भूयापगच्छन्ति तदपगमनानुसारेण च
चन्द्रस्य प्रकाशो जगति वितनुते तथा जीवस्यापि रागादिष्वश्चित्तं विनिवर्त्य कायवाक्चेष्टासु संयतस्य सम्यक् शास्त्रानुसारेण यथावस्थितं वस्तुपरिभाव
यतो ज्ञानादिभावनाप्रभावतो ज्ञानावरणीयादिकर्मपरमाणवः शनैश्शनैर्निस्नेही भयात्मनः प्रच्यवन्ते; कथमेतत्प्रत्येयमिति चेत् उच्यते इह ज्ञानादिनि
मित्तकं ज्ञानावरणीयादिकर्म ततस्तत्प्रतिपक्षज्ञानाद्यासेवनेऽवश्यं तदात्मनः प्रच्यवते उक्तं चबंधइ जहेव कम्मं अणाणाईहिं कलुसियमणोउ तहचेव तव्विव

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



भक्खो सद्भावओ मुणई जेण? ज्ञानावरणीयकर्मपरमाणु प्रच्यवनानुसारेण चात्मन: शनै: शनैर्ज्ञानमधिकमधिकतरमुल्लसति यदा तु ज्ञानादिभावना प्रकर्ष वशेनाशेषज्ञानावरणीयादि कर्मपरमाणूपगमस्तदा सकलाभ्रपटलविनिर्मुक्तशशांक इवात्मा लब्धयथावस्थितात्मस्वरूप: सकलस्यापि जगतोऽवभासक: ततो ज्ञानस्य प्रकर्ष: सकललोकविषय: अथवा सर्वं वस्तुसामान्येन शास्त्रेपि प्रतिपाद्यते यथा पञ्चास्तिकायात्मको लोक: आकाशास्तिकायात्मकश्च अलोक: किं चिद्विशेषतश्च तुर्द्धाधस्तिर्यग्लोकाकाशानां सविस्तरं तत्राभिधानात् शास्त्रानुसारेण च ज्ञानाभ्यासस्ततस्तरतमभावोपि ज्ञानस्य सकलवस्तुविषयएवेति प्रकर्षभावस्तद्विषयो न विरुध्यते ननु सामान्यतोपि न सकललोकविषयमिति कथमभ्यासतस्तत्प्रकर्ष:सकललोकविषयो भवेत् स्यादेतद्यद्यपि सा मान्यत: शास्त्रानुसारेण सकलवस्तुविषयं ज्ञानमुपजायते तथाप्यभ्यासतस्तत्प्रकर्ष: सकलवस्तुगताशेष विशेषविषय इति कथं ज्ञायते नह्यत्र किञ्चित्प्रमाण मस्ति नच प्रमाणकं वचोविपश्चित: प्रतिपद्यन्ते विपश्चिता क्षतिप्रसङ्गात् तदसत् अनुमानप्रमाणसद्भावात् तच्चानुमानमिदं जलधिजलपलप्रमाणादयो वि शेषा: कस्यचित्प्रत्यक्षा: ज्ञेयत्वात् घटादिगतरूपादिविशेषवत् ज्ञेयत्वं हि ज्ञानविषयतया व्याप्तं नच जलधिजलपलप्रमाणादिरूपेषु विशेषेषु प्रत्यक्षमन्त रेण शेषानुमानादि ज्ञानसम्भवस्तथा हि नतेविशेषा अनुमानप्रमाणगम्यालिङ्गाभावात् नाप्यागमगम्यास्तस्य विधिप्रतिषेधमात्र विषयत्वात् नाप्युपमान गम्यास्तस्य प्रत्यक्षपुरस्सरत्वात् उक्तञ्च भट्टागमेन यदसौ विध्यादिप्रतिपादक: अथप्रत्यक्षत्वतो नैवोपमानस्यापि सम्भव: नाप्यर्थापत्तिविषया: सा हि दृष्ट: श्रुतोवाऽर्थोऽयदन्तरेणानोपपद्यते यथा काष्ठस्य भस्मचिकाऽग्निर्दाहकशक्तिमन्तरेण तद्विषयावर्ण्यते नचदृष्ट: श्रुतोवाकोप्यर्थस्तान् विशेषमन्तरेणानोपपद्यते ततोनार्थापत्तिगम्या: नचेतेविशेषा: स्वरूपेणनसन्ति विशेषात्र विना सामान्यस्यैवासंभवात् न च वाच्यमत एव सामान्यस्यान्यथानुपपत्तेरर्थापत्तिगम्या नियतिस्वरूपतयानवगमात् प्रातिनैयत्यमेवच विशेषाणां स्वरूपमन्यथा विशेषहानै: सामान्यरूपताप्रसङ्गात् न च तेषां ज्ञेयत्वमेवासिद्धमिति वाच्यप्रभाव



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



प्रमाणव्यभिचार प्रसङ्गात् तथाहि यदि केनापि प्रमाणेन न ज्ञायन्ते तर्हि प्रमाणपञ्चकं यत्र वस्तुरूपेण ज्ञायते वस्तुसत्तावबोधार्थं तत्राभावप्रमाणेतीति वच
नादभावप्रमाणविषया: खरभावाख्यं च प्रमाणमभावसाधनमिष्यते अथच ते विशेषा: स्वरूपेणैवावतिष्ठन्ते ततोभावप्रमाणव्यभिचार प्रसङ्गस्तस्माद्विपक्षे
व्यापकानुप लब्ध्याविशेषाणां ज्ञेयत्वं प्रत्यक्षविषया तयाव्याप्यतइतिप्रतिबन्धसिद्धि: स्यादेतत् ज्ञेयत्वादिति हेतुर्विशेषविरुद्धस्तथाहि घटादि गतारूपादि
विशेषादिन्द्रिय प्रत्यक्षेण प्रत्यक्षानुपलब्धास्ततस्तत् ज्ञेयत्वमिन्द्रिय प्रत्यक्षविषयतया प्रत्यक्षत्वेन व्याप्तं निश्चितंसत् जलधिजलपलप्रमाणादिष्वपि विशेषेषु प्रत्यक्ष
त्वमिन्द्रिय प्रत्यक्षविषय तया साधयति तच्चानिष्टमिति तदयुक्तं विरुद्धलक्षणासम्भवात्तथाहि विरुद्धोहेतुस्तदा भवति यदाबाधकंनोपजायते विरुद्धोऽसति
बाधकोइति वचनादत्र च बाधकं विद्यते यदिहि इन्द्रिय प्रत्यक्षविषयतया प्रत्यक्षत्वंभवेत् ततोस्मादृशामपिते प्रत्यक्षाभवेयुर्नच भवंति तस्मादस्मादृशै:
प्रत्यक्षत्वेनासंवेदन मेव तेषामिन्द्रिय प्रत्यक्षविषयत्वसाधने बाधकमिति न विशेषविरुद्ध: अन्य:प्राह न विशेषविरुद्धता हेतोर्दूषणमन्यथासकलानुमानोच्छेद
प्रसङ्गात् तथाहि यथा धूमोग्निं साधयत्यग्नि प्रतिबद्धतया महान स निश्चितत्वात्तथास्मिन् साध्यधर्म्मिण्यग्न्यभावमपि साधयति तेनापितस्य महानस प्रति
बन्धनिश्चयात् तद्यथा नश्यतेनाग्निना अग्निमान् पर्वतोधूमवत्त्वान्महानसवत् ततश्चैवं न कश्चिदपि हेतु: स्यात्तस्मात्र विशेष विरुद्धताहेतोर्दोष: आह च
प्रज्ञाकर गुप्तोपि यदि विशेषविरुद्धतया क्षितिरेणुन हेतुरिहास्ति न दूषित: निखिलहेतु पराक्रम रोधिनीन हिनशा सकलेन विरुद्धतायस्त्रोक्तमथवास्तु
यदि तथापि सर्वमेतावदेवजगति वस्त्विति न निश्चयइत्यादि तदप्यसारं यतोऽवधिज्ञानं तदावरण कर्मदेशक्षयोत्थं ततोतीन्द्रियमपि तन्न सकल वस्तुविषयं
केवलज्ञानन्तुनिर्मूल सकल ज्ञानावरण कर्मपरमाण्वपगम समुत्थं तत: कथमिवतन्न सकलवस्तुविषयंभवेत् नह्यतीन्द्रियस्य देशादि विप्रकर्षा: प्रतिब
न्धका: न च केवल प्रादुर्भावे आवरणदेशस्यापि सम्भवस्ततो यद्वस्तु: तत्सर्वंभगवत: प्रत्यक्षमेवेति भवति सर्वज्ञस्यैवमात्मनो निश्चय: एतावदेवजगतिवस्त्वितिय

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



दप्युक्तमशुच्यादि रसास्वाद प्रसङ्गइति तदपि दुरन्त दीर्घपापोदयविजृंभितमज्ञानतोभगवत्यधिक्षेप करणात् योहि योद्दग्भूतोऽशुच्यादिरसो येषाञ्चप्राणिनां
याद्दङ्तांप्रीतिमुत्पादयति येषाञ्च विद्वेषन्तत्सर्वं तदवस्थतया भगवान्वेत्ति ततः कथमशुच्यादि रसास्वादप्रसङ्गः अथ यदि तटस्थतयावेत्ति तर्हि न सम्यक्
सम्यक्तेन यथा स्वरूपंवेत्ता तर्हि नियमत्वात्तदास्वादप्रसक्तिरुक्तञ्च तटस्थत्वेन वेद्यत्वेतत्वेनावेदनंभवेत् तदात्मनातु वेद्यत्वेऽशुच्यास्वादःप्रसज्जतेतद सत्भवान्हि
सकर्माकरणाधीन ज्ञानस्ततोरसं यथावस्थितम वश्यं जिह्वेन्द्रियव्यापार पुरस्सरमास्वादएव जानाति भगवांस्तुकरणव्यापार निरपेक्षोऽतीन्द्रियज्ञानी ततो
जिह्वेन्द्रियव्यापारसम्पाद्यास्वाद मन्तरेणैव रसं यथावस्थितं तटस्थतयासम्यग् वेत्तीतिन कश्चिद्दोषः एतेन पररागादिवेदने रागीत्यादि प्रसङ्गा पादनम
पास्तमवसेयं पररागादीनामपि यथावस्थिततया तटस्थेन स तावेदनात् यदप्युक्तं कालतो नाद्यनं तः संसारइत्यादि तदप्यसम्यग्युगपत्सर्ववेदनात् न च
युगपत्सर्ववेदनसंभवविरुद्दत्वात् तथाहि सम्यग्जिनागमाभ्यासप्रवृत्तस्य बहुशो विचारितधर्माधर्मास्ति कायादिस्वरूपस्य सामान्यतः पञ्चास्तिकायविज्ञानं
युगपदपि जायमानमुपलभ्यते एवमशेषविशेषकलितपञ्चास्तिकायविज्ञानमपि भविष्यति तथाचायमर्थोन्यैरपि उक्तो यथासकलशास्त्रार्थः स्वभ्यस्तः प्रतिभास
ते मनस्येकक्षणेनैव तथानंतादिवेदनं यदप्युच्यते कथमतीतं भाविवावेत्ति विनष्टानुत्पन्नत्वेन तयोरभावादितितदपि न सम्यक् यतो यद्यपीदानींतनकाला
पेक्षया ते असती तथापि तथातीतेकाले अवर्त्तिष्ट यथावभाविवर्त्तिष्यते तथा ते साक्षात्करोति ततो न कश्चित् दोषः स्यादेतद्यथा भवद्भिर्ज्ञानस्य तारतम्य
दर्शनात्प्रकर्षसम्भवोनुमीयते तथातीर्थान्तरीयैरपि ततो यथा भवत्सम्मततीर्थकरोपदर्शिताः पदार्थराशयः सत्यतामश्नुवते तथातीर्थान्तरीयसम्मततीर्थकरोप
दर्शितां अपि सत्यतामश्नवीरन् विशेषाभावादन्यथा भवत्सम्मततीर्थकरोपदर्शिता अपि असत्यतामश्नुवीरन् अथ तीर्थान्तरीयसम्मततीर्थकरोपदिष्टाः पदार्थरा
शयोऽनुमानप्रमाणेन बाध्यते ततो न तेषत्याः तदयुक्तमनुमान प्रमाणेनातीन्द्रियज्ञानस्य बाधितुमशक्यत्वात् आहच अतीन्द्रियान् संवेद्यान् पश्यंतार्षेण

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



चक्षुषा ये भावान् वचनं तेषां नानुमानेन बाध्यते अथ सम्भवन्ति जगति प्रज्ञालवोन्मेष दुर्विदग्धाः कुतर्कशास्त्राभ्यासम्पर्कतो वाचालस्तथा विधइन्द्र
जालकौशलवशेन दर्शितदेवागम नभोयान चामरादिविभूतयः कीर्त्तिपूजादिलब्धुकामाः स्वयमसर्वज्ञा अपि सर्वज्ञावयमिति ब्रूवाणास्ततएतावदेव न ज्ञायते
यदुत तेषां सर्वोत्तमप्रकर्षरूपमतीन्द्रियज्ञानमभूत् यदि पुनर्यथोक्तस्वरूपमतीन्द्रियज्ञानमभविष्यत् तर्हि वचनमपि तेषां नाबाधिष्यते अथच दृश्यतेबाधा
ततस्ते कैतवभूमयो न सर्वज्ञा इति प्रतिपत्तव्यं तदेतदर्हत्यपि समानं न समानमर्हद्वचसि प्रमासम्वाददर्शनात् उक्तंच जैनेश्वरे हि वचसि प्रमासम्वाददृष्यते
प्रमाणबाधात्वन्येषामतो द्रष्टाजिनेश्वरः अथ पुरुषमात्रसमुत्थं प्रमाणमतीन्द्रियविषयेण साधकं नापि बाधकमविषयत्वात्समानकक्षतायां हि बाध्यबाधकभाव
स्तथाचोक्तं समानविषया यस्माद्बाध्यबाधकसंस्थितिः अतीन्द्रियेषसंसारिप्रमाणं न प्रवर्त्तते ततः कथमुच्यतेर्हतो वचसि प्रमासंवाददर्शनं प्रमाणबाधात्वन्ये
षामिति तदपि न सम्यक् यतो न भगवान् केवलमतीन्द्रियमस्माहशाम शक्यपरिच्छेदमेवोपदिशति यदि पुनस्तथाभूतमुपदिशेत्तर्हि न कोपि तद्वचन
तःप्रवर्तते अतीन्द्रियार्थ वचः सर्वेषामेव विद्यते परस्परविरुद्धं च ततः कथं तद्वचनतः प्रेक्षावतां प्रवृत्तिः ततोऽवश्यं परान्प्रतिपादय यताभगव
तापरैः शक्यपरिच्छेदमप्युपदेष्टव्यं शक्यपरिच्छेदेषु चार्थेषु भगवदुक्तेषु यत्तथाप्रमाणेन संवेदनं तत्तद्विषयं साधकं प्रमाणमुच्यते विपरीतं तु बाधकं
अस्ति च भगवदुक्तेषु शक्यपरिच्छेदेष्वर्थेप्रमासंवादः तथाहि घटादयः पदार्थाअनेकानात्मका उक्तास्ते चतथैव प्रत्यक्षतोनुमानतो वा निश्चीयंते मोक्षोपि च
परमानन्दरूपशाश्वतिकसौख्यात्मक उक्तस्ततःसोपि युक्त्यासंगतिमुपपद्यते यतःसंसारप्रतिपक्षभूतो मोक्षःसंसारे च जन्मजरामरणादिदुःखहेतवो रागादयस्ते
च निर्मूलमपगतो मोक्षावस्थायामितिन मोक्षेदुःखलेशस्यापि संभवः नच निर्मूलमपगता रागादयोभूयो जायंते ततस्तत्सौख्यं शाश्वतिकमुपवर्ण्यते ननु
यदि न तत्ररागादयस्तर्हि न तत्र मत्तकामिनीगाढालिङ्गनपीनस्तनापीडनवदनचुम्बन कराघातादिप्रभवंरागनिबन्धनं सुखं नापि द्वेषनिबन्धनं प्रबलवैरि

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



तिरस्कारापादनप्रभवं नापि मोहनिबन्धनमहङ्कार।समुत्थमात्मीयविनीतपुत्रभ्रातृप्रभृति बंधुवर्गसहवाससंभवञ्च ततः कथमिव समोक्षोजन्मिनामुपादेयो भव
ति आह च वीतरागस्य न सुखं योषिदालिङ्गनादिजं वीतद्वेषस्य च कुतः शत्रुमेनाविमर्दजं वीतमोहस्य न सुखमात्मीयाभिनिवेशजं ततः किं तादृशा तेन कृत्यं
मोक्षेणाजन्मिना अपि चक्षुरादयोपि तत्र सर्वथानिवृत्ताइष्यन्ते ततोऽत्यन्तबुभुक्षाक्षामकुक्षेर्यथा विशिष्टाहारभोजनेन यद्वा ग्रीष्मादौ पिपासापीडितस्य पाटला
कुसुमादिवासितसुगन्धिशीतलसलिलपाने नोपजायते सुखं तदपि तत्र दूरतोपास्तप्रसरमिति न कार्यं तेन तदेतदतीव समीचीनं यतोयद्यपि रागादयः
प्रथमतः क्षणमात्रसुखदायि तयारमणीयाः प्रतिभासंते तथापि तेपरिणामपरंपरयाऽनन्तदुःसहनरकादिदुःखसंपातहेतवस्ततः पर्यंतदारुणतया विषान्नभो
जनसमुत्थमिव न रागादिप्रभवं सुखमुपादेयं प्रेक्षावतां भवति प्रेक्षावन्तोहि बहुदुःखमपहाय यदेव बहुसुखं तदेव प्रतिपद्यंते।यस्तु स्तोकसुखनिमित्तं बहु
दुःखमाद्रियते स प्रेक्षावानेव न भवति किंतु कुबुद्धिः रागादिप्रभवमपि च सुखमुक्तनीत्या बहुदुःखहेतुकमपवर्गसुखं चैकांतिकमात्यन्तिकपरमानन्दरूपं ततस्तदे
व तत्ववेदिनामुपादेयं न रागादिप्रभवमिति यदिपुनर्यदपि तदपि सुखमभिलषणीयं भवतस्तर्हि पानशौण्डानां यन्मद्यपानप्रभवं यच्च गर्त्ताशूकराणां पुरीष
भक्षणसमुत्थं यच्च रक्षसां मानुषमांसाभ्यवहारसंभवं यच्च दासस्य सतः स्वामिप्रसादादिहेतुकं यदपि च पारसीकदेशवासिनो मात्रादिस्त्रीणीसंगमनिबन्धनं
तत्सर्वं भवतोहिज्जातिभावेसति न संपद्यते इतिपानशौण्डाद्यप्यभिलषणीयं अपि च नरकदुःखमप्राप्तस्य न तद्वियोगसंभवं सुखमुपजायते ततो नरकदुःखमप्य
भिलषणीयं अथविशिष्टमेव सुखमभिलषणीय न यत्किञ्चित्तर्हिविशिष्टमेकांतेन न सुखं मोक्षे एवविद्यते न रागादौ चक्षुरादौ वा तस्मात्तदेवाभिलषणीयं नशेषमि
ति योपि च सम्यग्दर्शनज्ञानचारित्ररूपो मोक्षमार्गउक्तः सोपि युक्त्याविचार्यमाणः प्रेक्षावतामुपादेयतामश्नुते तथाहि सकलमपि कर्म्म जालं मिथ्यात्वाज्ञानप्रा
णिहिंसादिहेतुकं ततः सकलकर्म्मनिर्मूलनाय सम्यग्दर्शनाद्यभ्यासएव घटते नान्यत्तदेवं भगवदुपदिष्टेषु षड्द्रव्यपरिच्छेदेष्वर्थेषु प्रत्यक्षेष्वनुमेयेषु यथाक्रमं

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



प्रत्यक्षानुमानसंवाददर्शनाज्ज्योत्स्नादिषु च युक्त्योपपद्यमानत्वाद्भगवानेव सर्वज्ञोनसुगतादिरितिस्थितं तथाभूतंजिनस्य वीरस्य महावीरस्य जयतिरागादि
शत्रु गणमिति जिनश्रीगणादिकोनक् प्रत्ययस्तस्यभद्रं भवतु अनेनापायातिशयमाह अपायोविश्लेषस्तस्यातिशय: प्रकर्षभावापायातिशयो रागादिभि: सहा
त्यंतिकोविश्लेषइत्यर्थ: ननु रागादिभि: सहात्यंतिकोवियोगो संभवीप्रमाणबाधनात्तथ प्रमाणमिदं यदनादिमन्नतद्विनाशमाविशतियथाकाशं अनादिम
न्तश्च रागादयइति किं विरागादयो धर्मास्तेच धर्मिणोभिन्ना अभिन्नावा यदिभिन्नास्तर्हि सर्वेषामविशेषेण वीतरागत्वप्रसंग: रागादिभ्यो भिन्नत्वाद्विव
क्षित पुरुषवत् अथ भिन्नास्तर्हि तत्तयेधर्मिणोप्यात्मन: क्षय: तदभिन्नत्वात् तत्स्वरूपवत्तथाच कुतस्तस्यवीतरागत्वं तस्यैवा भावादिति अत्रोच्यते इह
यद्यपि रागादयो दोषाजंतोरनादि मन्तस्तथापि कस्यचित् शरीरादिषु यथावस्थितवस्तु तत्वावगमेन तेषां रागादिनां प्रतिपक्षभावनत: प्रतिक्षणमप
चयोदृश्यते तत: सम्भाव्यते विशिष्टकालादि सामग्रीसद्भावे भावनाप्रकर्षविशेष भावतो निर्मूलमपिक्षय: अथ यद्यपि प्रतिपक्षभावनात: प्रतिक्षणमपचयो
दृष्टस्तथापि तेषामात्यंतिकाक्षय: संभवतीतिकथमवसेयंउच्यते अत्रतथाविधप्रतिबन्धग्रहणात् तथाहिशीतस्पर्श सम्पाद्यारोमहर्षादय:शीतप्रतिपक्षस्य वन्हे
र्मंदतायांमंदाउपलभ्या उत्कर्षे च निरन्वय विनाशधर्माणस्ततोन्यत्रापि बाधकस्यमन्दतायांबाध्यस्यमन्दता दर्शनाद्बाधकोत्कर्षेऽवश्यं बाध्यस्यनिरन्वय विनाशोवे
दितव्योन्यथा बाधक मन्दतायांमंदतापिनस्यात् अथास्तिज्ञानस्य ज्ञानावरणीयं कर्मबाधकं ज्ञानावरणीय कर्ममन्दतायां च ज्ञानस्यापि मनाक् मन्दता
अथच प्रबलज्ञानावरणीय कर्मोदयोत्कर्षेपि न ज्ञानस्य निरन्वयोविनाश: एवं प्रतिपक्षभावनोत्कर्षेपि न रागादिनामत्यंतो च्छेदो भविष्यतीति तद
युक्तं द्विविधंहि बाध्यंसहभू स्वभावभूतं सहकारि सम्पाद्य स्वभावभूतश्च तत्र यत्सहभूस्वभावभूतंतन्न कदाचिदपि निरन्वयं विनाशमाविशतिज्ञानं चात्मन:
सहभूस्वभावभूतमात्मा च परिणामनित्यस्ततोत्यंत प्रकर्षवत्यपि ज्ञानावरणीय कर्मोदयेन निरन्वयविनाशो ज्ञानस्य रागादयस्तु लोभादिकर्म विपाकोद

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



यसंपादितसत्ताकास्तत: कर्म्मणो निर्मूलमपगमेतेपि निर्मूलमपगच्छंति नत्वासतां कर्म्मसंपाद्यरागादय: तथापि कर्म्मनिवृत्तौ ते निवर्त्तंते इति नाव
श्यं नियमो न हि दहननिवृत्तौ तत्कृताकाष्टेऽङ्गारता निवर्त्तते तदसत् यतइहकिञ्चित् क्वचिन्निवर्त्त्यविकारमापादयति यथाग्नि: सुवर्णे द्रवतां तथाह्यग्नि
निवृत्तौ तत्कृता सुवर्णे द्रवतानिवर्त्तते किञ्चित्पुन: क्वचिदनिवर्त्त्य विकारारम्भकं यथा सएवाग्नि काष्ठेन खलुश्यामता मात्रमपि काष्ठेदहनकृतं तन्निवृत्तौ
निवर्त्तते कर्म्म चात्मनिवर्त्त्यविकारारम्भकं यदिपुनरनिवर्त्त्यविकारारम्भकं भवेत्तर्हि यदपितदपि कर्मणाकृतंनकर्मनिवृत्तौनिवर्त्तेत यथाग्निनाश्यामता मात्रमपि
काष्ठ कृतमग्निनिवृत्तौ ततश्चयदेकदाकर्मणापादितं मनुष्यममरत्वं कृमिकीटत्वमन्धत्वं शिरोवेदनादि तत्सर्वकालं तथैवाव तिष्टेत नचेतत्दृश्यते तस्मान्निवर्त्त
विकारारम्भक: कर्म्म तत: कर्म्म निवृत्तौ रागादीनामपि निवृत्ति: अत्राऽऽर्वाहस्पत्यानैते रागादयो लोभादिकर्म्म विपाकोदयनिबन्धना: किन्तु कफादि
प्रकृतिहेतुका: तथाहि कफहेतुकोराग: पित्तहेतुकोद्वेषो वातहेतुकश्चमोह: कफादयश्च सदैवसन्निहिता: शरीरस्य तदात्मकत्वात्ततो न वीतरागत्वसम्भव:
तदयुक्तं रागादीनां कफादिहेतुकत्वायोगात्तथा हिसद्धेतुकार्योर्यं न व्यभिचरति यथा धूमोऽग्निमन्यथा प्रतिनियत कार्य्यकारणभाव व्यवस्थानुपपत्ते: न च
रागादय: कफादीन्नव्यभिचरन्ति व्यभिचार दर्शनात्तथाहि वातप्रकृतेरपि दृश्येते रागद्वेषौ कफप्रकृतेरपि द्वेषमोहौपित्त प्रकृतेरपि मोहरागौतत: कथं
रागादय: कफादिहेतुका: अथमन्येथा एकेकापि प्रकृति: सर्वेषाणां पृथक् पृथग्जनिका तेनायमदोषइति तदयुक्तमेवंसतिसर्वेषामपि जंतूनां समरागादि
दोष प्रसक्तेरवश्यंहि प्राणिना मेकतया कयाचित्प्रकृत्याभवितव्यं साधा विशेषेण रागादि दोषाणामुत्पादिके ति सर्वेषामपि समानरागादिमाप्रसक्ति:
अथास्ति प्रतिप्राणि पृथक् पृथगवांतर: कफादीनां परिणतिविशेषस्तेन न सर्वेषां समरागादिताप्रसङ्ग: तदपि न साधीयो विकल्पयुगलानतिक्रमात् तथाहि
सोप्यवांतर: कफादीनां परिणति विशेष: सर्वेषामपि रागादीनामुत्पादक आहोस्विदेकतमस्यैव कस्यचित्तत्रयद्यव्या प्रकस्तर्हि यावत्सपरिणति विशेष

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



स्तावदेव कालं सर्वेषामपि रागादीनामुत्पादप्रसङ्गः नचैक कालमुत्पद्यमानारागादयः सम्वेद्यन्ते कमेण तेषां वेदनान्न खलुरागाध्यवसायकालेद्वेषाध्यवसायो
मोहाध्यवसायोवासंवेद्यतेऽथ द्वितीय पक्षस्तत्रापियावत् स कफादिपरिणतिविशेषस्तावदेक एव कश्चिद्दोषः प्राप्नोतिअथच तदवस्थ एव कफादिपरिणतिविशेषे
सर्वेपि दोषाःकमेण पराहत्य पराहत्योपजायमानानुपलभ्यंते अथादृश्यमान एवकेवल कार्यविशेष दर्शनोन्नीयमानसत्ताकस्तदातत्तद्रागादिदोषहेतुः कफादि
परिणति विशेषोजायतेतेन पूर्वोक्त दोषावकाशः ननु यदि स परिणतिविशेषःसर्वथा ननुभूयमानस्वरूपोपिपरिकल्पते तर्हिकर्मैवकिंनाभ्युपगम्यते एवं हि
लोक शास्त्रमार्गोप्याराधितो भवति अपिच स कफादि परिणति विषेषः कुतस्तदाऽन्यान्य रूपेणोपजायते इति वक्तव्यं देहादितिचेत् ननु तदवस्थेपि देहे
भवद्भिः कार्य विशेष दर्शन तस्तस्य स्यान्यथाभवनमपीष्यते तत्कथं तद्धेतुनि नित्तं नहि यदि विशेषेपि यद्विक्रियते सविकारस्तद्धेतुक इति वक्तुं शक्यंनाप्यन्यो
हेतुरुपलभ्यते तस्मात्तदप्यन्यथार भवनं कर्म्महेतुकतयाद्रष्टव्यं तथाचसतिकर्म्मैवैकाभ्युपगम्यतां किमन्तर्गडनातद्धेतुतया कफादि परिणति विशेषाभ्युपगमेन
किञ्चाभ्यासजनितप्रसराः प्रायोरागादयस्तथाहि यथायथा रागादयः सेव्यन्ते तथातथाभि वृद्धिरेव तेषामुपजायते न प्रहाणिस्तेन समानेपि कफादि परि
णति विशेष तदवस्थोपि च देहेयस्येह जन्मनि परत्रवायस्मिन् दोषेभ्यासः स तस्य प्राचुर्येण प्रवर्त्तते शेषस्तुमन्दतया ततोऽभ्यास संपाद्यकर्म्मोपचय हेतुका
एव रागादयो न कफादिहेतुकाइति प्रतिपत्तव्यं अन्यच्च यदि कफ हेतुकोरागः स्यात्ततः कफवृद्धौरागवृद्धिर्भवेत् पित्तप्रकर्षे तापप्रकर्षवत् न च भवति
तदुत्कर्षोत्थपीडावाधित तयाद्वेषस्यैव दर्शनात् अथ पक्षांतरं मङ्गीथा यदुतन कफहेतुकोरागः किन्तु कफादिदोष साम्यहेतुकस्तथाहि कफादिदोषसाम्ये
विरुद्धव्याध्यभावतो रागोद्भवोदृश्यते इति तदपि न समीचीनं व्यभिचार दर्शनात् न हि यावत्कफादिदोषसाम्यं तावत्सर्वदैवरागोद्भवोनुभूयते द्वेषाद्युद्भवस्या
प्यनुभवात् न च यद्भावेपि यन्न भवति तत्तद्धेतुकं स चेतसावक्तुं शक्यं अपिचैवमभ्युपगमे ये विषमदोषास्तेरागिणो न प्राप्नुवन्ति अथच तेपि रागिणो

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



दृश्यंते स्यादेतदसंचस्यूर्यातपत्वं निर्वचमिष्टुकोपचयहेतुकोरागोमान्यहेतुकइतितदपि न युक्तमेवंह्यत्यं तस्यीमेवापरतयात्सुकच्छयत: चरतुच्चतजानां रागिता न स्यादयचैतेपि तस्याम प्यवस्थायां नि कामं रागिणोदृश्यंते किञ्चयदिष्टुकस्यरागहेतुतातर्हि तस्य सर्व स्त्रीषुसाधारणत्वान्नैक स्त्रीनियतोराग: कस्यापि भवेत् दृश्यते च कस्याप्येक स्त्रीनियतोराग: अथोच्येत रूपस्यापि कारणत्वाद्रूपातिशय लुब्धस्तस्यामेवरूपवत्यामभिरज्यतेन योषिदंतरे उक्तञ्च रूपातिशय पाशे न वशीकृतमानसा: स्वांयोषितं परित्यज्यरमंतेयोषिदंतरेतदपिन मनोरमंरूपर हितायामपि क्वापिरागदर्शनात् अथ तत्रोपचार विशेष: समीची नो भविष्यति तेन तत्राभिरज्यते उपचारोपिच रागहेतुर्नरूपमेव केवलं तेषा यमदोषइति तदपि व्यभिचार इयेनापि विमुक्तायां क्वचिद्रागदर्शनात्तस्माद भ्यास जनितोपचय परिपाकं कर्मैव विचित्रस्वभावतयातदा तदातत्तत्कारणापेक्षंतत्र तत्ररागादिहेतुरिति कर्म्म हेतुकाररागादय:एते न यदपिकश्चिदाह पृथिव्यादि भूतानां धर्म्म एते रागादयस्तथाहिपृथिव्यंबुभूयस्त्वे रागस्तेजोवायुभूयस्त्वे द्वेषोजलवायुभूयस्त्वे मोहइतितदपि निराकृतमवसेयंव्यभिचारात्तथाहिय स्यामेवावस्थायांराग: समतस्तस्यामेवावस्थायां द्वेषोमोहोपिच दृश्यते ततए तदपियत्किंचित् तस्मात्कर्म्म हेतुरागादयस्तत् कर्म्म निवृत्तौनिवर्त्ततेप्रयोगश्चात येसहकारि संपाद्यायदुप्रधानादपकर्षिणस्ततदत्यंत दृष्टौनिरन्वयं विनाश धर्म्माणो यथारोमहर्षादयो वह्नि दृष्टौभावतोप्रधानादपकर्षिणश्च सहकारिकर्म संपाद्यारागादयइति अत्र सहकारि संपाद्य इति विशेषणं सहभू स्वभाव बोधादि व्यवच्छेदार्थं यदपिच प्रागुपन्यस्तं प्रमाणंयदनादि मन्नतद्विनाशमा विश ति यथाकाशमिति तदप्यप्रमाणं हेतोरनैकान्तिकत्वात् प्रागभावेनव्यभिचारात् तथाहि प्रागभावोऽनादिमानपि विनाशमाविशत्यन्यथाकार्यानुत्पत्ते: भावनाधिकारी च सम्यग्दर्शनादि रत्नत्रयसंपन्नान्वितोवेदितव्य: इतरस्य तदनुरूपानुष्टान प्रवृत्त्यभावेन तस्यमिथ्यारूपत्वात् आह्चनाणी तवंमि निरओ चारित्तोभावणाए जोगोत्ति साचरागादि दोषनिदानस्वरूप विषयफलगोचरा यथागममेव मवसेयाजं कुच्छियाणुयोगोमय विशुद्धस्सहोइ



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



जीवस्सए एसिमोनियायं बुद्धाणनयस्स दरं एयं १ रूवं पिसंकिलेसोभिस्सं गापीइ माइखिंगोउ परमसुइपइणीउ एयंपि असोचयंचेव २ विस चयभंगुरोव लुगुणरहिओ तहयतहतहा रूवोयं मत्तिनिप्फलोकेवलं तुमुलं अणत्थायं ३ जम्मजरामरणाई विचित्तरूवोफलंतु संसारो दुक्खाण निव्वेयकरोए सोवितहाविशेषोचेव ४ अपिच सूत्रानुसारेण ध्यानादिषु यो नैरंतर्येणाभ्यासस्तद्रूपापि भावनावेदितव्या तस्यापिरागादिप्रति पक्षभूत त्वात् नहितत्वदृष्ट्या सम्यग् ध्यानाद्यभ्यासेव्यावृत्त मनस्कस्य स्त्रीशरीररमणीयकादि विषयेचेत: प्रवृत्तिमातनोति तथानुपलंभात् सोद्धोदनीया:पुन रेवमाहुर्नैरात्म्यादि भावनारागादि क्लेशध्वंसाविहेतु: नैरात्म्यादिभावनाया: सकलरागादि विपक्षभूतत्वात्तथाहि नैरात्म्यावगतोनात्माभिनिवेश: आत्म नोवगमाभावादात्माभि निवेशाभावाच्च न पुत्रकलत्रादिष्वात्मीयाभिनिवेश: आत्मनोहिय उपकारी स आत्मीयोयश्च प्रतिघातकः सद्वेष्य: यदात्मैवन विद्यतेकिंतु पूर्वापरक्षणतुटितानुसंधाना: पूर्वपूर्वहेतुप्रतिबद्धा ज्ञानक्षणा एकमयोत्पद्यंते तदाक: कस्योपकर्त्ता उपघात कोवात्क्षणानांक्षण मात्रावस्थायि तयापरमार्थत उपकर्त्तुमपकर्त्तुंवा अशक्यत्वात् तत्रतत्ववेदिन: पुत्रादिष्वात्मीयाभि निवेशोनापिवैरिषु द्वेषोयस्तुलोकानामात्मीयाद्यभिनिवेश: सो नादिवा सनापरिपाकोपानीतो वेदितव्यो तत्वमूलत्वात् ननुयदिन परमार्थत: कश्चिदुपकार्योपकार स्वभावस्तर्हि कथमुच्यते भगवान्सुगत: करुणयासकल सत्वोपका रायदेशनांकृतवानिति क्षणिकत्वमपि च यद्येकांतेनतर्हि तत्ववेदीक्षणानंतरं विनष्टः सन् न कदाच नाप्यहंभूयोभविष्यामीति जानान:किमर्थं मोक्षाय यत्नमारभते तदयुक्तमभि प्रायापरिज्ञानात् भगवान्हि प्राचीनायामवस्थायामवस्थित: सकलमपिजगत् रागद्वेषादि दु:खसंकुलमभिजानान: कथमिदं सकलमपि जगन्मयादु:खादुद्धर्त्तव्यमिति समुत्पन्नदयाविशेषो नैरात्म्यक्षणकत्वादि ममवगच्छन्नपितेषा सुपकार्यसत्वानां नि:क्लेशक्षणोत्पादनाय प्रजाहे तो राजेवस्वसंततिशुद्धौ सकलजगत्साक्षात्करण समर्थ स्वसंततिगत विशिष्टक्षणोत्पत्तये यत्नमारभ्यते सकलजगत्साक्षात् कारमंतरेण सर्वेषामक्षणविधान

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



सुपकर्त्तुमशक्यत्वात्तत: समुत्पन्नकेवलज्ञान: पूर्वाहित कृपाविशेष संस्कारवशात् कृतार्थोपि देशनायांप्रवर्त्तते इति तदेवं श्रुतमय्याम प्रज्ञयानिर्दोषं नैरात्मा
दिवस्तु तत्त्वंपरिभाव्यभाव तस्तथैवभावयतोजंतोर्भावना प्रकर्षविशेषतो वैराग्यमुपजायते ततोमुक्तिलाभ: यस्त्वात्मानमभिमन्यते न तस्यमुक्तिसंभवो यत
आत्मनिपरमार्थ तयाविद्यमानेतत्रस्नेह: प्रवर्त्तते तत:स्नेहवशाच्च त सुखेषुपरितर्षवान् भवति तृष्णावशाच्च सुखसाधनेषु दोषान् सतोपितिरस्कुरुते
गुणांश्चाभूतानपि पश्यति ततोगुणदर्शीसन्तानिमम इति विषयकरोतितस्मात् यावदात्माभिनिवेश: तावत्संसार: आह च य: पश्यत्यात्मानं तत्रास्याहमितिशा
श्वत:स्नेह:स्नेहात्सुखेषुतृष्यतितृष्णादोषांस्तिरस्कुरुते । गुणदर्शीपरितृष्यन्ममेति तत्साधनान्युपादत्ते तेनात्माभिनिवेशोयावत्तावत्ससंसारे २ तदेव
तदन्त:करणलता या समरासो रमणीयत्वाविलसितमात्मा भावेबंधमोक्षाद्येकाधिकरणत्वायोगात्तथाहि यदि नामाभ्युपगम्यते किन्तु पूर्वापरक्षण
त्रुटितानुसन्धानाज्ञानक्षणा एव तथा स सत्यन्यस्य बन्धोऽन्यस्य मुक्तिरन्यस्य क्षुदन्यस्य तृप्तिरन्योनुभविता अन्यस्मर्त्ता अन्यश्चिकित्सादु:खमनुभवति अन्यो व्याधि
रहितो जायते अन्यस्तप: परिक्लेशमधिसहते अपर: स्वर्गसुखमनुभवति अपर:शास्त्रमभ्यसितुमारभ्यतेअन्यो अधिगतशास्त्रार्थो भवति नचैतद्युक्तमतिप्रस
ङ्गात् सन्तानापेक्षया बन्धमोक्षाद्येकाधिकरण्यमिति चेन्नसन्तानस्यापि भवन्मतेनानुपपद्यमानत्वात् सन्तानोहि सन्तानिभ्यो भिन्नोवास्यादभिन्नो वा यदि
भिन्नस्तर्हि पुनरपि विकल्पयुगलमुपढौकते स किल नित्य: क्षणिको वा यदि नित्य स्ततो नतस्य बन्धमोक्षादि सम्भव आकालमेव स्वभावतया तस्यावस्था
वैचित्र्यानुपपत्ते: नच नित्यं किमप्यभ्युपगम्यते सर्वं क्षणिकमिति वचनात् अथ क्षणिकस्तर्हि तदेव प्राचीनं बन्धमोक्षादिवैयधिकरण्यं प्रसक्तं अथाऽभिन्न
इति पक्षस्तर्हि सन्तानि न एव न सन्तानस्तदभिन्नत्वात्तत्स्वरूपवत् तथाच सति तदवस्थमेव प्राक्तनं दूषणमिति स्यादेतन्न कश्चिदन्य: क्षणेभ्य: सन्तान:
किंतु यएव कार्यकारणभावप्रबंधेन क्षणानां भाव: सएव सन्तान: ततो न कश्चिद्दोष: तदप्ययुक्तं भवन्मते कार्यकारणभावस्याप्यघटमानत्वात् तथाहि प्रती

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



केशवेन किमिति पुरोयायिनः सर्वे पिहितनासिकाः समुत्त्रा समाद्धते ततः कोपि विदितवेद्यो विज्ञपयामास देवपुरो महापूतिगन्धिः श्वामृतो वर्त्तते
ततस्तद्गन्धमसहमानः सर्वोपि त्रासमगमत् केशवो महोत्तमतया तद्गन्धादनुत्रस्यन् तेन पथा गन्तुप्रवृत्तोऽचैक्षिष्ट मृतं श्वानं परिभावयामास च सकल
मपि तस्य रूपं ततो गुणमप्रशंसामकर्त्तुं सपकुर्वन् प्रशंसितुमारभते स्म अहो जात्यमरकतमय भाजनविनिवेशितमुक्ताफलश्रेणिरिव शोभते अस्य वपुषि
कालिमकलिते श्वेतदन्तपङ्क्तिरिति तां च प्रशंसा श्रुत्वा सविस्मयं सुरसद्मजन्मा चिन्तयामास अहो यथोक्तं मघवता तथैवेति ततो दूरंगते केशवे तद्रूपमु
पसंहृत्य कियत्कालं स्थित्वा गृहे केसवयुद्धपरिच्छानिमित्तं मंदुरागते मेकमश्वरत्नं सकललोकसमक्षमप हृतवान् धावितश्च मार्गतः सर्वोप्युत्तीर्णखड्ग
कुन्तादिरङ्गरक्षकादि पदाति वर्गसमुच्छलितश्च महान् कोलाहलो ज्ञातश्चायं व्यतिकरः केशवेन प्रधाविताश्च कोपं दिशो दिशं सर्वेपि कुमारा
युध्यन्ति च यथा शक्ति प्रहारान् परं सुरो दिव्य शक्त्या तान् सर्वानपि लीलया विजित्य मन्दं मन्दं गन्तुं प्रवृत्तस्ततः प्राप्तः केशवः पृष्टस्तेना
श्वापहारी भोः किं मदीयमश्वरत्नमपहरसि ततो तेनोक्तं सत्तोऽप्यपहर्तुं यदि पुनरस्ति ते कापि शक्तिस्तर्हि मां युद्धे विनिर्जित्य प्रतिगृहाण ततः
केशवस्तत्पौरुषरञ्जितमनस्कः सहर्षमेवमगादीत् भो महापुरुष येन युद्धेन ब्रूषे तेन युद्धेहं ततः सर्वाण्यपि युद्धानि केशवो नाम ग्राहं वक्तुं प्रवृत्तः प्रति

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



घोषति च सर्वोप्यसुरसद्मजन्मा ततो भूयः केशवो वदति कथय तर्हि केन युद्धेन युद्ध्येहमिति ततः स प्राह न युद्धेन ततः कर्णौ पिधाय शिक्षित
हृदय इव हा शब्दमाहार पुरस्सरं तं प्रत्येवमवादीत् गच्छगच्छाश्व रत्नमपि गृहीत्वा नाहं नीच युद्धेन युद्ध्ये इति तत एतत् श्रुत्वा
हर्षवशोज्जृंभित पुलकमालोपशोभितं वपुरादधानः सविस्मयं सुरसद्म जन्मा स्वचेतसि चिन्तयामास अहो महोत्तमता केशवानाम तएव
शतसहस्र संख्यानमदमरकिरीटकोटि संघर्षमसृणी कृतपादपीठानां मघवता मध्ये ते प्रशंसार्हास्तत एवं चिन्तयित्वासावानंदमवेक्षमाणो वक्तुं
प्रवृत्तो भोः केशवनाहमश्वापहारी किंतु त्वद्गुणपरीक्षानिमित्तमेवं कृतवान् ततः सकलमपि शक्रप्रशंसादिकं पूर्ववृत्तांतमचकत् ततः स्वगुणप्रशं
साश्रवणलज्जितोवनतमनाक्कन्धरः कुड्मलितकरसंपुटो जनार्दनसमुदंतपर्यंते मुत्कलयामासस्वस्थाने सुरोपि च सकलविश्वासाधारण केशवगुणदर्श
नतो हृष्टमनास्तं प्रत्येवमवादीत् महापुरुषदेवदर्शनममोघं मनुजजन्मनामिति प्रवादो जगतिप्रसिद्धोमाविफलतामापदितिवदकिञ्चिदभीष्टं येन करो
मीति ततः केशवोऽब्रवीत् वर्त्तते संप्रतिद्वारावत्यामशिवं ततस्तत् प्रविधानमातिष्ठयेन भूयोपि न भवति ततो गोशीर्षचन्दनमयीमशिवोपशमनीं देवो
भेरीमदात् कल्पं चास्याः कथयामास यथाषण्मास षण्मासपर्यंते निजास्थानमंडपेवाद्यैषा भेरी शब्दाश्चास्याः सर्वतो द्वादशयोजनव्यापी जलभृतमेघध्व
निरिवगम्भीरो विजृंभिष्यते यश्चशब्दं श्रोष्यति तस्य प्राक्तनोव्याधि नियमतोप्रयास्यति भावी च भूयः षण्मासादर्वाक् न भविष्यति तत एवमुक्त्वा
देवः स्वस्थानमगमत् वासुदेवोपि तां भेरीं सदेवभेरीताडननियुक्ताय समर्पितवान् शिक्षां चास्मै ददौ यथा षण्मासस्य पर्यंतेममास्थानमंडपेवाद्यै
षात्वयाभेरी यत्नतश्चावाचनीया ततः सकलस्वलोकसामंतादिवलसमन्वितानिजप्रासादमायासीत् मुत्कलितश्च प्रतीहारेण सर्वोपि लोकस्ततो द्वितीयदिवसे
मुकुटोपशोभितानेकपार्थिव सहस्रपर्युपास्यमानो निजास्थानमंडपे विशिष्टसिंहासनोपविष्टः शक्रएवदेवैः परिवृतो विराजमानस्तांभेरीं अताडयत् भेरीश

For Private and Personal Use Only

च्छ्रवणसमनन्तरमेव च दिनपतिकरनिकर ताडितमन्धकारमिव द्वारवतीपुरिसकलमपि रोगजालं विध्वंसमुपगमत् ततः प्रमुदितः सर्वोपि पौरलोकः आशास्ते च सदैवाधिपतित्वेन जनार्दनं ततः एवं व्याधिविकले गच्छति काले कोपि दूरदेशांतरवर्त्तीधनाढ्यो महारोगाभिभूतो भेरीशब्दमहात्म्यमाकर्ण्य द्वारावतीमगमत् सचदैव योगाद्भेरीताडनदिवसातिक्रमेप्राप्तः ततोऽचिन्तयत्कथमिदानीमहं भविष्यामियतो भूयो भेरीताडनं षण्मासातिक्रमे षड्भिश्च मासै रेषप्रवर्द्धमानो व्याधिरसूनपि नियमात्कवलयिष्यति ततः किं करोमीति ततः पूर्वं कतिपयदिनानि चिन्ताशोकसागरनिमग्नः कथमपि शेमुषीपोतमासाद्योन्मग्नो यथा यदि तस्याः शब्दतोपि रोगो प्रयाति ततस्तदेकदेशस्य घर्षित्वा पाने सुतरामपयास्यति प्रभूतं चमेस्व ततः प्रलोभयामि धनेन टाङ्किकं येन तच्छकलमेकमे समर्पयति ततः प्रलोभितो धनेन टाङ्किको नीसत्वाङ्ग दुष्टदारा इव निरन्तरं धनादिभिः सन्मान्यमाना अपि व्यभिचरंति निजपतेः ततस्तेन तच्छकलमेकं तस्मै व्यतीरिष्ट ततस्थाने च तस्यामन्यच्छकलं योजितं एवमन्यान्य देशांतरायातरोगिजनैन्योधनलुब्धतया खण्डखण्डप्रदाने सकलापि भेरी कंथेव खण्डसङ्घातात्मिका कृता ततोपगतो दिव्यप्रभावः ततस्तदवस्थमेवाशिवं प्रावर्त्तिष्टसमुत्थितश्चरोगो शिवप्रादुर्भावविषयः पौरजनानां विस्मयश्च महत्तरैर्जनार्द्दनो देवभूयोपि विजृम्भते वर्षासु कृष्णशर्वर्यामंधकारमिव परिहारवत्यां महदशिवं ततः प्रातरास्थानमण्डपे सिंहासने समुपविश्याकारितो भेरी ताडनानियुक्तः पुमान् दत्तश्चादेशोस्मै भेरीताडने ततस्ताडिता तेन भेरी साध्यगतदिव्य प्रभावाभंभाकारशब्देनास्थानमण्डपमात्रमपि पूरयति ततो विस्मितो जनार्द्दनो यथा किमेषाना स्थानमण्डपमपिभंभाकारशब्देन पूरयितुं शक्तवती ततः स्वयंनिभालयामास तां भेरीं दृष्टा च सा महादरिद्रकंथेव लघुलघुतरसकलसकलसंघातात्मिका ततश्च कोप तस्मै जनार्द्दनोरे दुष्टाधमकिमिदमकार्षी स्ततः सप्राणभयात्सकलमपि यथावस्थितमचीकथत्ततो महानर्थकारित्वात् सतत्कालमेव निरोपितो विनाशायततो भूयोपि जनार्द्दनो जनानुकंपया पौषधशालामुपग

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



ष्याष्टमभक्तविधानतस्तं देवमाराधयामास ततः प्रत्यक्षीबभूवदेवः कथितवांश्चजनार्द्दनः प्रयोजनं ततोभ्योपिदत्तवान् षशिवोप शमनीं भेरीतां चाप्तत्वे
मस्तुनिश्चितायत्कृष्णः समर्पयामास एषभेरीदृष्टांतःअयमर्थोपनयःयथाभेरी तथाप्रवचनावगतौसूत्रार्थौ यथाभेरीशब्दश्रवणातो रोगापगमस्तथासिद्धांतस्य प्रभा
वश्रवणातःजंतूनां कर्मविनाशस्ततोयः सूत्रार्थोवपांतरालेविस्मृत्यविस्मृत्यान्यतः सूत्रमर्थं वासंयोज्यकंथासमानो करोति सभेरीताडननियुक्तप्रथमपुरुषस
मानः सचैकांतेनायोग्यः यस्त्वाचार्यप्रणीतौ सूत्रार्थौ यथावदवधारयति सभेरी ताडननियुक्त पाश्चात्यपुरुषइव कल्याणसंपदेयोग्यः संप्रत्याभीरीदृष्टांतभा
वनाकश्चिदाभीरो निजभार्ययासह विक्रयार्थघृतंगंत्र्यां गृहीत्वापत्तनमवतीर्णश्चतुष्पथे समागत्यवणिगापणेषु पणायितुं प्रवृत्तोघटितश्चपणाया सकटस्ततः
समारब्धे घृतमापिगंत्र्या अधस्तादवस्थिताभीरी घृतंभर्त्तावारकेण समर्प्यमाणं प्रतीच्छतिततः कथमप्यर्पणे ग्रहणेवानुपयोगतोपांतराले वारकापरपर्यायो
लघु घृतघटोभूमौनिपत्यखंडशोभग्नः ततोघृतहानिदूनमनाः पतित्तपितुं खरपुरुषवाक्यानि प्रावर्त्तते यथा हापीयसि दुःशीलेकामविडंबितमानसा
तरुणतरुणीमाभिरमणीयं पुरुषांतरमवलोकसेन सम्यग् घृतघटमभि गृह्णासि ततः सा खरपुरुषवाक्य श्रवणतः समुद्भूतकोपावेशोच्छलित कम्पितपीनपयो
धरास्फुरदधरविम्बोष्ठीदूरोत्पाटि तभ्रूरेखाधनुरवष्टंभतोनाराच श्रेणिमिव कटाक्ष संततिमविरतं प्रतिक्षिपंती प्रत्युवाच हाग्रामेयकाधमघृतघटम
प्यवगणय्यविदग्धमत्तकामिनीनां मुखारविन्दान्यवलोकसेनचेतावतावतिष्टते ततः खरपरुषवाक्येमामप्यधिक्षिपति ततः स एवं प्रयुक्तोऽतीव ज्वलित कोपा
नलोपिय त्किंचिदसम्बन्धं भाषितुं लग्नः साप्येवंततः समभूत्तयोः केशाकेशिततोविसंस्थुलपादादिन्यासतः सकलमपि प्रायोगंत्रीघृतंभूमौनिपतितंतच्चकिंचि
च्छेषमपगतमवशेषंचावलीढंश्वभिर्गंत्री घटमपिशेषीभूतमपहृतंपश्चतोहरैः सार्थिका अपिस्वंस्वघृतं विक्रीयस्वग्राममगमनं प्रपन्नास्ततः प्रभूतदिवसभागाति
क्रमे णापहृते सुखेस्वास्थ्ये च लब्धयत्किंचित्प्रथमतोविक्रयामासतुर्घृतंतत्द्रव्यमादायतयोः स्वग्रामंगच्छतोरपांतरालेस्तंगतोसहस्रभानौसर्वतःप्रसरमभिगृह्णाति



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



तमोवितानेपरास्कंदिनः समागत्यवासांसि द्रव्यंवलीवर्दौचापहृतवंतस्ततएवंतौ महतोदुःखस्यभाजनमजायतां एषदृष्टान्तोयमर्थोपनयः योविनेयोऽन्यथा प्ररूपयन्नधीयानोवाकथमपि खरपुरुषवाक्यैराचार्येण शिक्षितोधिक्षेपपुरस्सरंप्रतिवदति यथात्वयैवेत्थमहं शिक्षितः किमिदानींनिदुषेइत्यादि सन केवलमात्मानं संसारेपातयति किंत्वाचार्यमपि खरपरुषप्रत्युच्चारणादिना तीव्र तीव्रतरकोपानलज्वालनात् भवंतिच कुविनेया स्ततोऽपि गुरोःखरपरुषप्रत्युच्चारणादिनाऽकोपप्रकोपकाः यतउक्तमुत्तराध्ययनेषु अणासवाथूलवयाकुसीलामिउंपिचण्डंपकरेंतिसीसा इति अपिच गुणगुरवो गुरवभूतस्तेयदिकथमपि दुष्टशिष्यशिक्षापनेन कोपमुपागमत् तथापि तेषां भगवदाज्ञाविलोपतोगुर्वीशातनाततश्चोपचिता शुभगुरुकर्मनियमतो दीर्घतरसंसारभागी किंचैवं सदसंमानोमतिमानपि श्रुतरत्नाद्वहिर्भवति अन्यत्रापि तस्य दुर्लभश्रुतत्वात् कोहिनाम सचेतनो दीर्घतरजीविताभिलाषी सर्पमुखे स्वहस्तेन पयोविंदून् प्रक्षिपतीति सचएकान्तेनायोग्यः प्रतिपक्षभावनायामपीदमेव कथानकंपरिभावनीयं केवलमिह घृतघटेभग्ने सातद्दावपितौ दम्पती त्वरितं त्वरितं कर्परेयथाशक्ति घृतंगृहीतवंतौस्तोकमेव विनष्टं निर्वृतिचात्मानमाभीरो यथाहीनमयाघृतघटस्ते सम्यक्तमर्पित आभीरीविवदति समर्पितस्त्वयासम्यक्परंनमयासम्यग्गृहीतस्तत एवं तयोर्नकोपावेशदुःखंनापि घृतहानिर्नापि सकालएवान्यसार्थिकैः सह स्वग्राममभिगमनंततोमार्गान्तराले तस्करावस्कंदः ततस्तौ सुखभाजनं जातौएवमिहापि कथंचिदनुपयोगादिनान्यथा रूपव्याख्याने कृतेसतिपश्चादनुस्मृत यथावस्थितव्याख्यानेन सूरिणाशिष्यं पूर्वमुक्तं व्याख्यानस्थितमेतं प्रत्येवं वक्तव्यंतत्समेवंव्याख्याः मया तदानामनुपयुक्तेन व्याख्यातं ततएवं व्याख्यादितत् एवमुक्तेसतियोविनेयः कुलीनो विनीतात्मा स एवं प्रतिवदतियथा भगवन्तः किमन्यथाप्ररूपयंति केवलमहंमतिदोषवलादन्यथावगतवानिति स एकान्तेनयोग्यः एवंविधाश्चविनेयाः प्रज्ञादितगुरुमनसः श्रुतार्णव पारगामिनोजायन्ते चारित्रसम्पदश्चभागिनस्तदेवमेकैकं शिष्यमधिकृत्ययोग्यायोग्यत्वविभागोपदर्शनं कृतं सम्प्रतिसामान्यतःपर्षदोयोग्यायोग्यरूपतया निरूपयतिसास्मासतोतिवि

For Private and Personal Use Only

हेत्यादि सापर्षत्समासतः संक्षेपेण त्रिविधात्रिप्रकारा प्रज्ञप्तातीर्थकरगणधरैरितिगम्यते पर्षदितिकथंलभ्यते इतिचेत् उच्यते इह प्रागुक्तं प्रारम्भणीयः
प्रवचनानुयोगइति अनुयोगश्च शिष्यमधिकृत्यप्रवर्त्तते निरालम्बनस्य तस्या भावात्ततःसामर्थ्यात्सेत्युक्तं पर्षदितिलभ्यते तद्यथेत्यु दाहरणोप दर्शनार्थंजाणिय
त्तिज्ञा अववोधनेआमातीति ज्ञाइगुपांत्यप्रीत्वग्इ त्तः कः इतिकः प्रत्ययः इटि धातोर्लोपइत्याकारलोपः ततो अजाद्यतइतिस्त्रियामा पश्चैवज्ञिकास्सा
र्थिकः कः स्वज्ञाअभस्त्राधातुप्रयकादित्यायः स्थानेइकारादेशः कः प्रत्ययाश्चपरतः स्त्रियामप् तत् सिद्धंज्ञिकेतिज्ञिकानाम परिज्ञानवतीकिमुक्तं भवतिकुपथ
प्रवृत्तपाषंडमतेनादिग्धांतः करणागुणादोष विशेष परिज्ञानकुशलासतामपि दोषानामपरिग्राहिका केवल गुणदोसविसेसस्स अनभिग्गहियायकुसइमए
सु एसाजाणगपरिसागुणतित्तिऽल्ला अगुणवज्जा तत्रगुणतत्तिऽल्लेतिगुणेषुयत्नवता गुणग्रहणपरायणा इत्यर्थःअगुणवज्जेति अगुणान्दोषान् वर्जयति

सू०

## समासओतिविहापसत्तातंजहाजाणिया१ अजाणिया२ दुव्विअड्ढाजेजाणियाजहाखीरमिवजहाहंसाजेघुट्टंतिइहगुरुगु

भाषा

संक्षेप थी सामान्य प्रकारे ते परषदानो विचारः ति० त्रिणप्रकारनी प० परुपी तिर्थंकरदेव तं० तेजिम छे तिम कहे छे जा० सुत्रादिक घणी वारसां
भलवे करी जाणपरखदा तेह सरीखाश्रोता १ अ० अजाणश्रोता ते प्रकृतिनो भद्रीकपरखदाते समभता सोहिलीरदु० इग्धवीजवोवते इवेटा वक्र आपा
रीते कह्यो न माने ते श्रोता समभतां दोहिलीः३ जा० जाण श्रोतानो परषदा छे तेज० जिमखी० दुध ते जिम दुधपाणीस्युं मिश्र हवे ते दुधज० जि
मह्ं० हंस जि० ते दुध पीवे पाणी तजे ते इमजे हंसनी जिभ्या खाटी हवेछे ते भणीजे तवे चांचवोले नेतले दुध वीतरडी जाइ जिवारे वलख्या थाइ
तिवारे तेह सपाणी छांडे दुधना वलखाखाइ इमदुध पीवे पाणी तजे इ० तिमइहांपणि ते गुरुनावचनरुप दुधरछे ते पीवे अनेदो० जे पांणीरुपदोषवि०

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



सतोपि न स्टक्षातीत्यगुण वर्जीतया अधिकाधिकाविलक्षणास्यक् परिज्ञानरहिताकिमुक्तं भवति योताम्रचूडकंठीरवकुरङ्ग पोतवत् प्रकृत्यामुग्ध स्वभावा असंस्थापित जात्यरत्नमिवांतर्विशिष्ट गुणसद्भावसुख प्रज्ञापनीयपर्षत् सा अधिका ऽज्ञस्य पगदूसङ्ग अयाणियमिगच्छावगसीह कुकुडगभूया रयण मिव असंठवियासुहसणप्पागुणसमिद्धा हूड मिगसावगसीह कुकुडगभूयत्तिसाय शब्दोग्रे सम्बध्यते ततोयग सिंह कुर्कुटपातभूता इत्यर्थः असंठवियत्ति असंस्थापिता असंस्कृतादृत्यर्थः सुखसंज्ञाप्यासुखेन प्रज्ञापनीया तयादुव्वियड्डदंत्ति दुर्विदग्धामिथ्याहंकारविडंबिता किमुक्तं भवति यातत्तद्गुणज्ञापायोग मनेन कतिपय पदान्युपजीव्य पांडित्याभिमानी किंचिन्मात्रमर्थपदं सारंपल्लव मात्रं वा श्रुत्वातत्तकंजिज पांडित्यख्यापनायामभिमान तोऽवज्ञापश्यतिकर्ज्जं कथ्यमानंचात्मनो बहुश्रुतासुचनया याग्रे त्वरितंपठति सापर्षत् दुर्विग्धेत्युच्यते उक्तस्व किंचिन्मात्रग्राही पल्लवग्राहीय दुव्वियडढियाउ एसाभणियातिविहाभ वे परिसा सम्यक्त्वां चतस्र्णां पर्षदां मध्ये आद्ये द्वे पर्षे दावनुयोग्ये तृतीया त्वयोग्या यदाह चूर्णिकृत् एत्थ जाणिया अजाणियाय परिसादुवियडढाअण

जसमिद्धा दोसेयविवज्जंती तं जाणसु जाणियंपरिसं १ अजाणियाजहा जाहोइपगइमहुरा मियच्छावयसीहकुकुडग



कंडिपिणावे छ आपसमे अथवा देवानही जेइ स्यांके ते जाणसुष्टपरखदा तं० ते ज्ञानवन्तपरखदाने समझावतां सोहीली छे जा० ते सर्वज्ञाणे ते भणी जाणश्रोतानी परखदा कहीये १ अ० अजाणश्रोताते ज० जिमहष्टांत कहे छे कोइ पुरुष एहवा होईके तेह प० सभावेजप्रकृतिना भद्रीक म० स्वभावे भोलाते केहवाछ मि० जिमहरगलोमागा० वालबाक सी० सींहनाजेवालक कु० वलीजेहवोकुकडानो वालक सु० सुघटाना वालकमेयनमावालकमोरपंखी नावालक तेहने जेहवो सीखाये तेहवो असीखे तिवारे र० रत्ननी परे अ० जे अण समार्यो रत्नतेकधरो टाल्या पछे दहदीप्यमान थाइ तिम ते० ते

रिक्षा इति तत् श्राद्य एव हे अधिकृत्यानुयोग: प्रारंभणी यो न्नदुर्विदग्धामाभूदाचार्यस्य निष्फल: परिश्रमस्तस्याश्च दुरन्तसंसारोपनिपात: साहित्त शास्त्राभाव्यात् यत्किमप्यर्थपदं शृणोति तदप्यवज्ञया श्रुत्वा च सारपदमन्यत्र सर्वंजानाति यापि निजपाण्डित्याभिमानतो महतो महीयसोऽवमन्यते तदव ज्ञया च दुरन्तसंसाराभिष्वङ्ग इति स्थितं तदेवमभीष्टदेवता सवादिसम्पादितसकल सौहित्यो भगवान् दूष्यगणिपादोपसेवी पूर्वान्तर्गतसूत्रार्थधारको देव वाचको योग्यविनय परीक्षां कृत्वा सम्प्रत्यधिकृताध्ययन विषयस्य ज्ञानस्य प्ररूपणां विदधाति नाणं पंचविहं पण्णत्तमित्यादि ज्ञातिर्ज्ञानं भावे अनग प्रत्यय: अथवा ज्ञायते वस्तुपरिच्छिद्यते अनेनेति ज्ञानं करणे अनट् येषान्तु व्युत्पत्तयो मंदमतीनां संमोहहेतुत्वान्नोपदिश्यन्ते पञ्चते सङ्ख्यावाचकं विधा नं विधा उपसर्गादातङ इत्यङ्प्रत्यय: पञ्चविधा: प्रकारा यस्य तत्पञ्चविधं पञ्चप्रकारं प्रज्ञप्तं प्ररूपितं तीर्थंकरगणधरैरिति सामर्थ्यादवसीयते अन्यस्य स्वयं प्ररूपकत्वेन प्ररूपणा सम्भवात् उक्तञ्च अत्थं भासइ अरहा सुत्तं गुंथंति गणहरानि उणा सासणस्स हियट्ठाएततोसुत्तं पवत्तई एतेन स्वमनीषिका व्युदासमाह अथवा प्रज्ञा बुद्धिस्तया आप्तं तीर्थंकरगणधरैरिति गम्यते प्रज्ञप्तं किमुक्तं भवति सर्वं वाक्यं सावधारणं भवतीति न्यायात् अवश्यमिदं वाक्य

सू० भूयारयणमिव्वअसंठविया अजाणियासाभवेपरिसा२ दुब्विअड्ढाजहानयकत्थइनिम्माओनयपुच्छइपरिभवस्सदोसेणवत्थि

भाषा अजाण भोळी परखदा छे ते० तेपरखदाने समझावतां सोहि लोभ० होइ पु० ते परखदाने जेहवो सीखावे तेहवोज सीखेते अजाणश्रोतानी परखदा समझता सोहीली२ दु० दुविडढा परखदा ते दग्धबीज सरीखी जाणवी ते दग्धबीजे तिम न० कोइ गुरुनाँथाप्या नथी तेहने कोइ गुरु नथी १ नि० नि श्चविनयकरीने कोइने गुरु नथी कीधो न० कोईने धर्म पूछे पणिनहो अभिमान भणी खंडरपांडित प० हुं पंडितछुं इस्यु थको तेअभिमानी मिथ्याती

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



मवधारणीयं ततोयमर्थः ज्ञानं तीर्थंकरैरपि सकलकालावलंबि समस्तवस्तु स्तोमसाक्षात्कारि केवलप्रज्ञया पञ्चविधमेव प्राप्तं गणधरैरपि तीर्थकृद्भिरुपदिश्य
मानं निजप्रज्ञाया पञ्चविधमेव प्राप्तं नतु वक्ष्यमाणनीत्यादिभेदमेवेति अथवा प्राप्ताप्तीर्थकरादाप्तं प्राप्ताप्तं गणधरैरिति गम्यते अथवा प्राप्तं गणधरै

व्ववायपुन्नो फ ट्टे डूगामिल्लयविय ड्ढो नाणंपंचविहं पन्नत्तंतंजहा आभिणिबोहियनाणं१ सुयनाणं२ ओहिनाणं३ मनप

कदा ग्रहग्रसिओ ऊंतो पणिते रुप: दो० दोष सहित छे पणि किरोक छे ते कहे छे व० तेदीवडीम सकनो परिजाणवावा० वायरे पुरी सरिखादी
सेतेजिमदीवडी वायरे करी भराणीदीसे तिम फू० वाहिर अने मांहि ग्रामना लोकाना आगे पंडित सरीषो दिसे महाजिसारछे टू० तिम दुवियड्ढा
पुरुष असार फोक वटा करे ते भोला लोक ते मध्ये वेठो रीझवे जिवारे पंडित कोइ आलीने आवे तिवारे नि:सार थको कदाग्रहनो सरणग्रहे तेरुप
रखदा ना श्रोता अने अजोग्य छे ते· ए त्रिणमध्ये १ अजोग्य छे ते एह त्रीजी परषदामा तेह प्रते नंदीयादिक श्रुतज्ञानादिकनो स्वरुपन कहिवो२
हिवे विरुं योग्य पूर्वला तेह प्रते ज्ञाननो स्वरुप कहिवो हिवे ज्ञान कहे छे से० ते अथ हिवे कि० कुणना० ते ज्ञान जेजाणवुं अथवा० जिणे करीने
जाणीए ते ज्ञानना पं० पांचप्रकारना प० तीर्थंकरे अर्थे करी गणधरा सूत्रे करी कह्या तथा आपणी प्रज्ञा थकी जिम जोइ अर्थ कह्यो तिवार
११ वोलजाणी प्रज्ञा थी गणधरे सूत्र रच्या आ० आपणीईज जाणीइ निर्मलीमति करी जाणेइ हा० आपणी क्षयोपसमनी विषयनी मर्यादा सहित
अभि० अर्थना जाणपणाने सन्मुख अविपरीतपणा थकी नि० नियत ते निश्चय संसारहितपणा थकी बो० जाणवु ना० ज्ञान१ सु० श्रुत करीने सांभल्या
थी रुपी अरुपी भावसूत्रे करी जाणे२ उ० रुपीभाव प्रमाणुयादिक पदार्थ जाणे देखे३ म० गर्भज पंचेन्द्रीपर्याप्ताना प्रवर्त्तामनो भावउपयोगे जाणे देखे

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



रात्रं प्राज्ञा म तीर्थकरादित्यनुमीयते तद्यथेत्युदाहरणोपदर्शनार्थः आभिनिबोधिकज्ञानं श्रुतज्ञानं अवधिज्ञानं मनः पर्यायज्ञानं केवलं ज्ञानं तत्रार्थाभिमुखो नियतः प्रतिनिश्चत्स्वरूपो बोधो बोधविशेषो अभिनिबोध एवाभिनिबोधक अभिनिबोध शब्दस्य विनयादिपाठाभ्युपगमात्द्विषयादिभ्यः इत्य नेनसार्थे इकणप्रत्ययः १ अतिवर्त्तन्ते स्वार्थप्रत्ययकाः प्रकृतिलिङ्गवचनानिति वचनादत्र नपुंसकता यथा विनयएव वैनयिकमित्यत्र अथवाभिनिबुध्यते अने नास्मादस्मिन्वेति अभिनिबोधस्तदावरणकर्मक्षयोपशमस्तेन निर्वृत्तमाभिनिबोधिकं आभिनिबोधिकं च तत् ज्ञानं च आभिनिबोधिकज्ञानं इन्द्रियमनो निमित्तो योग्यदेशावस्थितवस्तुविषयः स्फुटप्रतिभासो बोधविशेष इत्यर्थः तथा श्रवणं श्रुतं वाच्यवाचकभावपुरस्सरीकरणेण शब्दसंसृष्टार्थग्रहण हेतुरुप लब्धिविशेषः एवमाकारवस्तु जलधारणाद्यर्थक्रियासमर्थं घटशब्दवाच्यमित्यादिरूपतया प्रधानीकृतत्रिकाल साधारणसमानपरिणामः शब्दार्थपर्यालोचना नुसारी इन्द्रियमनो निमित्तोऽवगमविशेष इत्यर्थः श्रुतंच तत् ज्ञानं च श्रुतज्ञानं तथाऽवशब्दोऽधः शब्दार्थः अव अधोधो विस्तृतं वस्तु धीयते परिच्छिद्यते नेनेत्यवधिः अथवा अवधिर्मर्यादारूपिष्वेव द्रव्येषु परिच्छेदकतया प्रवृत्तिरूपा तदुपलक्षितं ज्ञानमप्यवधि यद्वा अवधानमात्मनोर्थे साक्षात्करणव्यापारोऽ वधिरवधीश्चासो ज्ञानं चावधिज्ञानं तथा परिः सर्वतोभावेऽवनं अवः तुदादिभ्यो न क्तावित्यधिकारेऽकितौ चेत्यनेनौणादिकोऽकार प्रत्ययः अवनं गमनं वेदनमिति पर्यायाः परि अवः पर्यवः मनसि मनसोर्वा पर्यवः मनःपर्यवः सर्वतोमनो द्रव्यपरिच्छेद इत्यर्थः अथवा मनःपर्यय इति पाठःतत्र पर्ययः भावेऽल् प्रत्ययः मनसि मनसो पर्ययो मनःपर्ययः सर्वतस्तत्परिच्छेदइत्यर्थःसचासौ ज्ञानं च मन पर्यायज्ञानंअथवा मनः पर्यायज्ञानमितिपाठःतत्र मनांसि मनो द्रव्याणि पर्यायेति सर्वात्मना परिच्छिनत्ति मनःपर्यायं कर्मणाणिति अण् प्रत्ययः मनः पर्यायं च तत् ज्ञानं च मनःपर्यायज्ञानं यद्वा मनसः पर्यायाः मनः पर्यायाः पर्यायाः भेदाधर्मा बाह्यवस्त्वालोचना प्रकारा इत्यर्थः तेषु तेषां वासं बन्धिज्ञानंमनः पर्याय ज्ञानं तथा केवलमेकमसहायं मत्यादिज्ञाननिर

For Private and Personal Use Only

पेचत्वात् केवलज्ञानप्रादुर्भावे मत्यादीनामसम्भवात् ननु कथमसम्भवो यावतामतिज्ञानादीनि स्वस्वावरणक्षयोपशमेपि प्रादुःषन्ति ततो निर्मूलस्वस्वावरण विलयेतानि सुतरां भविष्यन्ति चारित्र परिणामवत् उक्तञ्च आवरणदेसविगमे जाइं विज्जंति मइ सुयाइंति आवरणसव्वविगमे कहतांइ नहोंति सव्वजीवस्स १ उच्यते इह यथा जात्यस्य मरकतादिमणेर्मलोपदिग्धस्ययावन्नाद्यापि समूलमलापगमस्तावद्यथा यथा देशतो मलविलयस्तथा तथा देशतोऽभिव्यक्तिरुपजायते साच क्वचित् कदाचित्कथंचिद्भवतीत्यनेक प्रकारो तथात्मनोपि सकलकाल कलापावलं विनिखिलपदार्थ परिच्छेदकरणैक पारमार्थिक स्वरूपस्याप्यावरणमलपटलतिरोहित स्वरूपस्य यावन्नाद्यापि निखिलकर्ममलापगमस्तावद्यथा देशतः कर्ममलो छेदस्तथा देशतस्तस्य विज्ञप्तिरुज्जृंभते सा च क्वचित्कदाचित्कथंचिदित्यनेकप्रकारा उक्तं चमलविद्दमणिर्व्यक्तिर्यथानेकप्रकारतःकर्मविद्धात्मविज्ञप्तिस्तथानेकप्रकारतः१ साचानेकप्रकारतामतिश्रुतादिभेदेनावसेया ततो यथामरकतादिमणेरशेषमलापगमसंभवे समस्तानेकप्रकारतः साचानेकव्यक्तिव्यवच्छेदेनपरिस्फूटरूपैकभिव्यक्तिरुपजायते तद्वदात्मनोपिज्ञानद



**ज्ञवनाणं केवलनाणं५तंसमासओदुविहंपन्नत्तंतंजहापच्चक्खंच१ परोक्खंच२सेकिंतंपच्चक्खंपच्चक्खंदुविहंपन्नत्तंतंजहा**



ते मनःपर्यवज्ञान के० घातिया कर्मक्षयकरीने जे ग्यान पांमे तिणे करी सकललोकना द्रव्य जाणे देखे ते इहां ४ ग्यानना प्रयोजन केवलीने नथी ४ ग्यान नो उपयोगी केवली नथी अप्रतिपाति उपयोगछे केवलीनो४ ज्ञान आव्या जाइ केवलग्यान आव्यो नजाइ ५ तं० तेवली स० संक्षेप थी ज्ञानना दु० वेभेद प० परूप्यो कह्यो तिर्थंकरे त० ते जिम छे तिम कहे छे प० जेहवस्तु प्रत्यक्षजाणीये ते जिम मिश्री मीठी तेजीभ सुंजाणी तिम जाणे एह प्रत्यक्ष १ प० परोक्ष ते अदृष्ट करी जाणे सांभल्यावत्२ तेभणीज्ञाननावे भेद प्रत्यक्ष १ परोक्ष२ से० ते हिवे कि० कुण प०प्रत्यक्षज्ञानना छे गोतम प्रत्य

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



शेषचारित्र प्रभावतो निःशेषावरणप्रहाणादशेषदेशज्ञानव्यवच्छेदेनैक रूपा अतिपरिस्फुटा सर्ववस्तुपर्याय साक्षात्कारिणी विज्ञप्तिरुल्लसति तथाचोक्तं यथा जात्यस्य रत्नस्य निःशेषमलहानितः स्फुटैकरूपाभिव्यक्तिर्विज्ञप्तिस्तद्वदात्मनः १ ततो मत्यादिनिरपेक्षं केवलज्ञानं अथवा शुद्धं केवलं तदावरणमल कलंकस्य निःशेषतोऽप्यपगमात् सकलं वा केवलं प्रथमत एवाशेष तदावरणापगमतः संपूर्णोत्पत्तेः असाधारणं वा केवलं अनन्यसदृशत्वात् अनन्तं वा केवलं ज्ञेयानन्तत्वात् केवलं च तत् ज्ञानं च केवलज्ञानं ननु सकलमपीदं ज्ञानं ज्ञैकस्वभावं ततो ज्ञैकस्वभावत्वाविशेषे किं कृता एष आभिनिबोधकादि भेदो ज्ञेय भेदकृत इति चेत् तथाहि वार्त्तमानिकं वस्त्वाभिनिबोधिकज्ञानस्य ज्ञेयं त्रिकालसाधारणः सामान्य परिणामो ध्वनि गोचरः श्रुतज्ञानस्य रूपिद्रव्याण्यवधिज्ञानस्य मनोद्रव्याणि मनःपर्याय ज्ञानस्य समस्तपर्यायान्वितं सर्ववस्तु केवलज्ञानस्य तदे तदसमीचीनमेवं सति केवलज्ञानस्य भेदबाहुल्य प्रसक्तेः तथाहि ज्ञेयभेदात् ज्ञानस्य भेदः यानि च ज्ञेयानि प्रत्येकमाभिनिबोधकादि ज्ञाना नामिष्यन्ते तानि सर्वाण्यपि केवलज्ञानेपि विद्यन्ते अन्यथा केवलज्ञानेन तेषामग्रहणप्रसङ्गादविषयत्वात्तथा च सति केवलि नोप्यसर्वज्ञत्वप्रसङ्गः आभिनिबोधिकादि ज्ञानचतुष्टयविषयज्ञानस्य तेनाग्रहणाच्च नैतदिष्टमिति अथोच्यते प्रतिपत्तिप्रकारभेदत आभिनिबोधिकादि भेदः तथाहि न यादृशी प्रतिपत्तिराभिनिबोधिकज्ञानस्य तादृशी श्रुतज्ञानस्य किं त्वन्यादृशी एवमवध्यादिज्ञानानामपि प्रतिपत्तव्यं ततो भवत्येव प्रतिपत्तिभेदतो ज्ञानभेदः तदप्ययुक्तमेव सत्येकस्मिन्नपि ज्ञानेऽनेकभेदप्रसक्तेः तथाहि तद्देशकालपुरुष स्वरूपभेदेन विविच्यमानमेकैकं ज्ञानं प्रतिपत्तिप्रकारात्यन्तं प्रति पद्यते तन्नायोपि पक्ष श्रेयान् स्यादेतदस्त्यावारकं कर्म तच्चानेकप्रकारं ततस्तद्भेदात् तदावार्यं ज्ञानमप्यनेकतां प्रतिपद्यते ज्ञानावारकं च कर्म पञ्चधा पञ्चा पनादौ तथाभिधानात्ततो ज्ञानमपि पञ्चधाप्ररूप्यते तदेतदतीव युक्त्यसङ्गतं यत आवार्यापेक्षयावारकमत आवार्यभेदेन तद्भेदः आवार्यं च यदिरूपापि



For Private and Personal Use Only

यथा सकलमप्येकरूपं ततः कथमाकारकस्य पञ्चरूपता येन तद्भेदात् ज्ञानस्यापि पञ्चविधो भेदः उच्यते अत्र स्वभावत एवाभिनिबोधिकादिको ज्ञानस्य भेदो नच स्वभावः पर्यनुयोगमश्नुते न खलु किमिन्धनो दहति नाकाशमिति कोपि पर्यनुयोगमाचरति यतो महती मही यतो भवतः चेतसि ननु यदि स्वभावत एवाभिनिबोधादिको ज्ञानस्य भेदस्तर्हि भगवतः सर्वज्ञत्वहानिप्रसङ्गस्तथा हि ज्ञानमात्मनो धर्मस्तस्य चाभिनिबोधादिको भेदः स्वभावत एवाभिनिबोधादिको ज्ञानस्य भगवतः भेदः स्वभावत एव व्यवस्थितः क्षीणावरणस्यापि तद्भावप्रसङ्गः सति च तद्भावे मत्याद्युपयोगस्येव भगवतोऽप्यसर्वज्ञत्वमापद्यते केवलज्ञानभावतः समस्तवस्तुपरिच्छेदाभ्यासर्वज्ञत्वमिति चेत् ननु यदा केवलोपयोगसम्भवस्तदा देशतः परिच्छेदसम्भवात् मत्याद्युपयोगस्येव तस्यापि बलादेवासर्वज्ञत्वमापद्यते नच वाच्यं तस्य तदुपयोग एव न भविष्यति आत्मस्वभावत्वेन तस्यापि क्रमेणोपयोगस्य निवारयितुमशक्यत्वात् केवलज्ञानानन्तरं केवलदर्शनोपयोगवत् अतः केवलज्ञानोपयोगकाले सर्वज्ञत्वं शेषज्ञानोपयोगकाले वा सर्वज्ञत्वमापद्यते तच्च विरुद्धमतोऽनिष्टमिति आह च सत्तेगसब्भावत्ते णाभिणिबोहाइ किंकओ भेदो नय विसेसाभेन सव्वविसयं च ओयरिमं अह पडिवत्तिविसेसा णेगंमि खेगमेयभावाओ आवरणविभेओ विक्कसभावभेयं विणा न भवे तम्मि य सइ सव्वेसिं खीणावरणस्स पावई भावो तब्भावत्ता उ भियजुत्तिविरोहाओ जाणिज्जो परउवि असव्वन्नू आभिणिबोहाइ भावओ नियमा केवलभावाओ चेव सव्वन्नू णणु विरुद्धमिणं तस्मादिदमेव युक्तियुक्तं पश्यामो यदुतावग्रहज्ञानादारभ्य यावदुत्कर्षप्राप्तं परमावधिज्ञानं तावत्सकलमप्येकं तच्च सकलसंज्ञितमशेषवस्तुविषयत्वाभावात् अपरं च केवलिनस्तच्च सकलसंज्ञितमिति द्वावेव भेदौ उक्तं च तम्हा अवग्गहाओ आरब्भ इगमेव नाणंति जुत्तं छउमत्थस्सासगलं इयरं च केवलिणो अत्र प्रतिविधीयते तत्र यत्तावदुक्तं सकलमपीदं ज्ञानं ज्ञस्येकस्वभावं ततो ज्ञस्येकस्वभावत्वाविशेषे किंकृत एष आभिनिबोधादिको भेद इति तत्र ज्ञस्येकस्वभावता किं सामान्यतो भवताभ्युपगम्यते विशेषतो वा तत्र न तावदाद्यः पक्षः क्षितिकाधर्मे सिद्धसाध्यतया तस्य बाधकत्वा

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



योगात् बोधस्वरूपता रूपसामान्यापेक्षया हि सकलमपि ज्ञानमस्माभिरेकमभ्युपगम्यत एव ततः कोमोऽज्ञामिरिति अथ द्वितीयः पक्षस्तदयुक्तमसिद्धत्वात्
नहि नामविशेषतोपि ज्ञानमेवोपलभ्यते प्रतिप्राणिस्वसंवेदनप्रत्यक्षेणोत्कर्षापकर्षदर्शनात् अथ यद्युत्कर्षापकर्षमात्रभेददर्शनात् ज्ञानभेदस्तर्हि तावुत्कर्षाप
कर्षौ प्रतिप्राणिदेशकालाद्यपेक्षया शतसहस्रशो भिद्येते ततः कथं पञ्चरूपतानैषदोषः परिस्थूरनिमित्तभेदतः पञ्चधात्वस्य प्रतिपादनात् तथाहि सकल
घातिक्षयो निमित्तं केवलज्ञानस्य मनः पर्यायज्ञानस्य थामर्षौ षध्यादिलब्ध्युपेतस्य प्रमादलेशेप्यकलंकितस्य विशिष्टो विशिष्टाध्यवसायानुगतोऽप्रमादः
तं संजयस्स सव्वप्पमायरहियस्स विविहरिद्धिमतो इति वचनप्रामाण्यात् अवधिज्ञानस्य पुनस्तथाविधानिन्द्रियं रूपिद्रव्य साक्षादवगमनिबंधनं क्षयोपशम
विशेषः मतिश्रुतज्ञानयोस्तु लक्षणभेदादिकं तथाग्रे वक्ष्यते उक्तं च नत्तेगसाकारवत्तं उहेय विसेसउपुण अविसिट्ठं एग ततससहावत्तणाउ कहवाणिवुट्टीओ१
जं अविचलिय सहावे तत्ते एगं ततस्सहावत्तं नयतं तद्देवलद्धा उक्करिसावगरिसविसेसा २ तम्हापरिपूराओ निमित्तभेदाओ समयसिद्धाओ उववत्तिसंग
उविय आभिणिबो हाइओभेओ३ घाइक्खओनिमित्तं केवलनाणस्स वन्निओसमए मणपज्जवनाणस्सओतहाविहो अप्पमाउत्ति४ ओहीनाणस्सतहा अणिं
दिए सुंपिजोखओवसमो मइसुयनाणाणं पुणलक्खणभेयादिउभेउ यदप्युक्तं ज्ञेयभेदकृतमित्यादि तदप्यनभ्युपगमतिरस्कृतत्वात् दूरापास्तप्रसरं नहिवयं
ज्ञेयभेदमात्रतो ज्ञानस्य भेदमिच्छामः एकेनाप्यवग्रहादिना बहुबहुविधवस्तु ग्रहणोपलम्भात् यदपि च प्रत्ययादिप्रतिपत्तिप्रकारभेदकृत इत्यादि तदपि
नानाबाधामाधातुमलं यतस्ते प्रतिपत्ति प्रकारादेशकालादिभेदेनानन्त्यमपि प्रतिपद्यमानोनन्त्यमपि प्रतिपद्यमानान् परिस्थूरनिमित्तभेदेन व्यवस्थापिता
नाभि निबोधिकादीन् जातिभेदानतिक्रामति ततः कथमेकस्मिन्ननेकभेदभावप्रसङ्ग उक्तं च नयपडिवत्ति विसे साएणंमियणे णभेयभावे विजंते तहा विसिट्ठे
न जाइभेए विसंपेइ यदप्यवादीदावार्यापेक्षे ज्ञावारकमित्यादि तदपि न मनोबाधायै यतः परिस्थूरनिमित्तभेदमधिकृत्य व्यवस्थापितो ज्ञानस्य भेद

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



ततस्तदपेक्षमावारकमपि तथा भिद्यमानं न युक्त्या दुर्जन वचनीयतामास्कन्दति एवमुक्ते जितो भूयः सावष्टम्भं परः प्रश्नयति ननु परिस्थूरनिमित्तभेदव्यव
स्थापिता अथमी आभिनिबोधिकादयो भेदा ज्ञानस्यात्मभूता उतानात्मभूताः किंचातः उभयथापि दोषः तथाहि यद्यात्मभूतास्ततः क्षीणावरणेऽपि तद्भाव
प्रसङ्गस्तथा चासर्वज्ञत्वप्रागुक्तनीत्या तस्यापद्यते अथानात्मभूतास्तर्हि न ते पारमार्थिकास्ततः कथमाचार्यपेक्षो वास्तव आवारकभेदः तदपि न मनोरमं
सम्यग्वस्तुतत्त्वापरिज्ञानात् इह हि सकलघनपटलविनिर्मुक्त शारददिनमणिरिव समन्ततः समस्तवस्तुस्तोमप्रकाशनैकस्वभावो जीवस्तस्य च तथाभूत
स्वभावः केवलज्ञानमिति व्यपदिश्यते स च यद्यपि सर्वघातिना केवलज्ञानावरणेनाव्रियते तथापि तस्यानन्ततमो भागो नित्योद्घाटित एव अक्खरस्स अणंतो
भागो निच्चुग्घाडिओ जइ पुण सोवि आवरिज्जा तेण जीवो अजीवत्तणं पाविज्जा इत्यादि वक्ष्यमाणप्रवचन प्रामाण्यात् ततस्तस्य केवलज्ञानावरणावृतस्य
घनपटलाच्छादितस्येव सूर्यस्य यो मन्दः प्रकाशः सोऽपांतरालावस्थित मतिज्ञानाद्यावरणक्षयोपशमभेद सम्पादितं नानात्वं भजते यथा घनपटलावृतसूर्य
मंदप्रकाशो अपान्तरालावस्थित कटकुड्याद्यावरणविवरप्रदेशभेदतः स च नानात्वं क्षयोपशमानुरूपं तथातथा प्रतिपद्यमानः स्वस्वक्षयोपशमानुसारेणाभिधान
भेदमश्नुते यथा मतिज्ञानावरणक्षयोपशमजनितः स मंदप्रकाशो मतिज्ञानं श्रुतज्ञानावरणक्षयोपशमजनितः श्रुतज्ञानमित्यादि ततः आत्मस्वभावभूता ज्ञान
स्याभिनिबोधिकादयो भेदास्ते च प्रवचनोपदर्शितपरिस्थूलनिमित्तभेदतः पंचसंख्यास्तदस्तदपेक्षमावारकमपि पंचधोपवर्ण्यमानं न विरुध्यते न चैवमात्मस्वभाव
भूतत्वे क्षीणावरणस्यापि तद्भावप्रसङ्गो यत एते मतिज्ञानावरणादि क्षयोपशमरूपोपाधिसम्पादित सत्ताका यथा सूर्यस्य घनपटलावृतस्य मन्दप्रकाशभेदाः
कटकुड्याद्यावरणविवरभेदोपाधिसम्पादितास्ततः कथं ते तथारूपक्षयोपशमाभावे भवितुमर्हन्ति न खलु सकलघनपटलकटकुड्याद्यावरणापगमे सूर्यस्य ते तथा
रूपा मन्दप्रकाशास्तदा भवन्ति उक्तं च कडविवरागय किरणा मेहंतरियस्स जह दिणेसस्स जह ते कडमेहावगमे होति अहतह इमाइं पि १ ततो यथा जन्माद

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



योभावाजीवस्यात्मभूता अपि कर्मोपाधिसंपादितसत्ताकत्वात्तदभावे न भवन्ति तद्वदाभिनि बोधिकादयोपि भेदाज्ञानस्यात्मभूता अपि मतिज्ञानावरणादि कर्मक्षयोपशमसापेक्षत्वात्तदभावे केवलिनो न भवन्ति ततो ना सर्वज्ञत्वदोषभाव: उक्तं च जमिहक्क उमत्थ धम्मादुवानचोतिसिज्झाणं इयजइकेवलीणमाभि णिबोहाभावंमिकोदोसो इतिपर आह प्रपञ्चावयमुक्तयुक्तितो ज्ञानस्य पञ्चभेदत्वं परमनीषां भेदानामित्यमुपन्यासे किञ्चिदस्ति प्रयोजनमुत यथा कथंचिदेष प्रवृत्तोऽस्तीति ब्रूम: किं तदिति चेत् उच्यते इहमति श्रुते तावदेकत्र वक्तव्ये परस्परमनयो: स्वामिकालकारणविषयपरोक्षत्वसाधर्म्यात् तथाहि यएवमति ज्ञानस्य स्वामी सएव श्रुतज्ञानस्यापि जत्थ मइनाणं तत्थसुयनाणं जत्थसुयनाणं तत्थमइनाणमित्यादि वक्ष्यमाणवचनप्रामाण्यात् तत: स्वामिसाधर्म्यं तथा यावानेवमतिज्ञ नस्य स्थिति कालस्तावानेव श्रुतज्ञानस्यापि तत्र प्रवाहापेक्षयातीतानागतवर्त्तमानरुप: सर्वएवकाल: अप्रतिपक्तितैकजीवापेक्षया तु षट्षष्ठिसागरोपमाणि समधिकानि उक्तं च दोवारे विजयाइ सुगयस्सतिन्नि इप अहवताइं अइरेगं भवियं नाणाजीवाणसवद्धा इति कालसाधर्म्यं यथेंद्रियनिमितं मतिज्ञानं तथा श्रुतज्ञानमपीति कारणसाधर्म्यं तथा यथामति ज्ञानमादेशत: सर्व्वद्रव्यादिविषयमेवं श्रुतज्ञानमपीति विषयसाधर्म्यं यथा च मतिज्ञानं परोक्षं तथा श्रुतज्ञानमपि परोक्षता चानयोरग्रे स्वयमेव मूलकृतावक्ष्यत इति परोक्षत्वसाधर्म्यं तत इत्थं स्वाम्यादिसाधर्म्यादेते मति श्रुतेनियमादेकत्र वक्तव्ये ते चावध्यादिज्ञानेभ्य: प्रागेव तद्भावएवावध्यादिज्ञानसद्भावात् उक्तं च जंसामिकालकारणविसयपरोक्खत्तणेहिं तुल्लाइ तब्भावे सेसाणियतेणाईएमइसुयाइं १ ननु भवतामेकत्रमति श्रुते प्रागेव चावध्यादिभ्य: परमेतयोरेवमतिश्रुतयोर्मध्ये पूर्व्वं मतिपश्चात् श्रुतमित्येतत्कथं उच्यते मतिपूर्वत्वात् श्रुतज्ञानस्य तथाहि सर्वत्रापि पूर्वमवग्रहादिरूपं मतिज्ञानमुदयते पश्चात् श्रुतं तथाचोक्तं चूर्णावपि ते सुवियमइ पुव्वयं सुयंति किञ्चा पुव्वं मइनाणं कयंतस्स पिट्ठओसुयं नत्वेते मति श्रुते सम्यक्त्वोत्पादकाले युगपदुत्पत्तिमासादयतोऽन्यथा मतिज्ञानभावेपि श्रुताज्ञानभावप्रसङ्ग सचानिष्टस्त

यामिथ्यात्वप्रतिपत्तौ युगपदेव वाज्ञानरूपतया परिणमतः ततः कथं मतिपूर्वं श्रुतमुच्यते उक्तं च भाष्यकारेण लाभसमकालाइं अउमइसुयाइं पुणो न सुयंमइपुव्वं मइनाणेणावस्य प्रमाणां नैषदोषो यतः सम्यक्त्वोत्पत्तिकाले समकालं मतिश्रुते लब्धिमात्रमेवाङ्गीकृत्य प्रोक्ते तेन तूपयोगं उपयोगस्य तथा जीवस्वाभाव्यतः क्रमेणैव सम्भवात् मतिपूर्वं च श्रुतमुच्यते उपयोगापेक्षया न खलु मत्युपयोगे नासत्कश्चिद् श्रुतग्रन्थानुसारि विज्ञानमासादयति जन्तु स्ततो न कश्चिद्दोषः आह च भाष्यकृत इह लद्धिमइसुयाइं समकालाइं नतूवओगो सिं मइपुव्वं सुयमिह पुण सुओवओगो मइप्पभवो ॥ तथाकालविपर्ययस्वामित्व लाभसाधर्म्यान्मति श्रुतानन्तरमवधिज्ञानमुक्तं तत्र प्रवाहापेक्षया अप्रतिपतितैकसत्त्वाधारापेक्षया वा नमतिश्रुतयोः स्थितिकालस्तावानेवावधिज्ञानस्यापि तथा यथैव मतिश्रुतज्ञाने मिथ्यादर्शनोदयतो विपर्ययरूपतामासादयतस्तथावधिज्ञानमपि तथाहि मिथ्यादृष्टेः सतस्त्रान्येवमतिश्रुतावधिज्ञानानिमत्यज्ञानतया श्रुताज्ञानविभंगज्ञानानि भवन्ति उक्तं च आद्यत्रयमज्ञानमपि भवति मिथ्यात्व संयुक्तमिति तथा य एवमतिश्रुतज्ञानयोः स्वामी स एवावधिज्ञानस्यापि तथा विभंगज्ञानिनस्त्रिदशादेः सम्यग्दर्शनावाप्तौ युगपदेवमतिश्रुतावधिज्ञानानां लाभसम्भवस्ततो लाभसाधर्म्यं अवधिज्ञानानन्तरं च छद्मस्थ विषयभावप्रत्यक्षत्वसाधर्म्यान्मनः पर्यायज्ञानमुक्तं तथाहि यथावधिज्ञानं छद्मस्थस्य भवति तथामनः पर्यवज्ञानमपीति छद्मस्थसाधर्म्यं तथा यथावधिज्ञानं रूपिद्रव्यविषयं तथा मनः पर्यायज्ञानमपि तस्य मनः पुद्गलालंबनत्वादिति विषयसाधर्म्यं तथा यथावधिज्ञानं क्षायोपशमिकभावे वर्त्तते तथा मनः पर्यायज्ञानमपीति प्रत्यक्षत्वसाधर्म्यं उक्तं च कालविवज्जयसामित्तलाभसाहम्मओवही तत्तो माणसमित्तो छउमत्थविसयभावाइं साहम्मा ॥ तथामनपर्यायज्ञानानन्तरं केवलज्ञानस्योपन्यास सर्वोत्तमत्वात् अप्रमत्तयति स्वामिसाधर्म्यात्सर्वावसाने लाभाच्च तथाहि सर्वाण्यपि मतिज्ञानादिदेशत परिच्छेदकानि केवलज्ञानं तु सकलवस्तुस्तोमपरिच्छेदकं सर्वोत्तमं सर्वोत्तमत्वाच्चान्ते सर्वशिरशिखरकल्पं

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



उपन्यस्तं तथा यथा मनःपर्यायज्ञानमप्रमत्तयतेरेवोदयते तथा केवलज्ञानमप्यप्रमादभावमुपगतस्यैव यतेर्भवति नान्यस्य ततोऽप्रमत्तयति साधर्म्यं तथावसा-
नमपि ज्ञानं नि समासादयितुं योग्य सनियमात्सर्वज्ञानावसाने केवलज्ञानमवाप्नोति ततः सर्वान्ते केवलमुक्तं उक्तं च अंते केवलमुत्तमं जइसामित्तावसाण-
लाभाओ इति तथा यथा मनःपर्यायज्ञानं न विपर्ययमासादयति तथा केवलज्ञानमपीति विपर्ययाभावसाधर्म्याच्च मनःपर्यायज्ञानानन्तरं केवलज्ञानमुक्तमिति
कृतं प्रसङ्गेन तं समासओ दुविहं पन्नत्तमित्यादि सूत्रं तत्पंचप्रकारमपि ज्ञानं समासतः संक्षेपेण द्विविधं द्विप्रकारं प्रज्ञप्तं तद्यथेत्युदाहरणोपन्यासार्थः प्रत्य-
क्षं परोक्षं च तत्राश्नुते व्याप्नोति अश्नुते ज्ञानात्मना सर्वानर्थान् व्याप्नोतीत्यक्षः अथवा अश भोजने अश्नाति सर्वानर्थान् यथा योगं भुंक्ते पालयति चेत्यक्षो जीव
उभयत्राप्यौणादिकः सप्रत्ययः तं अक्षं जीवं प्रति साक्षाद्वर्त्तते यत् ज्ञानं तत्प्रत्यक्षमिन्द्रियमनोनिरपेक्षमात्मनः साक्षात्प्रवृत्तिमत् अवध्यादिकं त्रिप्रकारं उक्तं
च जीवो अक्खो अत्थवावण भोयणगुणन्निओ जेण तं पइ वट्टइ नाणं जं पच्चक्खं तयं तिविहं १ चशब्दः स्वगतानेकावध्यादिभेदसूचकः तथा अक्षस्यात्मनो द्रव्येन्द्रि-
याणि द्रव्यमनश्च पुद्गलमयत्वात्पराणि वर्त्तंते पृथग्वर्त्तंते इत्यर्थः तेभ्यो यदक्षस्य ज्ञानमुदयते तत्परोक्षं पृषोदरादय इति रूपसिद्धिः अथवा परैरिन्द्रि-
यादिभिः सह उक्षः संबंधो विषयविषयिभावलक्षणो यस्मिन् ज्ञानेन तु साक्षादात्मना धूमादग्निज्ञानमिव तत्परोक्षं उभयत्रापि इंद्रियमनोनिमित्तं
ज्ञानमभिधेयंआह इंद्रियमनोनिमित्ताधीनं कथं परोक्षं उच्यते पराश्रयत्वात् तथाहि पुद्गलमयत्वात् द्रव्येन्द्रियमनांसि आत्मनः पृथग्भूतानि ततस्तदाश्रयेणोप-
जायमानं ज्ञानमात्मनो न साक्षात् किंतु परंपरयेतीन्द्रियमनोनिमित्तं ज्ञानं धूमादग्निज्ञानमिव परोक्षं उक्तं च अक्खस्स पोग्गलमया जं दव्विंदियमणा परा
होंति तेहिंतो जं नाणं परोक्खमिह तमणुमाणं व अत्र वैशेषिकादयः प्राहुः ननु अक्षमिन्द्रियं श्रोत्रादिकं करणमुक्तं ततोऽक्षाणामिन्द्रियाणां साक्षादुपलब्धिः
सा प्रत्यक्षं अक्षमिन्द्रियं प्रतिवर्त्तते इति प्रत्यक्षव्युत्पत्तेः तथा च सति सकललोके प्रसिद्धं साक्षादिन्द्रियाश्रितं घटादिज्ञानं प्रत्यक्षमिति सिद्धं तदेतदयुक्तमि-

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



न्द्रियाणामुपलब्धृत्वासंभवात्तदसंभवश्चाचेतनत्वात् तथा चात्र प्रयोगः यदचेतनं तन्नोपलब्धृ यथा घटो अचेतनानि च द्रव्येन्द्रियाणि न चायमसिद्धो हेतुर्यतो नाम द्रव्येन्द्रियाणि निर्वृत्त्युपकरणरूपाणि निर्वृत्त्युपकरणे द्रव्येन्द्रियमिति वचनात् निर्वृत्त्युपकरणे च पुद्गलमये यथा चानयोः पुद्गलमयता तथाग्रे वक्ष्यति ये पुद्गलमय च सर्वमचेतनं पुद्गलानां काठिन्यादिबोधरूपतया चैतन्यं प्रतिधर्मित्वायोगात् धर्मानुरूपो हि सर्वोऽपि धर्मी यथा काठिन्यं प्रति पृथिवी यदि पुनरनुरूपत्वाभावेपि धर्मधर्मिभावो भवेत्ततः काठिन्यजलयोरपि स भवेत् न च भवति तस्मादचेतनाः पुद्गलाः उक्तं च बोधस्वभावममूर्त्तं विषयपरिच्छेदकं च चैतन्यं विवरीयसहा वण्णायभूयाणि जगप्पसिद्धाणि २ ताधम्मधम्मिभावो कहमेसिंघडुइ तदणुरूवगमय अणुरूवत्ताभावे काठिन्नजलाणकिन्नभवे २ इतिनापि संदिग्धानैकांतिकताहेतो शंकनीया अचेतनस्योपलंभकत्वाशक्त्ययोगादुपलंभकत्वं हि चेतनाया धर्मस्ततः स कथं तदभावे भवितुमर्हति आह प्रत्यक्षबाधितेयं प्रतिज्ञा दिन्द्रियाणामुपलंभकत्वेन प्रतीतेः तथा हि चक्षू रूपं गृह्णदुपलभ्यते शब्दं कर्णौ नासिका गन्धमित्यादि तदेतन्मोहावष्टब्धांतःकरणताविलसितं तथाह्यात्मा शरीरेन्द्रियैः सहान्योन्यानुवेधेन व्यवस्थितस्ततोयमात्मानमिवेन्द्रियाणीति विवेक्तुमशक्नुवन्तो बालिशजंतवस्तत्रापि दुष्टाद्यकुशास्त्रसंपर्कात कुवासना संगमस्ततः साक्षादुपलंभकानीन्द्रियाणीति मन्यंते परमार्थतः पुनरुपलब्धा तत्रात्मैव कथमेतदवसीयत इति चेत् उच्यते तद्विगमेपि तदुपलब्धार्थानुस्मरणात् तथा हि कोपि पूर्वं चक्षुषा विवक्षितमर्थं गृहीतवान् ततः कालांतरे दैवनियोग ततश्चक्षुषोपगमेपि सतमर्थं अनुस्मरति तत्र यदि चक्षुरेव द्रष्टृ स्यात् ततश्चक्षुषोऽभावे तदुपलब्धार्थानुस्मरणं न भवेत् नह्यात्मनासोऽर्थोनुभूतः किन्तु चक्षुषा चक्षुष एव साक्षाद् द्रष्टृत्वेनाभ्युपगमात् न चान्येनानुभूतेऽर्थेऽन्यस्य स्मरणं मा प्रापदतिप्रसङ्गः अपि च माभूच्चक्षुषोपगमपि तथापि यदि चक्षुरेव दृष्टृ ततः स्मरणमात्मनो न भवेत् अन्येनानुभूतेऽर्थेऽन्यस्य स्मरणायोगात् भवति च स्मरणमात्मनः चक्षुषः स्मर्तृत्वेनाप्रतीतेरभ्युपगमाच्च तस्मादात्मैवोपलब्धा नेन्द्रियमिति तथा चात्र प्रयोगो योयेषूपरतेष्वपि

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



तदुपलब्धानर्थान् स्मरति सततोपलब्धा यथा गवाक्षोपलब्धानामर्थानामनुस्मर्त्ता देवदत्तोऽनुस्मरति च द्रव्येन्द्रियोपलब्धानर्थान् द्रव्येन्द्रियापगमेप्यात्मा इह स्मरणमनुभवपूर्वकतया व्याप्तं व्याप्य व्यापकभावश्चानुभवस्मरणयोः प्रत्यक्षेणैव प्रतिपन्नस्तथाहि योऽनुभूतः सस्मर्यतेन शेषस्तथा स्वसंवेदन प्रत्यक्षेण प्रतीते विपक्षेचाति प्रसंगोबाधकं प्रमाणं अननुभूतेपि विषये यदि स्मरणं भवेत्ततो ननुभूतत्वाविशेषात् खरविषाणादेरपि स्मरणं भवेदित्यति प्रसङ्गः तस्मात् द्रव्येन्द्रियापगमेपि तदुपलब्धार्थानुस्मरणादात्मोपलब्धेरिति स्थितं उक्तंच कैश्चिदिंद्रियाइं अक्खाइं तदुपलद्धिपच्चक्खं ततो ताइं जमवेयणाइं जाणंति नघडाव्वउवलद्धा तव्वावारम्मिगमे तदुवलद्धसरणाओ गेहगवक्खोवरमेवितदुपलद्धाणुसरिया वा चल वा शब्द उपमार्थः अपरेपुनरात्मनैवयमिन्द्रियाणामुप लब्धृत्वं प्रतिजानामाहे किं त्वेतदेव ब्रूमो यदिन्द्रियद्वारेण प्रवर्त्तते ज्ञानमात्मनि तत्प्रत्यक्षं नचेन्द्रिया व्यापारव्यवहितत्वादात्म साक्षान्नोपलब्धेति वक्तव्यं इन्द्रियाणामुपलब्धिं प्रतिकरणतया व्यवधायिकत्वायोगात् न खलु देवदत्तो हस्तेनभुंजानो हस्त व्यापारव्यवहितत्वात्साक्षान्न भोक्तेति व्यपदेष्टुं शक्यं तदेतदसमीचीनं सम्यग् वस्तुतत्वापरिज्ञानात् इह हि यदात्मा चक्षुरादिकमपेक्षा बाह्यमर्थमवबुध्यते तदावश्यं चक्षुरादेः सद्गुणाद्यपेक्ष्यते तथाहि यदा सद्गुणं चक्षुस्तदा बाह्यमर्थंस्पष्टं यथावस्थितं चोपलभते यदा तु तिमिराशुभ्रमणनौ यानपित्तादिसंक्षोभदेशद्वीय स्त्वाद्युपादित विभ्रमस्तदा विप रीतं शंसयितुं वा ततोऽवश्यमात्मार्थोपलब्धौपराधीनस्तथा च सति यथा राजा निजराजदौवारिकेणोपदर्शितं परराष्ट्रराजकीयं पुरुषं पश्यन्नपि समी चीनमसमीचीनं वा निजराजदौवारिकवचनत एव प्रत्येति न साक्षात्तद्वदात्मापि चक्षुरादिनोपदर्शितं बाह्यमर्थं चक्षुरादिप्रत्ययत एव समीचीनमसमी चीनं वा वेत्ति न साक्षात् तथा हि चक्षुरादिना दर्शितेपि बाह्येर्थे यदि संशयमधिरूढो भवति तर्हि चक्षुरादिसाद्गुण्यमेव प्रतीत्यनिश्चयं विदधाति यथा न मे चक्षुस्तिमिरोपप्लुतं नौ यानाद्युभ्रमणाद्युपादितं विभ्रमततोयमर्थः समीचीन इति ततो यथा राज्ञो नायं मम राजदौवारिकाऽसत्याख्यायी कदाच



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



नाप्यस्य व्यभिचारानुपलंभादिति निजदौवारिकस्य सादृगुण्यमवगम्य परराष्ट्रराजकीय पुरुषस्योचीनतावधारणं परमार्थत: परोक्षतद्वदात्मनोपि चक्षुरा दिसादृगुण्यावधारणातोवस्तु यथात्म्यावधारणं परमार्थत: परोक्षं न ह्यदमिंद्रियसादृगुण्यावधारणतो वस्तु यथात्म्यावधारणमभ्यास दशामापन्नस्योपल भ्यते नाभ्यासदशामुपगतस्य अभ्यासदशामापन्नो ह्यभ्यासप्रकर्षसामर्थ्यादिन्द्रियसादृगुण्यमनपेक्षैव साक्षादवबुध्यते ततस्तस्येन्द्रियाश्रितं ज्ञानं कथं प्रत्यक्षं न भवति तदयुक्तं अभ्यासदशामापन्नस्यापि साक्षादनवबोधात्तस्यापीन्द्रियद्वारेणावबोध प्रवृत्तेरवश्यमिन्द्रिय सादृगुण्यापेक्षणात् केवलमभ्यासप्रक र्षवशात्तदिन्द्रियसादृगु ण्यझटित्येवावधारयति पूर्वोक्तं च झटित्येव विनिश्चिनोति ततः कालसौक्ष्म्यात्तन्नोपलक्ष्यते इत्थं चैतदंगीकर्त्तव्यं यतो यथामवायज्ञानमवग्रहे हा पूर्वं ईहादिविचारणात्मिकाविचारश्चेंद्रियसादृगुण्यसद्भूत वस्तुधर्माश्रितोऽन्यतरैकतरविचाराभावेऽवायज्ञानस्य समग्रज्ञानत्वा योगात् नखल्विन्द्रिये वस्तुनिधास्यविचारे तेऽवायज्ञानं समीचीनं भवति ततोऽभ्यासदशापन्ने पींद्रियसादृगुण्यावधारणमवसेयं यदपि चोक्तं न खलु देव दत्तो हस्तेन भुंजानो हस्तव्यापारव्यवहितत्वात्साक्षाद्भोक्त्येति व्यपदेष्टुं शक्यमिति तदप्ययुक्तं दृष्टांतदार्ष्टांतिकार्थवैषम्यात् भोक्ता हि भुजिक्रियानुभवभागी भण्यते भुजिक्रियानुभवश्च देवदत्तस्य न हस्तेन व्यवधीयते किं तु साक्षात् हस्तो हि कवलप्रक्षेपएव्याप्रियते न परिच्छेदक्रियायामिन्द्रियमिवाहारक्रि यानुभवेपि येन व्यवधानं भवेत् ततः साक्षात् देवदत्तो भोक्तेति व्यवह्रियते इह तु वस्तूनामुपलब्धिरात्मनोऽक्षा चक्षुरादीन्द्रियसादृगुण्यावगमानुसारेणोप जायते ततो व्यवधानान्न साक्षादुपलम्भक: आत्मेति नन्विदं सर्वमप्ययुक्त प्ररूपणं सूत्रे ह्यनन्तर मेवेन्द्रियाश्रितं ज्ञानं प्रत्यक्षमुपदेक्ष्यते पच्चक्खं दुविहं पन्नत्तं तंजहा इंदियपच्चक्खं नो इंदिय पच्चक्खं चेति सत्यमेतत् किं त्विदं लोकव्यवहारमधिकृत्योक्तं न परमार्थत: तथाहि यदिन्द्रियाश्रितमपरव्यवधान रहितं ज्ञानमुदयते तल्लोके प्रत्यक्षमिति व्यवहृतं अपरधूमादिलिङ्गनिरपेक्षतया साक्षादिन्द्रियमधिकृत्य प्रवर्त्तनात् यत्पुनरिन्द्रियव्यापारेणपरं धूमादि

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



दिकमपेक्ष्यानुमानादिविषयं ज्ञानमुदयते तल्लोके परोक्षं तत्र साक्षादिन्द्रियव्यापारासम्भवात् य पुनरात्मनः इन्द्रियमप्यनपेक्ष्य साक्षादुपजायते तत्परमार्थतः प्रत्यक्षं तच्चावध्यादिकं त्रिप्रकारं ततो लोकव्यवहारमधिकृत्येन्द्रियाश्रितं ज्ञानमनन्तरसूत्रे प्रत्यक्षमुक्तं न परमार्थतः अथोच्येत अनन्तरं सूत्रेण किमपि विशेषसूचकं पदमीक्षामहे ततः कथमिदमवसीयते संव्यवहारमधिकृत्येन्द्रियाश्रितं ज्ञानं प्रत्यक्षमुक्तं न परमार्थत इति उच्यते उत्तरसूत्रार्थपर्यालोचनात् प्रत्यक्षभेदाभिधानानंतरं हि सूत्रमाचार्यो वक्ष्यति परोक्खं दुविहं पन्नत्तं । तंजहा आभिणिबोहियनाणं सुयनाणमित्यादि तत्राभिनिबोधकमवग्रहादिरूपमवग्रहादयश्च श्रोत्रेन्द्रियाद्याश्रिता वर्णयिष्यन्ति तद्यदि श्रोत्रादीन्द्रियाश्रितं ज्ञानं परमार्थतः प्रत्यक्षं तत्कथमवग्रहादयः परोक्षज्ञानत्वेनाग्रेऽभिधीयन्ते तस्मादुत्तरश्रोत्रेन्द्रियाश्रितज्ञानस्य परोक्षत्वेनाभिधानादवसीयते अनंतरसूत्रेणोच्यमानमिन्द्रियाश्रितं ज्ञानं व्यवहारतः प्रत्यक्षमुक्तं न परमार्थत इति स्थितं आह च एगंतेणपरोक्खं लिङ्गियमोहादयं च पच्चक्खं इंदियमणोभवं जं संववहारपच्चक्खं । अकलङ्कोप्याह द्विविधं प्रत्यक्षज्ञानं सांव्यवहारिकं मुख्यं च तत्र सांव्यवहारिकमिन्द्रियानिन्द्रियप्रत्यक्षं मुख्यमतीन्द्रियज्ञानमिति केवलमनोमात्रनिमित्तं श्रुतज्ञानं च लोकेऽपि परोक्षमिति प्रतीतं नापि सूत्रे क्वचिदपि प्रत्यक्षमिति व्यवहृतं ततो न तत्र कश्चिद्विवादः तदेवं प्रत्यक्षपरोक्षं चेति भेदद्वयोपन्यासे कृते सति शिष्यो मनवबुध्यमानः प्रश्नं विधत्ते से किं तं पच्चक्खं ति सेशब्दो मागधदेशीय प्रतिसिद्धो निपातोऽथ शब्दार्थे वर्त्तते अथ शब्दश्च प्रक्रियाद्यर्थाभिधायी यत उक्तं अथ प्रक्रियाप्रश्नानंतर्यमङ्गलोपन्यास प्रतिवचनसमुच्चयेष्विति इह चोपन्यासार्थो वेदितव्यः किमिति परप्रश्ने तत्प्रागुपदिष्टं प्रत्यक्षमिति एवं शिष्येण प्रश्ने कृते सति न्यायमार्गोपदर्शनार्थमाचार्यः शिष्यपृष्टपदानुवादपुरस्सरी करणेन प्रतिवचनमभिधातुकाम आह पच्चक्खं दुविहं पन्नत्तमित्यादि एवमन्यत्रापि यथायोगं प्रश्ननिर्वचन सूत्राणां आपातनिका भावनीया प्रत्यक्षं द्विविधं प्रज्ञप्तं तद्यथा इन्द्रियप्रत्यक्षं नोइन्द्रिय प्रत्यक्षं च तत्र इंदुपरमैश्वर्ये उदितोनुमितिनुम् तत इंदनादिन्द्रः आत्मा सर्वद्रव्योपलब्धिरूपपर

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



मैश्वर्ययोगात्तस्य लिङ्गं चिह्नमविनाभावि इन्द्रियमिन्द्रियमिति निपातन सूत्राद्रूपनिष्पत्तिः तत्द्विधाद्रव्येन्द्रियं भावेन्द्रियं च तत्र द्रव्येन्द्रियं द्विधा निर्वृत्तिरुपकरणं च निर्वृत्तिर्नामप्रतिविशिष्टाः संस्थानविशेषाः सापि द्विधा बाह्याभ्यन्तरा च तत्र बाह्याकर्णपर्पटकादिरूपासापि विचित्रा ॥ प्रतिनियतरूपतयोपदेष्टुं शक्यते तथाहि मनुष्यस्य श्रोत्रे भ्रूसमे नेत्रयोरुभयपार्श्वतः संस्थिते वाजिनो मस्तकेन नयोरुपरिष्टाद्वाविनीतीक्ष्णोचा ग्रभागे इत्यादि जातिभेदान्नानाविधा आभ्यंतरानुनिर्वृत्तिः सर्वेषामपि जंतूनां समाना तमेवाधिकृत्याम्निसूत्राणि प्रावर्त्तिषत सोइंदिएणं भंते किं संठाणसंठिए पन्नत्ते गोयमाकलं वुयासंठाणसंठिए पन्नत्ते चक्खुंदिएणं भंते किं संठाण संठिए पन्नत्ते गोयमा मसूरचंदसंठाणसंठिए पन्नत्ते जिब्भिंदिएणंभंते किं संठाणसंठिए पन्नत्ते गोयमा खुरप्पसंठाण संठिए पन्नत्ते फासिंदिएणं भंते किं संठाण संठिए पन्नत्ते गोयमा नाणासंठाण संठिए पन्नत्ते इह स्पर्शनेन्द्रियनिर्वृत्तेः प्रायो न बाह्याभ्यन्तरभेद सूत्रार्थमूलटीकायां तथाभिधानात् उपकरणं खड्गस्थानीया या बाह्यनिर्वृत्तेर्या खड्गधारासमाना स्वच्छतरपुद्गलसमूहात्मिका आभ्यन्तरानिर्वृत्तिस्तस्याः शक्तिविशेषः इदं चोपकरणरूपं द्रव्येन्द्रियमांतरं

## इंदियपच्चखंच१ नोइंदियपच्चक्खंच२ सेकिंतं इंदियपच्चक्खं इंदिय पच्चक्खं पंचविहंपन्नत्तं तंजहासोइंदियपच्चक्खं१



चज्ञानना: इ० दोय भेद व०पखण्या२ त० ते जिम छे तिम कहे छे२ इ० इन्द्रियां करीने प्रत्यक्षवस्तुने जाणे ते इन्द्रियप्रत्यक्ष१ नो० इन्द्रिया विना जेवस्तु नेजाणे प्रत्यक्षतेनो इंद्रीयप्रत्यक्षकहीये से ते अथश्चिवे किं०किस्युं तं०ते इं०इंद्रियप०प्रत्यक्षभगवंत उतरकहेछे पं०श्रोतेंद्रियादिक पांचविधः प०परूप्या कह्याछे तं०तेजिमछे तिमकहेछे सो०श्रोतेंद्रियादिककरी सांभलवारूप थकी वस्तुने प्रत्यक्षजाणे च०चक्षुइंद्रीयादिक करी देखायकी प्रत्यक्षवस्तुनेजाणे



For Private and Personal Use Only

निर्वृते स कथञ्चिदर्थान्तरं शक्तिरमते कथंचिद्भेदश्च सत्यामपि तस्यामांतरनिर्वृत्तौ द्रव्यादिनोपकरणस्य विघातसम्भवात् तथाहि सत्यामपि कदम्बपुष्पाद्याकृति रूपायामान्तरनिर्वृत्तावति कठोरतरघनगर्जितादिना शक्त्युपघाते सति न परिच्छेत्तुमीशते जंतवः शब्दादिकमिति भावेन्द्रियमपि द्विधालब्धिरूपयोगश्च तत्र लब्धिश्रोत्रेंद्रियादिविषयः सर्वात्मप्रदेशानां तदावरणक्षयोपशमः उपयोगः स्वस्वविषये लब्धिरूपेंद्रियानुसारेणात्मनो व्यापारः एव च द्विविधमपि द्रव्यभावरूपमिन्द्रियं ज्ञायते एक तरस्याप्यभावे इंद्रियप्रत्यक्षत्वानुपपत्तेः तत्र इंद्रियस्य प्रत्यक्षं इंद्रियप्रत्यक्षं नोइंद्रियप्रत्यक्षं यत् इन्द्रियप्रत्यक्षं नभवति नोशब्दः सर्वनिषेधवाची तेन मनसोपि कथंचिदिन्द्रियत्वाभ्युपगमात्तदाश्रितं ज्ञानंप्रत्यक्षं नभवतीतिसिद्धं सेकिंतमित्यादि अथकिंत द्रिंद्रिय प्रत्यक्षं इन्द्रियप्रत्यक्षं पञ्चविधं प्रज्ञप्तं तद्यथा श्रोत्रेंद्रिय प्रत्यक्षमित्यादि तत्र श्रोत्रेन्द्रियस्य प्रत्यक्षं श्रोत्रेन्द्रियप्रत्यक्षं श्रोत्रेन्द्रियनिमित्तो त्पद्य यदुत्पन्नज्ञानं तत् श्रोत्रेन्द्रियप्रत्यक्षमिति भावः एवं शेषेष्वपि भावनीयं एतच्च व्यवहारत उच्यते न परमार्थ तद्रूत्यनंतरमेव प्रागुक्तं आह स्पर्शन रसन घ्राणचक्षुः श्रोत्रेंद्रियाणीति क्रमः अय मेवच समीचीनः पूर्वपूर्वलाभएवोत्तरोत्तर लाभसम्भवात्तत: किमर्थमुक्तक्रमोपन्यासः अत उच्यते अस्तिपूर्वानुपूर्वी क्रमः यदुत: अस्तिपूर्वानुपूर्वीति न्यायप्रदर्शनार्थं अपिच शेषेंद्रियापेक्षयाश्रोत्रेंद्रियं तत् श्रोत्रेन्द्रियस्य यत्प्रत्यक्षं न शेषेंद्रिय प्रत्यक्षा

सूत्र

## चक्खिंदिय पच्चक्खं२ घाणिंदिय पच्चक्खं३ जिभिंदिय पच्चक्खं४ फासिंदिय पच्चक्खं५ सेत्तं इंदिय पच्चक्खं सेकिंतं

भाषा

तेद्खेवारूपथा० घाणइंद्रीतेनासिकाइं करी प्रत्यक्षवस्तु दुर्गंधसुगंधरूपवास प्रत्यक्षप्रमाण जाणे र०रसनेंद्रियादिक करीने स्वादभाव प० प्रत्यक्षप्रमाण जाणे ४ फा०परसइंद्री तेकायाप्रमुखकरी प्रत्यक्ष अंगफुरणादिकरी जाणे से०तेएहवा इं०इंद्रीप्रत्यक्षना ५ भेदकह्या १ हिवे नोइंद्रीयनो मुखासे०

पेक्षया स्पष्टसंवेदनं स्पष्टसंवेदनश्चोपवर्ण्यमानविनेयः सुखेनावबुध्यते ततः सुखप्रतिपत्तये श्रोत्रेंद्रियादिक्रम उक्तः सेकिंतं नो इंदिय पच्चक्खमित्यादि अथ किं तन्नोइंद्रिय प्रत्यक्षंनोइन्द्रियप्रत्यक्षं त्रिविधंप्रज्ञप्तं तद्यथा अधिज्ञानस्य प्रत्यक्षमित्यादि अथ किंतदवधि ज्ञान प्रत्यक्षमवधिज्ञानं प्रत्यक्षं द्विविधप्रज्ञप्तं तद्यथा, भवप्रत्ययं चक्षायोपशमिकं च तत्र भवन्ति कर्मवशवर्त्तिनः प्राणिनोस्मिन्निति भवो नारकादिजन्मपुनरावृत्तीति अधिकरणे घञ् प्रत्ययः भवएव प्रत्ययः कारणं यस्य तद्भवप्रत्ययं प्रत्ययशब्देनेहकारणपर्यायः वर्त्तते च प्रत्ययशब्दः कारणत्वे यत उक्तं प्रत्ययो शपथे ज्ञाने हेतुविश्वास निश्चये च शब्दः स्वगतदेवनारकाश्रितः भेदद्वयसूचकः तौ च द्वौ भेदावनन्तरमेव वक्ष्यति तथा क्षयश्चोपशमश्च क्षयोपशमौताभ्यां निवृत्तं क्षायोपशमिकं

सूत्र

नोइंदियपच्चक्खं नोइंदियपच्चक्खं तिविहंपन्नत्तं तंजहा ओहिनाण पच्चक्खं १ मणपज्जवनाणपच्चक्खं २ केवलनाणपच्चक्खं ३ सेकिंतं ओहिनाणपच्चक्खं ओहिणाणपच्चक्खं दुविहं पन्नत्तं तंजहा भवपच्चइयं च १ खाओवसमियं च २ सेकिंतं भवपच्चइयं

भाषा

तेअथहिवे कि॰कुणनो॰ इंद्रीना उपयोगविना जाणे प्रत्यक्षप्रमाणे नोइंद्रीप्रत्यक्षना २ ति॰त्रिणिप्रकारे प॰परुप्या तं॰तेजिमछे तिम कहेछे ओ॰अवधिग्यांन तेहने उपयोगे करी स्वभावे वस्तु छइ तेप्रत्यक्षदेखे १ म॰मनपर्यवग्यांन करीने म॰मननापर्याय प॰ प्रत्यक्षभावनी विचारणा रूपजाणवा २ के॰ केवल ग्यांन तिणे करीने वस्तुने प्रत्यक्षप्रमाण देखे ३ से॰ ते अथ हिवे कि॰ किस्युते शिष्य पूछ्यो अहो महात्मा उ॰ अवधिग्यान ते केतला प्रकारनाछे तदानंतर गुरुबोल्या अहोवत्स अवधिनाण करी प॰प्रत्यक्षदेखवो २ तेहनो दु॰प्रकार प॰कह्या ते कुण जे सुभने कहो तं॰ ते जिमछे तिम कहेछे भ॰भवप्रत्यय छइ तेतो तिणे भवे आतांतो ज्ञान आवरण छवेजख॰ क्षयोपसमकित भावे छइ तेतो आवरण क्षयकरे अने अथ उदयछे

चब्द: स्वगतानेकभेदसूचक: तत्र यद्येषां भवतितेषामुपदर्शयति दो दोयहमित्यादि द्वयोर्जीव समङ्ग्योर्भवप्रत्यय तद्यथादेवानां च नारकाणां चतत्र दीव्यन्ति निरुपमक्रीडामनुभवतीति देवा: तेषां तथा नारकान् कायंति शब्दयन्ति योग्यतया अनतिक्रमेणाकारयन्ति अंदम् सत्त्वानेइतिनारकास्तेषु भवानारकास्तेषां च शब्द उभयत्रापि स्वगतानेक भेदसूचक: ते च संस्थानचिन्तायामग्रे दर्शयिष्यन्ति अत्राह पर: नन्ववधिज्ञानं क्षायोपशमिके भावे वर्त्ततेनारकादिभवा औदयिके तत्कथं देवादीनामवधिज्ञानं भवप्रत्ययमिति व्यवदिश्यते नैष दोष: यतस्तदपि परमार्थत: क्षायोपशमिकमेव केवलं सच्चयोपशमोदेवनारकभवे ष्ववश्यं भावी पक्षिणां गगनगमनलब्धिरिव ततो भवप्रत्ययमिति व्यपदिश्यते उक्तं च चूर्णौ नणुओही खाओवसमिए भावेनरगाइभावोस उदइए भावे तउ कहं भवपच्चइउ भण्णइ उच्यते सोविखउवसमिउ चेवकिंतु सोखउ वसमो नारगदेव भवेसु अवस्सं भवइकोदिट्ठं तो पक्खीणं आगासगमणं चतउभवपच्चइउ भण्ण इति तथा द्वयो: क्षायोपशमिकं तद्यथा मनुष्याणां च पञ्चेन्द्रियतिर्यग्जातिजानां च अत्रापि च शब्दौ प्रत्येकं स्वगतानेक भेदसूचकौ पञ्चेन्द्रियतिर्यग्

मूल

भवपच्चइयंदुगण्हं तंजहा देवाणय नेरइयाणय सेकिंतं खओवसमियं२ दुण्हं तंजहा मणूसाणयपंचिंदिय तिरिक्ख

भाषा

ते उपसमावी राखे ते चय उपसम कहीये २ से०ते अथ किये किं०प्रश्नतं० तेभव प्रत्ययना २ दु०वेप्रकारे प०परूप्या तं०ते जिमछे तिम कहेछे दे०देवताने दिव्यप्रधानभोगछे तेभणी देवनी चोभंगी १ नें०सुभवाक्य वचनथी निर्गमीनीकल्यामहा आकंदशब्दकरे नारकीने दुखभोगवे तेहज प्रवर्त्तना२से० तेएह भवप्रत्ययकह्यु हिवेच उपसमनीक पुछाकरेछे वे०ते अथ हिवे कि०कुण तेबलीजी वारवार बोले तेशिष्ये पुछ्यो अहो माहरा भावपुज्य ख०चयोपसमिकभावस्यु कही जेहना केतलायक प्रकारनोछे तदानंतर गुरुबोल्या अहो शिष्यचय उपशमीकना २ दु०वेभेद तैकही मं०संगीगर्भज मनुष्यसम्यग्दृष्टीने

मनुष्याणां चावधिज्ञानं मावश्यंभावि तत: समानेपि क्षायोपशमिके भवप्रत्ययादिदं भिद्यते परमार्थत: पुन: सकलमप्यवधिज्ञानं क्षायोपशमिकं सम्प्रति क्षायोपशमिकस्वरूपं प्रतिपादयति कोहेउ खउवसमियन्ति को हेतु: किं निमित्तं यद्वशादवधिज्ञानं क्षायोपशमिकमित्युच्यते अत्रनि र्वचनमभिधातु काम आह खउवसमियमित्यादि क्षायोपशमिकं येन कारणेन तदावरणीयानां अवधिज्ञानावरणीयानां कर्मणामुदीर्णानां क्षयेण अनु दीर्णानामुदयावलिकामप्राप्तानामुपशमेन विपाकोदयविष्कंभणलक्षणेनावधिज्ञानमुत्पद्यते तेन कारणेन क्षायोपशमिकमित्युच्यते क्षायोपशमश्च देशघातिर रसस्पर्द्धकानां उदये सति भवति न सर्वघातिरसस्पर्द्धकानां अथ किमिदं देशघातीनि सर्वघातीनिवारसस्पर्द्धकानीति उच्यते इह कर्मणां प्रत्येकमनंता तानि रसस्पर्द्धकानि भवन्ति रसस्पर्द्धकस्वरूपं च कर्मप्रकृतिटीकायां सप्रपञ्चमुपदर्शितमिति न भूयो दर्श्यते तत्र केवलज्ञानावरणीयादिरूपाणां सर्वघाति तिनां प्रकृतीनां सर्वाण्यपि रसस्पर्द्धकानि सर्वघातीनि देशघातिनीनां पुन: कानिचित्सर्वघातीनि कानिचिद्देशघातीनि तत्र यानि चतु:स्थानकानित्रि स्थानकानि वा रसस्पर्द्धकानि तानि नियमत: सर्वघातीनि द्विस्थानकानि पुन: कानिचिद्देशघातीनि कानिचित्सर्वघातीनि एकस्थानकानि तु सर्वाण्यपि

सूत्र

## जोणिआणयकोहेऊ खाउवसमियंखाओ वसमियं तयावरणिज्जाणं कम्माणं उदिस्राणं खएणं अणुदिस्राणं उवसमे

भाषा

अने १ पं॰पंचेंद्री तिर्यंच संगीपर्याप्ता सम्यग्द्दष्टीने मुलगुण उत्तरगुणना क्षयोपसम करी अवधि उपजे को॰किस्से हे॰हेते खा॰ क्षयोपसमिक थी अव धिग्यान उपजे ते॰तेहक्षयोपसमी कहीये त॰ते अवधिना आवरण जेकर्म एतले ते अवधि ग्यानना आवरण छांदनरूपढांकणोछे तेकर्ममध्ये उ॰जेउद यऊवाछे तेहनोतो ख॰क्षयथयोछे तेक्षयकह्याछे अ॰अने जेकर्मनो अण उदयछे तेहनो उ॰उपसमभावछे एतले जे उदय आव्या तेहना क्षयथी उदय

देयशाणेन्य इ उक्तं च चउतिठाणरसाणिय सव्वघाईणि होंति फड्डाणि दुठाणियाणि मीसाणि देसघाईणि सेसाणि अथ किमिदं रसस्य चतुःस्थानक त्रिस्थानकत्वादि उच्यते इह शुभप्रकृतीनां रसः क्षीरखण्डादिरसोपमोऽशुभप्रकृतीनां तु निम्बघोषातक्यादिरसोपमः उक्तं च घोसाडनिंबुवमो असुभाण सुभाण खीरखण्डुवमो क्षीरादिरसश्च स्वाभाविक एकस्थानकः द्वयोस्तु कर्षयोरावर्त्तने कृते सति योऽवशिष्यते एकः कर्षः स द्विस्थानकः त्रयाणां कर्षाणामावर्त्तने कृते सति एकः कर्षोऽवशिष्टः त्रिःस्थानकः चतुर्णां कर्षाणामावर्त्तने कृते सत्युद्धरति य एकः कर्षः सः चतुःस्थानकः एकस्थाने कोऽपि च रसो जललविंदुचुलकार्द्धचुलुकप्रसृत्यञ्जलिकरकरकक भद्रोणादि प्रक्षेपान्मन्दमन्दतरादि बहुभेदत्वं प्रतिपद्यते एवं द्विस्थानकादयोऽपि एवं कर्मणामपि चतुःस्थानकादयो रसा भावनीयाः प्रत्येकमनंतभेदभाजश्च कर्मणां चैकस्थानकरसात् द्विस्थानकादयो रसाः यथोत्तरमनन्तगुणा वेदितव्याः उक्तं च अणन्तगुणियो कमेणियरे तत्र अशुभप्रकृतीनां चतुःस्थानकरसबन्धः प्रस्तररेखासदृशैरनन्तानुबन्धिभिः क्रोधादिभिः क्रियते दिनकरातपशोषित तडागभूरेखा सदृशैरप्रत्याख्यानसंज्ञैः क्रोधादिभिस्त्रिस्थानकरसबन्धः सिकताकणसंहति गतरेखासदृशैः प्रत्याख्यानावरणसंज्ञैर्द्विस्थानकरसबन्धो जलरेखा सदृशैस्तु संज्वलनसंज्ञैरेकस्थानकरसबन्धः शुभप्रकृतीनां पुनरेतदेव व्यत्यासेन योजनीयं नवरं द्विस्थानकादारभ्य तथाचोक्तं पव्वयभूमीवालुयजलरेहा सरिससंपराएसु चउठाणाई असुभाणसेसयाणं तु वच्चासो इतिशेषकाणां शुभप्रकृतीनां व्यत्यासो द्रष्टव्यः स च द्विस्थानकादारभ्य यथोक्तं प्राक् अथ कथमवसीयते यदुत द्विस्थानकादारभ्य व्यत्यासो नैकस्थानकादारभ्य उच्यते शुभप्रकृतीनामेकस्थानकरसबन्धस्यासम्भवात् असम्भव कथमिति चेत् उच्यते इहात्यन्तविशुद्धो वर्त्तमानः शुभप्रकृतीनां चतुःस्थानकमेव रसमाबध्नाति ततो मन्दमन्दतरविशुद्धौ त्रिस्थानकद्विस्थानकं वा संक्लेशाद्धा यांतु वर्त्तमानस्य शुभप्रकृतयो बन्धमेव नायान्ति अकृतस्तस्यामवस्थायां तत्रतरस्थानकचिन्तायां अपि नरकगतिप्रायोग्यं बध्नातीति संक्लिष्टस्यापि वैक्रियतैजसादिकाः प्रकृतयो बन्धमायान्ति तासामपि

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



स्वभावतो द्विस्थानकस्यैव रसस्य बन्धो नैकस्थानस्य ततः शुभप्रकृतीनां व्यत्यासेयोजना द्विस्थानकरसबन्धादारभ्य कर्त्तव्या तथाशुभप्रकृतीनामेकस्थान
कस्यापि रसस्य बन्धो भवतीति कथमवसेयमुच्यते इह द्विधाघातिन्योऽशुभप्रकृतयस्तद्यथा सर्वघातिन्यो देशघातिन्यश्च तत्र याः सर्वघातिन्यस्तासां जघन्य
पदेऽपि द्विस्थानक एव रसो बन्धमायाति नैकस्थानकस्तथा स्वाभाव्यात्तथाहि क्षपकश्रेण्यारोहेऽपि सूक्ष्मसंपरायगुणस्थानकचरमसमयेऽपि वर्त्तमानस्य केवल
ज्ञानावरणकेवलदर्शनावरणयो रसबन्धो द्विस्थानक एवेति नैकस्थानकः यास्तु देशघातिन्य स्तासां श्रेण्यारोहाभावे बन्धमागतानां नियमात्सर्वघातिनमेव
रसं बध्नाति यत उक्तं कर्मप्रकृतौ "सेढिमसाडिवन्धन्तिया सव्वघाईणि सव्वघाती य रसो जघन्यपदेऽपि द्विस्थानको दुट्ठाणियाणि मीसाणि देसघाईणि सेसा
णीति वचनात्ततो न श्रेण्यारोहाभावे तासामेकस्थानकरसबन्धसंभवः श्रेण्यारोहे त्वनिवृत्तिबादरसंपरायगुणस्थानकाद्धायाः संख्येयेषु भागेषु गतेषु सत्सु
तत ऊर्द्ध्वमेकस्थानकरसबन्धसम्भवः तदानीं च ज्ञानावरणचतुष्टय दर्शनावरणत्रय पुरुषवेदांतरायपञ्चकसंज्वलनचतुष्टयरूपाः सप्तदशप्रकृतीर्व्यतिरिच्य शेषा
बन्धमेव नायांति तद्बंधहेतुव्यवच्छेदात् ततो न तासामेकस्थानरसबन्धसम्भवः सप्तदशानां तु प्रकृतीनां तदा बन्धसंभवादेकस्थानको रसबन्धः प्राप्यते उक्तं च
"आवरणमसव्वग्घं पुंसं जलणंतरायपयडीओ चउठाणपरिणयाओ दुत्ति चउठाणाओ सेसाओ" अत्र चउठाणपरिणयाओत्ति एकस्थानकपरिणता द्विस्थानकपरि
णताश्चतुःस्थानकपरिणताश्चेत्यर्थः शेषं सुगमं ततः सप्तदशप्रकृतीनामेकस्थानकरसबन्धसम्भवात्तदपेक्षयाऽशुभप्रकृतीनामेकस्थानकरसबन्धादारभ्य योज
नाकृता सर्वघातीनि च रसस्पर्द्धकानि सकलमपि स्वघात्यं ज्ञानादिगुणमुपघ्नन्ति तानि च स्वरूपेण ताम्रभाजनवत् निश्छिद्राणि घृतमिवातिशयेन स्निग्धा
नि द्राक्षेवतनुप्रदेशोपचितानि स्फुटिकाच सद्धारवज्रातीव निर्मलानि उक्तं च "जो घाएइ सविसयं सयलं सो होइ सव्वघाइरसो सो निच्छिड्डो निद्धो तणु
ओ फलिहब्भहरविमलो" यानि च देशघातीनि रसस्पर्द्धकानि तानि स्वघात्यं ज्ञानादिगुणं देशतो घ्नन्ति तदुदयेऽवश्यं क्षयोपशमसम्भवात्तानि च स्वरूपेण

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



नेकविधविवरसंकुलानि तथाहि कानिचित्कटद्वा तिस्वल्प ... कानिचित्कम्बल इव मध्यमविवरशत संकुलानि कानिचित्पुनरति
सूक्ष्मविवरसंकुलानि यथा वासांसि तथा तानि देशघातीनि रसस्पर्द्धकानि स्तोकस्नेहानि भवन्ति वैमल्यरहितानि च उक्तं च देशविघाइत्तणओइ
१२८ यरोकटकंबलंसुसंकासो विविहबहुछिद्दभरिओ अप्पसिणेहो अविमलोय अघातिनीनां तु रसस्पर्द्धकानि स्वरूपेण न सर्वघातीनि नापि देशघातीनि
केवलं सर्वघातिरसस्पर्द्धकसंपर्कत: सर्वघातिरससदृशानि भवन्ति यथा स्वयमचौरा अपिचौरसम्पर्कतश्चौरप्रतिभागा उक्तं च जाणनविसउघाइत्तणंमि ताणंपि
सव्वघाइरसो जायइघाइ सगासेण चोरयावेह चोराणं तदेवमुक्तानि सर्वघातीनि देशघातीनिच रसस्पर्द्धकानि सम्प्रतियथा क्षयोपशमो भवति
तथा भाव्यते तत्र देशघातिनीनां मति ज्ञानावरणीयादिकर्म प्रकृतीनां सर्वघातीनि रसस्पर्द्धकानि अध्यवसायविशेषतो देशघातीनि कर्त्तुं प्रक्रम्यन्ते
तथा स्वाभाव्यात् कथमेतदवसेयमिति चेत् उच्यते इह यदि बंधनएव देशघातीनि रसस्पर्द्धकानि भवेयुर्नाध्यवसायविशेषतस्तथापरिणमनेनापि तर्हिमति
ज्ञानादीनामभाव एव सर्वथाप्राप्नोति तथाहि मत्यादीनि ज्ञानानि क्षायोपशमिकानियत उक्तमनुयोगद्वारेषु खओवसमिया आभिणिबोहियनाणलद्धी
खओवसमिया सुयणाणलद्धी खओवसमिया ओहिनाणलद्धी इत्यादि क्षयोपशमश्च विपाकोदयवर्त्तीनां प्रकृतीनां देशघातिनामेव रसस्पर्द्धकाना
मुदयेभवन्ति न सर्वघातिनां देशघातीनि च रसस्पर्द्धकानि बन्धमधिकृत्यानिवृत्तिबादरसंपरायाः संख्येयेषु भागेषु गतेषु सत्सु तत ऊर्द्ध्वं प्राप्यते
ततस्तस्या अवस्थाया अर्वाक् सर्वथामति ज्ञानादीनि न प्राप्नुवन्ति सर्वघाति रसस्पर्द्धकविपाकोदयभावतस्तेषां क्षयोपशमा संभवात् अथच
मतिज्ञानादि लब्धभावस्तस्या अवस्थायाः संप्राप्तिः तत इतरेतराश्रयदोष वैवक्षत सुखोपनिपातित्वान्न कदाचि दपिमतिज्ञानादिसम्भवः
अपिच मतिश्रुताज्ञाना चक्षुर्दर्शनान्यपि क्षायोपशमिकानि क्षयोपशमश्च यदिविपाकोदये भवति तर्हि देशघातिरसस्पर्द्धकानामेव न सर्वघाति रस

For Private and Personal Use Only

स्पर्द्धकानां देशघातीनि च रसस्पर्द्धकानि अनिवृत्तिबादरसंपरायाद्धायां ततस्तेषामपि ततोयोगभाव: प्राप्नोति अथचन घातिरसस्य सर्वजीवानामपिता मवस्थामप्राप्तानामस्तूनिविद्यन्ते ततोयश्चमेतदुररीकर्त्तव्यं भवन्ति देशघातिनीनां प्रकृतीनां सर्वघातीन्यपि रसस्पर्द्धकान्यध्यवसायविशेषतो देशघातीनीति अथ यथादेशघातिनि रसस्पर्द्धकानि अध्यवसायविशेषतो देशघातीनि भवन्ति तथा सर्वघातिनो: केवलज्ञानावरण केवलदर्शनावरणयोरपि कस्मान्नोप जायन्ते उच्यते तथा स्वाभाव्यात् तथाहि तथारूपाएव तेपुद्गला: केवलज्ञान केवलदर्शनावरणयोर्योग्यायेद्दिस्थानकरसपरिणता अपि न देशघातिनो भवंति नापि तेषां विपाकोदयनिरोधसंभव: शेषाणांतु सर्वघातिप्रकृतीनां रसस्पर्द्धकानि भवंत्येवाध्यवसायविशेषतो विपाकोदयविष्कंभभांजि तथा स्वाभा व्यादेतच्चावसीयते तथाकार्यदर्शनात्तथाहि सम्यक्त्वसम्यग् मिथ्यात्व देशविरतिसामायिकच्छेदोपस्थापन परिहारविशुद्धिक सूक्ष्मसंपरायसंयमा: क्षायोप शमिका उपवर्ण्यते यतउक्तं खउवसमियासम्मदंसण लद्धी उवसमियासम्मामिच्छादं सणलद्धी खओवसमिया सामाइयलद्धी खओवसमियाच्छे ओवट्ठावणलद्धी एवं परिहारविसुद्धीयलद्धी सुहुमसंपराययलद्धी खउवसमियाचरित्ताचरित्तलद्धी इति अन्यत्राप्युक्तं मिच्छत्तजमुइन्नं तं खीणं अणुइन्नंतरखीणं अणुइयं च उवसंतं मीसीभावपरिणयं वेयज्जंतं खउवसमं तथा क्षययत्युपशमयतिचा प्रत्याख्यानावृत: कषायां स्तान् स ततो येन भवेत्तस्य विरमणो वुद्धिकल्याच्छेदोपस्थाप्यं वा हत्तं सामायिकं चरित्रं वा स ततो लभते प्रत्याख्यानावरणत्तयोपशमात् क्षयोपशमश्च भवति विपाकोदयनिरोधे ततोऽवसीयते भवन्ति मिथ्यात्वाप्रत्याख्यान प्रत्याख्यानावरणादीनां सर्वघातिप्रकृतीनां सर्वघातीनि रसस्पर्द्धकान्यध्यवसायविशे षतोविपाकोदयभावयुक्तानीति कृतं प्रसंगेन तत्रावधिज्ञानावरणप्रकृतीनां तथाविधविशुद्धाध्यवसाय भावत: सर्वघातिषु रसस्पर्द्धकेषु देशघातिरूप तयापरिणमितेषु देशघातिरसस्पर्द्धकेष्वपि चातिस्निग्धे ष्वल्परसाकेष्व ...आवलिकामात्रस्थांशस्य क्षयेनुदीर्णस्योपशमे विपाकोदयविष्कंभरूपे जीव

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



स्यावध्यादयोगुणाः प्रादुःष्यंति उक्तंच निहिएसु सव्वघाईरसे सुफड्डे सुदेसघाईणं जीवस्सगुणाजायंति ओहिमणचक्खुमाईया अतनिहितेष्विति देशघाती
रसस्पर्द्धकतया व्यवस्थापितेषु शेषं सुगमं सर्वघातीनि च रसस्पर्द्धकानि अवधिज्ञानावरणीयस्य देशघातिरसस्पर्द्धकतया परिणमयति कदाचिद्विशिष्टगु
णप्रतिपत्तिमंतरेण कदाचित्पुनर्विशिष्टगुणप्रतिपत्त्या विशिष्टगुणप्रतिपत्तिमन्तरेण कथमिति चेत् उच्यते इह यथादिवसकरमण्डलस्य घनपटलच्छादितस्य
कथञ्चिद्विरलो परिणामेन घनपटलपुद्गलानां निःस्नेहीभूयपरिश्वयतः समुपजातेन रंध्रेण तिमिरनिकरोपसंहारहेतवोभानवः स्वावपातदेशास्पदं द्रव्य
मुद्योतयन्ति तथाप्रकृतिभास्वरस्यात्मनो मिथ्यात्वादिहेतुप्रत्ययोपजनितावधिज्ञानावरणपटलतिरस्कृतस्वरूपस्य संसारे परिभ्रमतः कथञ्चिदेवमेव तथाविध
शुभाध्यवसायप्रवृत्तितो वधिज्ञानावरणसम्बन्धिनां सर्वघातिरसस्पर्द्धकानां देशघातिरसस्पर्द्धकतया ज्ञातानामुदयावलिका प्राप्तस्यांशस्य परिक्षयतोमुदयो
मुदयावलिकाप्राप्तस्योपशमतः समुद्भूतेन क्षयोपशमरूपेण रंध्रेण विनिर्गतोवधिज्ञानलोकप्रसाधयति स्वकार्यं कदाचित्पुनर्विशिष्टगुणप्रतिपत्तितः सर्व
घातीनि रसस्पर्द्धकानि देशघातीनि भवन्ति तथाचोक्तं अहवेत्यादि अथवेति प्रकारांतरोपदर्शने प्रकारान्तरताचगुणप्रतिपत्तिमन्तरेणोत्पदेक्ष्य द्रष्टव्यागु
णाम्मूलोत्तररूपाः तान् प्रतिपन्नो गुणप्रतिपन्नः अथवा गुणैः प्रतिपन्नः पात्रमिति कृत्वा गुणैराश्रितो गुणः प्रतिपन्नः अनेन पात्रतायां सत्यां स्वयमेव
गुणाभवन्तीति प्रतिपादयति उक्तंच नोदन्वा मर्थितामेति नचांभोभिर्न पूर्यते आत्मातुपात्रतां नेयः पात्रमायांति सम्पदः अणारं गृहं न विद्यते अगारं



**णांओहिनाणं समुप्पज्जइ अहवागुण पडिवन्नस्स अणगारस्सओहिणाणंसमुप्पज्जइतं समासओछव्विहं पन्नत्तंतंजहा**



आख्यानथी तेहना उपसमवा थकी उ० अवधि ग्यानस० उपजे अ०अथवा वली कुणने गु०जे गुणवंत अथमाथीने तिणे अप्रमादीयादिक गुणप० पडिव

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



यस्या सावनगार: परित्यक्तद्रव्यभावग्टहत्यर्थ: तस्य प्रशस्तेष्वध्यवसायेषु वर्त्तमानस्य सर्वघातिरसस्पर्द्धकेषु देशघातिरसस्पर्द्धकेषु देशघातिरसस्पर्द्धकतया जातेषु पूर्वोक्तक्रमेण क्षयोपशमभावतो वधिज्ञानमुपजायते मन: पर्यायज्ञानावरणीयस्य तु विशिष्टसंयमाप्रमादादिप्रतिपत्तावेव सर्वघातीनि रसस्पर्द्धकानि देशघातीनि भवन्ति तथा स्वाभाव्यात्तच्च तथा स्वाभाव्यं बन्धकाले तथा रूपाणामेव तेषां बन्धनात् ततो मन: पर्यवज्ञानं विशिष्टगुणप्रतिपन्नस्यैव वेदितव्यं मतिश्रुतावरणाचक्षुर्दर्शनावरणांतराय प्रकृतीनां पुन: सर्वघातीनि रसस्पर्द्धकानि येन तेन वाध्यवसायेनाध्यवसायानुरूपं देशघातीनि रसस्पर्द्धकानि भवन्ति तेषां तथा स्वाभाव्यात्ततो मत्यावरणादीनां सदैव देशघातिनामेव रसस्पर्द्धकानामुदय: सदैव क्षयोपशम: उक्तं च पञ्चसंग्रहमूलटीकायां मतिश्रुतावरणचक्षुर्दर्शनावरणांतराय प्रकृतीनां च सदैव देशघातिरसस्पर्द्धकानामेवोदय: ततस्तासां सदैवौदयिक [क्षा]योपशमिकौ भावाविति कृतं प्रसङ्गेन तं समासओ इत्यादि त दवधिज्ञानं समासत: संक्षेपेण षड्विध षट् प्रकारं प्रज्ञप्तं तद्यथा आनुगामिकमित्यादि, तत्र गच्छन्तं पुरुषमासमंतादनुगच्छत्येवं शीलमानुगामिकमानुगाम्येवानुगामिकं स्वार्थेक: प्रत्यय: अथवाअनुगम:प्रयोजनं यस्यतत् आनुगामिकं यल्लोचनवत् गच्छन्तमनुगच्छति तदवधिज्ञानमा

सूत्र

**आणुगामियं१ अणाणुगामियं२ वड्ढमाणयं३ हीयमाणयं४ पडिवाईयं५ अपडिवाईयं६ सेकिंतं आणुगामियंओहिनाणं**

भाषा

ज्याके अ०एहवा अणगार साधु तेहना व्रतानेकाइ आगाररहित साधुने उ०अवधि ग्यान स०उपजे तं०तेहना वली स०समुचय संखेपे सामान्यथी छ० छप्रकारे प०प्रकप्या तं०तेकहेछे तिमछे आ०आणुं ग्रामिकते जिहां जाइ तिहां साथे आवे तिमजजाणे देखे तेभूमि मूकतो आवे तिहां नदेखे अ०जि णेखेत्रे आवे ज्ञान उपनो तिहांज आवतो वली जाणे देखे अने अन्यखेत्रसाथेन आवे व०दिन२ प्रतेम्यांनमा पर्यायहत्थाइ ते अवध्यसाय रूपकरीने हा०

For Private and Personal Use Only

नुगामिकमिति भावः तथा न आनुगामिकं अनानुगामिकं शृंखलाप्रतिबद्धप्रदीपइव यं गच्छंतमनुगच्छति तदवधिज्ञानमनानुगामिकं उक्तं च अणाणुगामिओ णुगच्छइ गच्छंतं लोयणं जहा पुरिसं इयरोऽणाणुगच्छइ ठिअपईवोव्व गच्छंतं तथा वर्द्धत इति वर्द्धमानं ततः संज्ञायां कन् प्रत्ययः बहुबहुतर घनप्रक्षेपादिभिर्वर्द्धमानदहनज्वालाकलापइव पूर्वावस्थातो यथायोगं प्रशस्तर तरध्यवसायभावतोभि वर्द्धमानमवधिज्ञानं वर्द्धमानकं बज्ञासक्तत् विशिष्टशुभ विशुद्धिसापेक्षत्वात् तथा हीयते तथाविध सामग्र्यभावतो हानिमुपगच्छति हीयमानं कर्मकर्तृविवक्षायामानशप्रत्ययः हीयमानमेव हीयमानकं कुत्सिता ल्पाज्ञाते इति कः प्रत्ययः पूर्वावस्थातोऽधोधो ह्रासमुपगच्छत्यवधिज्ञानं ततः हीयमानकमिति भावः उक्तं च हीयमाणं पुव्वावत्थाओ अहोहोऽह्रस्समाणं इति तथा प्रतिपतनशीलं प्रतिपातीति यत् उत्पन्नं सत् क्षयोपशमानुरूपं कियत्कालं स्थित्वा प्रदीप इव सामस्त्येन विध्वंसमुपयाति तत् प्रतिपातीत्यर्थः हीयमानकप्रतिपातिनोः कः प्रतिविशेष इति चेदुच्यते हीयमानकं पूर्वावस्थातो धोधो ह्रासमुपगच्छदभिधीयते यत्पुनः प्रदीपइव निर्मूलमेककालमपगच्छति तत्प्रति पातितथानप्रतिपाति यत् केवलज्ञानादर्वाक् भ्रंशमुपयाति तदप्रतिपातीत्यर्थः आह आनुगामिकानानुगामिकरूपभेदद्वये एव शेषभेदावर्द्धमानकादयोऽतर्भावयितुं शक्यंते तत्किमर्थं तेषामुपादानं उच्यते यद्यप्यंतर्भावयितुं शक्यंते तथाप्यानुगामिकमनानुगामिकं चेत्युक्तेन वर्द्धमानकादयो विशेषा अवगन्तुं शक्यंते ते विशेषावगमकारणाय च महतां शास्त्रारम्भप्रयासस्ततो विशेषं ज्ञापनार्थं विशेषभेदोपन्यासकरणं सेकिंतमित्यादि अथ किं तत् आनुगामिकमवधिज्ञानं आनुगामिकमवधिज्ञानं द्विविधं प्रज्ञप्तं तथा अंतगतं च मध्यगतं च इहांतशब्दः पर्यंतवाची यथावनांते इत्यत्र ततश्च अंतेपर्यंते गतं व्यवस्थितं अंतगतं इहार्थत्रयव्याख्या अंतेगतमात्मप्रदेशानां पर्यन्तेस्थितं अंतगतं इयमत्रभावना इहावधिरुत्पद्यमानः कोपिस्पर्द्धकरूपतयोत्पद्यते स्पर्द्धकं च नामावधिज्ञानप्रभाया गवाक्षजालादिद्वारविनिर्गतप्रदीपप्रभाया इव प्रतिनियतो विच्छेदविशेषः तथाचाह जिनभद्र

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



गणिक्षमाश्रमण: स्वोपज्ञभाष्यटीकायां स्पर्द्धकमवधिच्छेदविशेष इति तानिचैकजीवस्य संख्येयान्यसंख्येयानि भवन्ति यतउक्तं मूलावश्यक प्रथमपीठिकायां फड्डाय असंखेज्जासंखेज्जे यावि एगजीवस्सोति तानि च विचित्ररूपाणि तथाहि कानिचित्पर्यंतवर्त्तिष्वात्मप्रदेशेषूत्पद्यंते तत्रापि कानिचित् पुरत: कानि चित् पृष्ठत: कानिचिदधोभागे कानिचिदुपरितनभागे तथा कानिचिन्मध्यवर्त्तिष्वात्मप्रदेशेष्ववधिज्ञानमुपजायते तदात्मनोंते पर्यंतेस्थितमिति कृत्वा अंत गतमित्युच्यते तैरेवपर्यंतवर्त्तिभिरात्मप्रदेशै: साक्षादवधिरूपेण ज्ञानेन ज्ञानान्नामेवैरिति अथवा औदारिकशरीरस्यांते गतं स्थितं अंतगतंकथाचिदेकदि शोपलम्भात् इदमपि स्पर्द्धकरूपमवधिज्ञानं अथवा सर्वेषामप्यात्मप्रदेशानां क्षायोपशमभावेपि औदारिकशरीरांतेनैकयादिशायहशादुपलभ्यते तदप्यन्त गतं आह यदिसर्वात्मप्रदेशानां क्षयोपशमस्तत: सर्वत: किंनपश्यन्ति उच्यते एकदिशेच क्षयोपशमसंभवात् विचित्रोहि क्षयोपशमस्तत: सर्वेषामप्यात्मप्रदेशा नामित्थंभूत एव स्वसामग्रीवशात्क्षयोपशम: संदृत्तोयदौदारिकशरीरमपेक्ष्यकयाचिद्विवक्षितयैकयादिशापश्यतीति उक्तं च चूर्णौ ओरालियसरीरंतेठियंगयं

सूत्र आणुगामियंओहिनाणंदुविहंपण्णत्तंतंजहा अंतगयंच२मज्झगयंच१सेकिंतंअंतगयंअंतगयंतिविहंपण्णत्तं पुरओअंतगयं

भाषा दिन २ प्रते हाणि पामे हीण अध्यवसाय करीने ४ प० ऊपनापछे केवलुं एककाल रहे पछे ततकाल पडे अध्यवसायकरी ५ अ० ते ऊपनो थको न जाइ केवल ग्यान उपजावे पछे ६ तेजीव थकी जाइ से० तेजिहां जाइ तिहां साथे आवेते आ० अवधि ग्यानगुरु उतरकहेछे हे गोतम आ०साथे आवेते अणुगामिकउ० अवधिग्यानना दु०वे प्रकार प०परुप्याकह्या तं०तेजिमछे तिम कहेछे अं०जीवप्रदेसा अंतिजाणे देखेते १ म० जीवना प्रदेशमध्यथी जाणे देखे से०ते अथहिवे कि०कुण अंतगतनोभेद स्वामी उतरकहेछे अं०अंतगतना ति०तिणप्रकार प०परुप्या तं०तेजिमछे तिमकहेछे

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



तिएगट्ठं तंचायप्पएसफड्डगावच्छिएगदिसोवलंभाउय अंतगयसोहिनाणंभन्नइ अहवा सव्वायप्पएसेसुविसुद्धि सुवि ओरालियसरीरगं तेणाएगदिसिपासणा गयंति अंतगयंभन्नइ तृतीयोर्थ एकदिग्भाविना तेनावधिज्ञानेन यदुद्योति तंक्षेत्रं तस्यांतेवर्त्तते तदवधिज्ञानमवधिज्ञानवतस्तदंते वर्त्तमानत्वात् ततोऽंते एकदिग्रूपस्यावधिज्ञानविषयस्य पर्यंते व्यवस्थितमंतगतं चशब्दोदेशकालाद्यपेक्षया स्वगतानेकभेदसूचकः तथामध्यगतं चेति दूरमध्यं प्रसिद्धं दण्डा दिमध्यवत् ततो मध्येगतं मध्यगतं दूदमपि त्रिधाव्याख्येयं आत्मप्रदेशानां मध्ये मध्यवर्त्तिष्वात्मप्रदेशेषु गतं स्थितं मध्यगतं दूदंच स्पर्द्धकरूपमवधिज्ञानं स र्वदिगुपलम्भकारणं मध्यवर्त्तिनामात्मप्रदेशानामवसेयं अथवा सर्वेषामप्यात्म प्रदेशानां क्षयोपशमभावेप्यौदारिकशरीरमध्यभागेनोपलब्धिस्तन्मध्येगतं उक्तं चूर्णौ उरालियसरीरमज्झे फड्डगविसुद्धीओ सव्वाइपएसयिसुद्धीउवासव्वदिसोवलंभत्तण ओमज्झगउत्तिभन्नति अथवा तेनावधिज्ञानेन यदुद्योतितंक्षेत्रं सर्वा सुदिक्षु तस्य मध्ये मध्यभागे गतं स्थितं मध्यगतमवधिज्ञानिनस्तदुद्योति तं क्षेत्रं सर्वासुदिक्षुतस्य मध्ये मध्यभागेगतंमध्यवर्त्तित्वात् आह च चूर्णिकृत् अहवा उवलद्धिखेत्तस्स अवहिपुरिसोमज्झगओत्ति अतोवामज्झगओओहीभन्नइति च शब्दः स्वगतानेकभेदसूचकः सेकिंतमित्यादि अथकिंतत् अंतगतं अन्तगतंत्रि विधत्रिप्रकारं प्रज्ञप्तं तद्यथा पुरओ अंतगतमित्यादि तत्र पुरतोऽवधिज्ञानिनः स्वव्यपेक्षया अग्रभागे अंतगतंपुरतोऽंतगतं तथामार्गतःपृष्ठतोऽंतगतं तथापार्श्वतोर्द्वयोः पार्श्वयोरेकतरपार्श्वतोवांतगतं पार्श्वतोंतगतं अथ किंतत् पुरतोंतगतं सेजहेत्यादि सविवक्षितो यथानामकः कश्चित्पुरुषः

सूत्र **मग्गओअंतगयं२ पासओ अंतगयं ३ सेकिंतं पुरओअंतगयं पुरओ अंतगयं सेजहानामए केइपुरिसेउक्कंवाचुडलि**

भाषा पु०आगला अंतगतनो प्रदेशांकरी तेजाणवा म०पाछिला तेपाछलापासाना अं०अंतगतना प्रदेशाकरीने जाणे २ पा०विहु पासाना० अंतगतनाजीव

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



अवसर्पव्यपिपदेष्वेन्नारांतत्वमेत्वमत: सोऽपुंशीतिमागधिक भाषालक्षणात् सर्व्वमपिचि प्रवचनमर्द्धमागधिक भाषात्मकमर्द्धमागधिकभाषया तीर्थंकृतां देशना प्रवृत्ते: तत: प्राय: सर्वत्रापि मागधिकभाषालक्षणमनुसरणीयं उल्कांवेति उल्का दीपिका वा शब्द: सर्वोपि विकल्पार्थ: चटुली वा चटुलीपर्यंत ज्वलित तृणपूलिका अलातं वा अलातमुल्मुकं अग्रभागे ज्वलत्काष्ठमित्यर्थ: मणिर्वामणि: प्रतीत: ज्योतिर्वाज्योति: शरावाद्या धारोज्वलन्नग्नि: आहच चूर्णिकृत्जो इति मल्लगाइ ठिउअगणीजलंतो इति प्रदीपं वा प्रदीप: प्रतीत: पुरतोऽग्रतो हस्ते दण्डादौ वा कृत्वा प्रणोल्लेमाणोत्ति प्रणुदन् २ हस्तस्थितं दण्डा ग्रास्थितं वा क्रमेण स्वात्यनुसारत: प्रेरयन् २ गच्छेत् यायात् एष दृष्टांत: उपनयस्तु स्वयमेव भावनीय: तत उपसंहरति सेतं पुरओ अंतगतं से शब्द:

यंवा अलायंवा मणिंवा पईवंवा जोइंवा पुरओकाउं पणुल्लेमाणे २ गच्छिज्जा सेतंपुरओ अंतगयं सेकिंतंमग्गओअं तगयं मग्गओ अंतगयं सेजहानामए केइपुरिसे उक्कंवा चुडलियंवा अलायंवा मणिंवा पईवंवा जोइंवा मग्गओ





नाप्रदेशां करीने जाणे से० ते अथ किये किं० कुणकेहो पु० आगलि थकी अंतगत गुरुतर कहे के पु० आगला अंतप्रदेशमां थी जाणे से० तेज० यथा दृष्टांते ना० नाम इति संभावनाइ के० कोइ एक पु० पुरुष उ० दीवाचराक चु० पूलोके वलतो हाथे ग्रहे तथा डांडे अ० उबाडो वा० अथवा प० दीवोवा० अथवा ग० मणोरत्नविशेषवा० अथवा जो० सरावलामध्ये बलती अग्निप्रते पु० आगलिकरीने प्रणे ठेलतो थको ठेलतो थको २ ग० जाइचाले ते आगलोज वस्तुदेखे पणि अनेरीने न देखे तिम इचकप्रदेशां थकी आगली जीवना प्रदेशा थी देखे से० ते आगली अन्तगत अवधिज्ञान कह्यो से० अथ किसे किं० कहो म० पाछला जीवना प्रदेशां थको अं० अंतगत देखे ते म० जीवना पाछिला अंतगत प्रदेश थकी देखे ते अवधिज्ञान

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



प्रतिवचनोपसंहारदर्शने तदेतत् पुरतोऽंतगतं इयमत्र भावना यथा स पुरुष उल्कादिभिः पुरतएव पश्यतिनान्यत्र तदवधिज्ञानं पुरतोऽंतगतमभिधीयते एवं मार्गतो अंतगतं पार्श्वतोऽंतगतमप्येवं भावनीयं नवरं अणुकट्टे मार्गे अणुकट्टे मार्गेत्ति हस्तगतं दण्डाग्रादिस्थितं वा अनुपश्चात्कर्षन् अनुत्कर्षन् पृष्ठतः पश्चात् कृत्वा समाकर्षन्२ इत्यर्थः तथा पासओ परिकट्टे माणेऽत्ति पार्श्वतो दक्षिणपार्श्वतोऽथवा वामपार्श्वतो यद्वा द्वयोरपि पार्श्वयोरुल्कादिकं हस्तस्थितं दण्डाग्रादिस्थितं वा परिकर्षन्पार्श्वभागे कृत्वा क्रमार्षन् समाकर्षन्नित्यर्थः सेकिं तं मज्झगतमित्यादिकिंगदसिद्धं नवरं मस्तके

काउं अणुकड्ढेमाणे२ गच्छिज्जा सेतंमग्गओ अंतगयं सेकिंतंपासओ अंतगयं पासओ अंतगयं सेजहानामए केइ पुरिसे उक्कं वा चुडलियंवा अलायंवा मणिंवा पईवंवा जोइं वा पासओ काउं परिकड्ढेमाणे२ गच्छिज्जा सेतंपासओ



से० ते यथा दृष्टांते ना० नाम इति संभावनाइ के० कोई एक पुरुषजात उ० दीवी चीराक चु० बलतो पुलो छेहडो ग्रहने अ० उवाडो वा० अथवा प० दीवो अथवा म० मणिरत्नविशेष जो०सरावला मांहिबलती अग्नि म० पाछला करीने पाछपाछी अ० ठेलता ठेलतो पाच भोग० जाइने जिमके पाछला थी वस्तुदेखे पणि अनेरीदिशने न देखे तिम पाछला जीवना प्रदेशा थी देखे से० तेहमो पाछलो अंतगत अवधिज्ञान करीने से० ते अथ हिवे कि० कुणकेहवो पा० पाखतीने अंतगत अवधि से० ते यथा दृष्टांते ना० नाम इति संभावनाइ के० कोई एक पु० पुरुषउ० दीवा० अथवाचू० पूलो छेहडे बलतो हाथ माहिग्रहीने अ० उवाडो वा० अथवा प० दीवो वा० अथवा म० मणिरत्न विशेष अथवा जो० सरावलामांहिबलती अग्नि पा० पाखती का० करीने ते वेहु पासे करी प० ठेलतो ठेलतो वेहु पासे लेइने ग० जाइते वेहु पासे जाणे देखे तिमवेहुपसवाडांनी जीवना प्रदेशा थकी देखेजाणे से० तेएह

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



शिरसि कृत्वा गच्छेत्तदेतन्मध्यगतं द्रूयमत्र भावना यथा तेन मस्तकस्थेन सर्वासुदिक्षु पश्यति एवं येनावधिज्ञानेन सर्वासु दिक्षु पश्यति तन्मध्यगतमिति इत्थंभूतां च व्याख्यां सम्यगनवबुध्यमानः शिष्यः प्रश्नं करोति अंतगयस्स मज्झगयस्सेत्यादि अंतगतस्य मध्यगतस्यच परस्परं क प्रतिविशेषः प्रतिनियतो विशेषः सूरिराह पुरओ इत्यादि पुरतोऽंतगतेनाऽवधिज्ञानेन पुरतएवाग्रत एवसंख्येयानि एकादीनि शीर्षप्रहेलिकापर्यंतानि असंख्येयानिवा योजनानि एतावत्सु योजनेष्ववगाढं द्रव्यमित्यर्थः जानाति पश्यति ज्ञानं विशेष ग्रहणात्मकं दर्शनं सामान्यग्रहणात्मकं तदेवं पुरतोऽंतगतस्य शेषावधिज्ञानेभ्यो भेदः

**अंतगयंसेतंअंतगयं सेकिंतंमज्झगयंमज्झगयंसेजहानामएकेदूपुरिसे उक्कंवाचुडलियंवाअलायंवामणिंवापईवंजोइंवा मत्थएकाउं ससुव्वहमाणे२ गच्छिज्जा सेतंमज्झगयं अंतगयस्स मज्झगयस्स कोपइविसेसोपुरओ अंतगएणं ओहिना णेणंपुरओचेव संखिज्जाणिवा असंखिज्जाणिवा जोयणाइं जाणइपासइपासओ अंतगएणं ओहिनाणेणं पासओ**

वापाखतीनो अंतगत अवधि ग्यान कह्यो १ से० ते अथ हिवे किं० केहवो म० मध्यगत जीवना प्रदेसा थकी अवधि ग्यांन उपजे से० तेज० यथा दृष्टांते ना० नाम इति संभावनाइ के० कोइएक पु०;पुरुष उ०दीवी चीराग अथवा चु० पूलो छेहडे बलतो हाथमाहि अ० उवाडो अथवा प० दीवो वा अथवा म० मणिनामारत्नविसेष जो० सरावला माहि बलती अग्नि म० दीवा आदिकमाहिला काइंक जोति मस्तक उपरि स० चढावे चढावीने ग० जाइ से० तिम एहमध्यगत अवधिग्यान करी जाणो अं० अंतर्गत ते पाखतीना जीवना प्रदेशाथकी अवधि ग्यान उपजे म० मध्यगतनाजीवना प्रदेसा थकी अवध ग्यान उपजे ते बेहुमध्ये को० दीवादीकनो केहवो उ० विशेष फेर कुणगो०हे गोतम पु०जे आगलिथी उपजे अं० अंतगत उ०अवधि ग्याननो धणी अव

सूत्र

भाषा

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



एवं शेषाणामपि परस्परं भावनीयः न वरं सव्वओ ] समंताति सर्वतः [ सर्वासु दिग्विदिक्षु समन्तात् सर्वैरेवात्मप्रदेशैः सर्वैर्वा विशुद्धस्पर्द्धकैः उक्तं च चूर्णौ सव्वउति सव्वासु दिसि विदिसासु समंता इति सव्वायप्पएसेसु सव्वेसु वा विसुद्धि फड्डगेसु इति अत्र सव्वायप्प एसेसुइत्यादितृतीयार्थे सप्तमी भवति च तृतीयार्थे सप्तमी यदाह पाणिनिः स्वप्राकृतलक्षणाव्यत्ययोप्यासामित्यत्र सूत्रे तृतीयार्थे यथाति सुतेसु अलंकिया पुहवी इति अथवा समंता इत्यत्र स इत्यवधिज्ञानीपराम्टश्यते समंता इति ज्ञानाशेषं तथैव अथ किमवधिज्ञानं केषामनुमतां भवतीति चेत् उच्यते देवनारकी तीर्थंकृतामवश्यं मध्यगतं तिरश्चामंतगतं मनुष्याणां तु यथा क्षयोपशममुभयं तथाचोक्तं प्रज्ञापनायां नेरइयाणं भंते किं देसोही सव्वो

सूत्र चेव संखिज्जाणिवा असंखिज्जाणिवा जोयणाइं जाणइ पासइ मग्गओ अंतगएणं ओहिनाणेणं मग्गओ चेव संखिज्जा णिवा असंखिज्जाणिवा जोयणाइं जाणइ पासइ मज्झगएणं ओहिनाणेणं सव्वओ समंता संखिज्जाणिवा असंखि

भाषा धिग्याने करीने पु० आगलेज चे० निश्चयकरी सं० उत्कृष्टा संख्याता लगे [ अ० असंख्याता १ जो० जोजनालगे जा० जाणे ग्यान करी पा० देखे दर्शनकरी ते जिहां ज्ञानकहइ तिहां दर्शननिश्चय कहइ न० पाछला अंतगत उ० अवधग्यान नो धणी म० [ अवधि ज्ञान करीने पाछला ज वस्तु चे० निश्चय संख्याता वा० अथवा अ० असंख्याता १ जो० जोजनालगे जा० [ जाणे पा० देखे पा० वेहुपासतीना अ० अंतगत उ० अवधि ग्याननो धणी ते अवधि ग्यानकरीने पा० वेहुपासजनिश्चे सं० सङ्ख्याता वा अथवा अ० असङ्ख्याता २ जो० जोजना लगे जा० जाणे पा० देखे स० मध्यगत कहिओछे उ० ते अवध ज्ञाननोधणी अवधज्ञाने करीने स० सर्वदिशि विदसी [ लगे सं० सङ्ख्याता अथवा अ० असंख्याता जो० जोजनालगे [ जा० जाणे पा० [ देखे से० तेएह अ० अनुगामिकः

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



च्छो गोयमाओ देसोऽवी सव्वोऽवी एवं जावथणिय कुमाराणं पञ्चेंदिय तिरिक्खजोणियाणं पुच्छागोयमादेसोऽवी नसव्वोऽवी मणुस्साणं पुच्छागो यमा देसोऽवीविसव्वोऽवीवि वाणमंतरजोइ सियवेमाणियाणं अहानेरइयाणं वच्छति च नेरइयदेवतित्थकरायउहिस्स बाहिराहोंति पासंति सव्वओखलु सेसादेसेण पासंति देवनारकाणां च मध्यगतमवधिरूपज्ञानमा भववर्त्ति भवप्रत्ययत्वात्तस्य तीर्थंकृतांत्वाकेवल ज्ञानं केवलज्ञानोत्पत्तौ तस्य व्यवच्छेदात् ननु संख्येयान्यसंख्येयानि वा योजनानि पश्यन्तीत्युक्तं तत्र के जीवा: कतियोजनानि पश्यंतीति उच्यते इह तिर्यग्मनुष्या अनियतपरिमाणावधयस्तथा हि केचिदङ्गुलासंख्येय भागं केचिदङ्गुलं केचिद्वितस्तिं यावत्केचित्संख्येयानि योजनानि केचिदसंख्येयानि मनुष्यास्तु केचित्परिपूर्णं लोकं केचिल्लोके पिलोकमात्राणि खण्डानि ये तु देवनारकास्ते प्रतिनियतावधिपरिमाणास्ततस्तेषां प्रतिनियतं क्षेत्रपरिमाणमुच्यते तत्र रत्नप्रभा नारका जघन्यतोऽर्द्ध चतुर्थानि गव्यूतानि क्षेत्रमवधिज्ञानत: पश्यंति उत्कर्षतश्चत्वारि गव्यूतानि शर्कराप्रभा नारका जघन्यत स्त्रीणि गव्यूतानि उत्कर्षतोऽर्द्ध चतुर्थानि वालुकप्रभानारकाजघन्यतोऽर्द्ध तृतीयानि गव्यूतानि उत्कर्षतस्त्रीणि गव्यूतानि पंकप्रभानारका जघन्यतोद्वेगव्यूते उत्कर्षतोऽर्द्धतृतीयानि धूमप्रभानारकाज घन्यतोऽर्द्धाधिकं गव्यूतमुत्कर्षतोद्वे गव्यूते तम: प्रभानारकाजघन्येनैकं गव्यूतमुत्कर्षत: सार्द्धं गव्यूतं तमस्तम: प्रभानारकाजघन्यतोऽर्द्धं गव्यूतमुत्कर्षतोग व्यूतं तथाचोक्तं प्रज्ञापनायां रयणप्पभापुढविनेरइयाणंभंते केवइयंखेत्तं ओहिणाजाणंति पासंति गोयमा जहन्नेणं अद्धुट्ठाइं गाउयाइंजाणंति पासंति उक्को सेणं चत्तारिगाउयाइं जाणंति पासंति सक्करप्पभा पुढविनेरयाणं पुच्छागोयमा जहन्नेणंतिन्निगाउयाइं उक्कोसेणं अद्धुट्ठाइं गाउयाइं जाणंति पासंति धूमप्पभापुढविनेरइयाणं पुच्छागोयमा जहन्नेणंदिवड्ढं गाउयंउक्कोसेणं दोगाउयाइं जाणंति पासंतित मापुढविनेरइयाणं पुच्छागोयमाजहन्ने णंगाउयंउक्कोसेणं दिवड्ढं गाउयं जाणंतिपासंति अहसत्तमाए पुच्छागोयमा जहन्नेणं अद्धगाउयंउक्कोसेणं गाउयं जाणंति पासंति असुरकुमारा:

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



पुनरवधिज्ञानेन जघन्यतः क्षेत्रं पंचविंशतियोजनानि पश्यंति उत्कर्षतोऽसंख्येयान्द्वीपसमुद्रान् नागकुमारादयः पुनः सर्वेपि स्तनित कुमारपर्यं
ता जघन्यतः पञ्चविंशतियोजनानि पश्यंति उत्कर्षतः संख्येयान् द्वीपसमुद्रान् एवं व्यन्तरा अपि तथाचोक्तं असुरकुमाराणंभंते ओहिणाकेवइयं खेत्तं
जाणंति पासंति गोयमा जहन्नेणं पणवीसंजोयणाइं उक्को सेणं असंखेज्जदीव समुद्दे ओहिणा जाणंति पासंति एवं जावथणिय कुमाराणवाण
मंतराजहा नागकुमारा इह पंचविंशतियोजनानि भवनपतिर्व्यन्तरा जघन्यतस्ते पश्यन्ति येषामायुर्दशवर्ष सहस्रप्रमाणं न शेषाः आहच भाष्यकृतपण
वीसजोयणाइं दसवाससहस्सठिईं जेसिमितिज्योतिष्का पुनर्देवाजघन्यतोपि संख्येयान् द्वीपसमुद्रानवधिज्ञानतः पश्यंति उत्कर्षतोपि संख्येयान्
द्वीपस मुद्रानवधिज्ञानतः पश्यंति केवलमधिकतरान् यदाह जोइसियाणंभंते केवइयं खित्तं ओहिणाजाणंति पासंति गोयमाजहन्नेणं
विसंखेज्जदीव समुद्दे उक्कोसेणविसंखेज्जदीव समुद्दे सौधर्मकल्पवासिनो देवाः पुनरवधिज्ञानतो जघन्येनांगुलासंख्येयभागमात्रं पश्यन्ति
उत्कर्षतोऽधस्ताद्रत्नप्रभायाः पृथिव्याः सर्वान्तिममधस्तं भागं यावत् तिर्यक्तु असंख्येयान् द्वीपसमुद्रान् ऊर्ध्वं तु स्वकल्पविमानस्तूपध्वजादिकं एव
मीशानदेवा अपि यत्ताउनन्वंगुला संख्येयभागमात्रक्षेत्रपरिमितावधिः सर्वजघन्यो भवति सर्वजघन्यश्चावधिस्तिर्यग् मनुष्येष्वेव नशेषेषु यदाह भाष्यकृत् स्व
कृतभाष्यटीकायां उत्कृष्टो मनुष्येष्वेव नान्येषु मनुष्यतिर्यग्योनिष्वेव जघन्यो नान्येषु शेषाणां मध्यम एवेति तत्कथमिह सर्वजघन्य उक्तः उच्यते सौधर्मादिदेवानां
परभविकोप्युपपातकालेवधिः संभवति स च सर्वजघन्योपि कदाचिदवाप्यते उपपातानांतरं तु तद्भवजः ततो न कश्चिद्दोषः आह च दुःखमांधकारनिमग्नजि
नप्रवचनप्रदीपो जिनभद्रगणिक्षमाश्रमणः वेमाणियाणमंगुलभागमसंखं जहन्नओहि हवइ उववाएपरभविओ तब्भवजो होइतोपच्छा एवं सनत्कुमारादिदेवानाम
पि द्रष्टव्यं नवरमधोभागदर्शन विशेषतः सम्प्रदर्श्यते सनत्कुमारमाहेन्द्र देवा अधस्तात् शर्करप्रभायाः सर्वांतिममधस्तनं भागं यावत्पश्यंति ब्रह्मलोक

For Private and Personal Use Only

लांतकदेवास्तृतीय पृथिव्याः महाशुक्रसहस्रारकल्पदेवाश्चतुर्थपृथिव्याः आनतप्राणतारणाच्युतदेवाः पञ्चमपृथिव्याः अधस्तनमध्यमग्रैवेयकदेवाः षष्ठपृथिव्याः उपरितनग्रैवेयकदेवाः सप्तमपृथिव्याः अनुत्तरोपपातिनःसंपूर्णलोकनालिं चतुर्दशरज्ज्वात्मिकामिति उक्तंच प्रज्ञापनायां सोहम्मगदेवाणं भंते केवइयं खेत्तं उहिणा जाणंति पासंति गोयमा जहन्नेणं अंगुलस्स असंखेज्जभागं उक्कोसेणं जावइमीसे रयणप्पभाए पुढवीए हेट्ठिल्ले चरिमंते तिरियं जाव असंखेज्जदीवसमुद्दे उड्ढं जावसगाइं विमाणाइं ओहिणा जाणंति पासंति एवं ईसाणगदेवा वेसमणकुमारदेवा एवं चेव नवरं अहे जावदोच्चाए सक्करप्पभाए पुढवीए चरिमंते एवमाहिंदे देवा विबंभलोगलंतगदेवातच्चाए पुढवीहेट्ठिल्ले चरिमंते महासुक्कसहस्सारे देवा चउत्थीए पंकप्पभाए हेट्ठिल्ले पुढवीए हेट्ठिल्ले चरिमंते २ आणयपाणआरणअच्चुय देवा अहे पंचमाए धूमप्पभाए पुढवीए हिट्ठिल्ले चरिमंते हिट्ठिममज्झिमगेवेज्जगदेवा अहे जावछट्ठी एतमाए पुढवीएहिट्ठिल्ले चरिमंते उवरिमगेवेज्जगदेवाणंभंते केवइयं खेत्तं ओहिणा जाणंति पासंति गोयमा जहन्नेणं अंगुलस्स असंखेज्जभागं उक्कोसेणं अहे सत्तमाए पुढवीए हेट्ठिल्ले चरिमंते तिरियं जाव असंखेज्जदीवसमुद्दे उड्ढं जावसगाइं विमाणाइं ओहिणा जाणंति पासंति अणुत्तरोववाइयाणं देवाणं भंते केवइयं खेत्तं ओहिणा जाणंति पासंति गोयमा संभिन्नं लोगनालिं जाणंतिपासंति सम्प्रति नारकादीनामेवावधेः संस्थानंचिन्त्यतेतत्र नारकाणामवधिस्तत्प्राकारस्तप्रो नामकाष्ठसमुदायविशेषोयोनदी प्रवाहेणप्लाव्यमानोदूरादानीयते स चायतस्त्र्यस्रश्चभवति तदाकारोवधिर्नारकाणां भवनपतीनां सर्वेषामपि पल्लकसंस्थानसंस्थितः पल्लको नामलाटदेशे धान्याधारविशेषः सचोर्द्धायत उपरिचकिञ्चित् संक्षिप्तः व्यंतराणां पटहसंस्थानसंस्थितः पटह आतोद्य विशेषः सच किञ्चिदायतः उपर्यधश्च समप्रमाणः ज्योतिष्कदेवानां झल्लरी संस्थानसंस्थितः झल्लरीचर्मावनद्धविस्तीर्णवलयाकारा आतोद्यविशेषरूपा देशविशेषे प्रसिद्धाः सौधर्मदेवादीनामच्युत देवपर्यन्तानां मृदङ्गसंस्थानसंस्थितः मृदंगो वाद्यविशेषः सचाधस्ताद्वि

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



णीर्णउपरिच तनुकःसुप्रतीतः ग्रैवेयकदेवानां ग्रथितपुष्पशिखाक भृतचंगेरीसंस्थानसंस्थितःअनुत्तरोपपातिक देवानां कन्या चोलका परपर्यायजवनालक संस्थानसंस्थितः उक्तंचनेरयाणं भंते ओही किं संठाणसंठिए पन्नत्ते गोयमा तप्पागारसंठाणसंठिए पन्नत्ते असुरकुमाराणंपुच्छा गोयमा पल्लगसंठाण संठिए पन्नत्ते एवंजावथणिय कुमाराणं वाणमंतराणं पुच्छा गोयमा पडहसंठाणसंठिएपन्नत्ते जोइसियाणं पुच्छा गोयमा झल्लरिसंठाणसंठिए पन्नत्ते सोहम्मदेवाणं पुच्छागो मुइंगसंठाणसंठिए पन्नत्ते एवं जाव अच्चुयदेवाणंगेवेज्जगदेवाणं पुच्छागोयमापुप्फचंगेरीसंठाणसंठिए पन्नत्ते अणुत्तरोववाइयदेवा णंपुच्छा गोयमाजवनालगसंठाणसंठिए पन्नत्ते त प्राकारादीनां च व्याख्यानमिदं भाष्यकदाह तप्पेण समागारोओही तेउसवायपक्क सो उड्ढाययोउपल्लो उवरिंच सकिंचि संखित्तो नज्ञाय उसभो वियपडहो हेठो वरिंपइ एसो चम्मावणद्ध विच्छिन्नवलयरूवाय झल्लरिया उड्ढाइ उमुइंगोहेठाउइातकोवरिं तणुओपुप्फसिहावलिरइ याचंगेरी पुप्फचंगेरीजवनालउत्तिभन्नइ कन्नोसरकंपुप्फवुउकुमारीए इतितिर्यग्मनुष्याणांचावधिर्नानासंस्थानसंस्थितोयथास्वयं भूरमणो दधौमत्स्याः अपिच तत्र मत्स्यानां वलयाकारं संस्थानं निषिद्धं तिर्यग्मनुष्यावधितु तदपि भवति उक्तंच नाणागारो तिरियमणुएसुमच्छासयंभु रमणोव्व तत्थवलयं निसिद्धं तस्स पुणातयंपि पोज्जाहि तथाहि भवनपतिव्यन्तराणामर्द्धं प्रभूतवधिर्भवतिवैमानिकानामधः ज्योतिष्कनारकाणां तिर्यग् विचित्रो नरतिरश्चा आहच भवणवइवंतराणं उड्ढंवड्ढगो अहोवसेसाणंनारग जोइसियाणं तिरियं उरालिउचित्तोत देवसुक्तमानुगामिकमवधिज्ञानं तथा

**ज्जाणिवा जोयणाइं जाणइ पासइ सेतं आणुगामियं ओहिनाणं सेकिं तं अणाणुगामियं ओहिनाणं अणाणुगा**

उ० अवधज्ञानकहीये १ से० ते अथ हिवे किं० कुण अ० अणाणुगामिक उ० अवध ज्ञानः अ० अ० अवधिज्ञान ते जेअनानुगामिक उ० अवधि ज्ञान





For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



माह सेत्तं आणुगामियं सम्प्रत्यनानुगामिकं शिष्यः पृच्छन्नाह से किंतमित्यादि अथ किं तत् अनानुगामिकमवधिज्ञानं सूरिराह अनानुगामिकमवधि ज्ञानं सविवक्षितो यथा नामकः कश्चित्पुरुषः पूर्वः सुखंदुःखामामिति पुरुषः पुरिशयनाद्वा पुरुष एकंमहज्जोति स्थानमग्निस्थानं कुर्यात् कस्मिंश्चित् स्थाने अनेकज्वालाशतसंकुलमग्निं प्रदीपं वास्थूलवर्त्तिज्वालानुरूपमुत्पादयेदित्यर्थः ततस्तत् कृत्वा तस्यैव ज्योतिः स्थानस्य परिपर्यन्तेषु२ परितः सर्वासु दिक्षु पर्यंतेषु परिपूर्णन्२ परिभ्रमन् इत्यर्थः तदेव ज्योतिः स्थानं ज्योतिः स्थान प्रकाशितं चेतं पश्यति अन्यत्र गतो न पश्यति एष दृष्टान्तः उपनयमाह एवमेव अनेनैव प्रकारेणानानुगामिकमवधिज्ञानंयत्रैव क्षेत्रेव्यवस्थितस्य सतःसमुत्पद्यते तत्रैवव्यवस्थितःसन् संख्येयानिअसंख्येयानिवा योजनानिस्वावगाढ

सूत्र

मियंओहिनाणं सेजहानामए केइ पुरिसे एगं महंतं जोइट्ठाणं काउतस्सेव जोइट्ठाणस्स परिपेरंतेहिं२ परिघोले माणे परिघोलेमाणे२ तमेवजोइट्ठाणंपासइ अन्नत्थगए न पासइ एवामेवअणाणुगामियं ओहिनाणं जत्थेवससुप्प ज्जइतत्थेव संखिज्जाणिवाअसंखिज्जाणिवा संबद्धाणिवाअसंबद्धाणिवा जोयणाइं जाणइपासइ अन्नत्थगएनपासइसेतंअ

भाषा

से० ते यथा दृष्टांते करीने के० कोई एक पुरुष ए० एक म० मोटो जो० बलतो अग्निनो ठा० स्थानक अंगीठो का० करीने त० तेहीज जो० अग्निना स्थानक ने अंगीठानो प० पाखती पाखती २ प० फिरतो फिरतो रहे तिवारे ते पुरुष२ त० तेहीज१ जो० जोतिसहित ते अग्निनो ठामछे तेहने जा० तिहां जे जाने देखे अ० अनेरे ठामि जाइ तिवारे पा० न जाणे न० न देखे ए० इणा दृष्टांते अ० आर्यः अ० अनानुगामिक उ० अवधि ग्याननो धणीपि णः ज० जिहां अवधि उपनो छे तिहां आवे तिवारे देखे जिहां उपजे तिहां जेणे खेत्र रहित छे ते क्षेत्रकुं अवगाहीने सं० तिहां संख्याता अ०असंख्या

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



क्षेत्रेण सह सम्बन्धानि असम्बद्धानिवा अवधिरुद्धि कोपिजायमान: स्वावगाढदेशादारभ्यनिरंतरं प्रकाशयतिकोपि पुनरपांतराले अन्तरंकृत्वापरत: प्रकाश यति तत: उच्यते संबद्धान्य संबद्धानि वेतिजानाति विशेषाकारेण परिछिनत्ति पश्यति सामान्याकारेणावबुध्यते अन्यत्र देशान्तरे गतो नैव पश्यति अवधि ज्ञानावरणक्षयोपशमस्य तत् क्षेत्रसापेक्षत्वात् तदेवमुक्तमनानुगामिकं सम्प्रतिवर्द्धमानकमनवबुध्यमान: शिष्य: प्रश्नं करोति सेकिंतमित्यादि अथ किं तत् वर्द्धमानकमवधिज्ञानं सूरिराह वर्द्धमानकमवधिज्ञानं प्रशस्तेष्वध्यवसायस्थानेषु वर्त्तमानस्य इह सामान्यतो द्रव्यलेश्याः परं जितं चित्तमध्यवसायस्थानमु च्यते तच्चानवस्थितं तल्लेश्याद्रव्यसाचिव्ये विशेषसंभवात्ततो बहुवचनमुक्तं प्रशस्तेष्वित्यनेन वा प्रशस्तलक्षणादिद्रव्यलेश्योपरंजितत्वव्यवच्छेदमाह प्रशस्तेष्व ध्यवसायेषु वर्त्तमानस्येति किमुक्तं भवति प्रशस्ताध्यवसायस्थानकलितस्य सर्वत: समं तादवधिपरिवर्द्धते इति सम्बन्ध: अनेनाविरतसम्यग्दृष्टेरपि परिवर्द्ध मानको वधिर्भवतीत्याख्यायते तथावर्तमानचरित्रस्य प्रशस्तेष्वध्यवसायस्थानेषु वर्त्तमान चारित्रस्य एतेन देशविरतसर्वविरतयोर्वर्द्धमानकमवधिमभिधत्ते



णाणुगामियंओहिनाणं २ सेकिंतंवड्ढमाणयंओहिनाणंवड्ढमाणयं ओहिनाणंपसत्थेहिं अज्झवसाणट्ठाणेहिं वड्ढमाणच



तायोजना लगे सं० संलग्न वलदेखे ते संबंधकहीइ अ० अनेकोइ एकने अवधि ज्ञान उपजतो विचाले आंतरो करीने आगलि देखे ते असंबंध कहीइं तेणे कारणि संबंध असंबंध कहीइं जो० एतला योजनालगे जा० जाणे पा० देखे दर्शन करी अ० अनेरे ठामे अनेरी जायगा ग० जाइ तिवारे न० न जाणे न० न देखे २ से० ते अणाणुगामिक: उ० अवधिज्ञान कहीयेर से० ते कुणकहवो व० वृद्धिपामतो जाय वर्द्धमान उ० अवधि ज्ञान दर्शन प० अ तिही निर्मला भला अ० अध्यवसाय ठा० ते मनना परिणाम नास्थानक व० वर्त्तवंता ते वधता थका व० निर्मला कलुषभाव रहित वधतार वर्द्धमान च०

वर्त्तमानकश्चावधिरुत्तरोत्तरां विशुद्धिमासादयतो भवति नान्यथा तत आह विशुद्ध्यमानस्य तदावरणमकलं कविगमतउत्तरोत्तरविशुद्धिमासादयत: अनेना विरतसम्यग्दृष्टेर्वर्द्धमानका वधे: शुद्धिजघन्यत्वमाह तथाविशुद्ध्यमानचारित्रस्य च इदं च विशेषणं देशविरत सर्वविरतयोर्वेदितव्यं सर्वत: सर्वासु दिक्षु: समन्तादवधि: परिवर्द्धते सच कस्यापि जन्तो सर्वजघन्यादारभ्य प्रवर्द्धते तत: प्रथमत: सर्वजघन्यमवधिं प्रतिपादयतिजावइया इत्यादि त्रिसमया हारकस्य आहारं गृह्णातीत्याहारक: त्रय: समया: समाहृता स्त्रिसमया त्रिसमयमाहारक स्त्रिसमयाहारक नाम नाम्नेकार्थे समासो बहुलमिति समास: तस्यत्रि समयाहारकस्य सूक्ष्मनामकर्मोदयवर्त्तिन: पनकजीवस्य पनकश्चासौ जीवश्च पनकजीवो वनस्पतिविशेषस्तस्य यावती यावत्परिमाणा अवगाहंते क्षेत्रं यस्यां स्थिताजन्तव: सावगाह नातनुरित्यर्थ: जघन्या त्रिसमयाहारकशेषसूक्ष्मपनक जीवापेक्षया सर्वस्तोका एतावत्परिमाणमवधेर्जघन्यं क्षेत्रं तु शब्दएव कारार्थ: सचावधारणे तस्य चैवं प्रयोग: जघन्यमवधिक्षेत्रमेतावदेवेति अत्र चायं सम्प्रदाय: य: किल योजनसहस्रपरिमाणा यामो मत्स्य: स्वशरीरबाह्यै क देशएवोत्पद्यमान: प्रथमसमये सकलनिजशरीरसंबद्धमात्मप्रदेशानामायामं संख्यातांगुलासंख्येयभागबाहल्यं स्वदेहविष्कंभायामविस्तारं प्रतरं करोति

सूत्र

## रित्तस्स विसुज्झमाणस्स विसुज्झमाणचरित्तस्स सव्वओसमंताओहीवड्ढइजावइयाति समयाहारगस्ससुहुमस्स पणगजी

भाषा

चारित्रना परिणाम वि० चोखा निर्मला वर्त्तता कलुषभावरूपदोष रहित परिणाम वि० चोखाईजनिर्मलाज ते विसुद्ध परिणाम च० चारित्रना धणीने स०सर्वदिसिसर्वविदिसिदेखे तेणेथकी उ० अवधि ग्यांन वधतोजाइ इहांगाथे हिवे एहनी गाथा करी विशेष कहेछे जा० ते जेतली अवगाहना ति०त्रिण समयना उपनानी आ०ते आहार लेइने सु० सूक्ष्म प०पणगते फुलिणना जी० जीवने जेवडी ऊइ जेठ० अवगाहना जेतलोखे ज० जघन्य उ० अवधि

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



तमपि द्वितीयसमये संहृत्यांगुलासंख्येय भागबाहुल्यविष्कंभं मत्स्यदेह विष्कंभायाममात्र प्रदेशानां सूचीं विरचयति ततस्तृतीयसमये तामपि संहृत्यांगुलासंख्येयभागमात्र एवस्वशरीरबहिःप्रदेशे सूक्ष्मपरिणामपनकरूपतयोत्पद्यते तस्योपपातसमयादारभ्यतृतीये समये वर्त्तमानस्य यावत्प्रमाणं शरीरं भवति तावत्परिमाणं जघन्यमवधेः क्षेत्रमालंबनवस्तुभाजनमवसेयं उक्तं च योजनसहस्रमानो मत्स्योमृत्वास्वकायदेशेयः उत्पद्यते हि पनकः सूक्ष्मत्वेनेह स ग्राह्यः १ संहृत्य चाद्यसमये सह्यायामं करोति च प्रतरं संख्यातीताख्यांगुलविभागबाहुल्यमानं तु २ स्वतनुपृथुत्वमात्रं दीर्घत्वेनापि जीवसामर्थ्यात् तमपि द्वितीया समये संहृत्य करोत्यसौ सूचिं ३ सङ्ख्यातीताख्यांगुलविभागविष्कंभमाननिर्दिष्टां निजतनुपृथुत्वदीर्घां तृतीयसमये तु संहृत्य ४ उत्पद्यते च पनकः स्वदेहदेशेससूक्ष्मपरिणामः समयत्रयेण तस्यां वगाहना यावती भवति ५ तावज्जघन्यमवधेरालंबनवस्तुभाजनं क्षेत्रं दृष्टमित्यमेव मुनिगणसुसम्प्रदायात्समवसेयं ६ आह किमिति योजनसहस्रायामो मत्स्यः किंवा तस्य तृतीयसमये स्वदेह देशे सूक्ष्मपनकत्वेनोत्पादः किंवा त्रिसमयाहारकत्वं परिगृह्यते उच्यते इह योजनसहस्रायामो मत्स्यः सकिलत्रिभिः समयैरात्मानं संक्षिपति महतः प्रयत्नविशेषात् महाप्रयत्नविशेषारूढश्चोत्पत्ति देशेवगाह नामारभमाणोतीव सूक्ष्ममारभते ततो महामत्स्यस्य ग्रहणं सूक्ष्मपनकश्चान्यजीवापेक्षयासूक्ष्मतमावगाहनो भवति ततः सूक्ष्मपनकग्रहणं तथा उत्पत्तिसमयेद्वितीयसमये चातिसूक्ष्मो भवति चतुर्थादिषु च समयेष्वतिस्थूरः त्रिसमयाहारकस्तुयोग्यस्ततस्त्रिसमयाहारकग्रहणं उक्तं च मच्छोमहल्लकाओसंखित्तोजोउ तीहिं समएहिं सकिरपयत्तविसेसेण सण्हमोगाहणं कुणइ १ सण्हयरासण्हयरो सुहुमोपणओ जहन्नदेहोय सुबहुसविसेसविदिट्ठोसण्हयरो सव्वदेहेसुर पढमबीएतिसण्हो जायमहल्लो चउत्थयाईसु तईयसमयंमिजोग्गो गहिओतोतिसमयाहारो ३ अन्येतु व्याचक्ष्यते त्रिसमया हारकस्येति आयामप्रतरसंहरणसमयद्वयं तृतीयश्च समयः सूची संहरणोत्पत्तिदेशागमविषयः एवं त्रयः समयाविग्रहगत्यभावाच्चै तेषु त्रिष्वपि समयेष्वाहारकस्तत उत्पादसमयएव

For Private and Personal Use Only

त्रिसमयाहारकः सूक्ष्मपनकजीवो जघन्यावगाहनस्त तत्तच्छरीरमानं जघन्यमवधिः क्षेत्रं तच्चायुक्तं यतस्त्रिसमयाहारकस्येति विशेषणं पनकस्य नच मत्स्यायामप्रतरसंहरणसमयौ पनकभवस्य सम्बन्धिनौ किंतु मत्स्यभवस्य तत उत्पादसमयादारभ्य त्रिसमयाहारकस्येति द्रष्टव्यं नान्यथा एतावत्प्रमाणं जघन्य क्षेत्रस्यावधिस्तैजसभाषा प्रायोग्यवर्गणापान्तरालवर्त्ति द्रव्यमालभते तयाभासादव्वाणमंतराएत्थलहइए पढमउइति वचनात्तदपि चालभ्यमानं द्रव्यं द्विधा गुरुलघु अगुरुलघुच तत्र तैजसप्रत्यासन्नं गुरुलघुभाषा प्रत्यासन्नं चागुरुलघु तद्गतांश्च पर्यायान् चतुःसङ्ख्यानेव वर्णरसगन्धस्पर्शलक्षणान् पश्यति न शेषान् यत आह दव्वाइं अंगुलावलिसंखेज्जातीतभाग विसयाइं पेच्छइचउगुणाइं जहन्नओमुत्तिमंताइं अत्रजघन्यइतिजघन्यावधिज्ञानीतदेवं

सूत्र

वस्स ओगाहणा जहणाओहोखित्तंजहन्नं तु १ सव्वबहुअगणिजीवा निरंतरं जत्तियं भरिज्जं सुखित्तं सव्वदिसागंपरमोही

भाषा

ज्ञाननो धणी जाणे एतले किस्युं ते जेतली अवगाहना १ त्रिण समयना ऊपनाओ सूक्ष्मपणग जीवनी होइ एतलो खेत्र जघन्य अवधि ज्ञाननो धणी देखे ते किम तेहुम जेते मछीने आपणा शरीरनीने थाने थापे सूक्ष्म जे पणग फुलणाके तेमध्ये ते जीवमछ उपजे फूल तिवारे जे प्रथम समय आहारल्ये तिवारे जेशरीरना प्रदेश एकसहस्र जोजन ऊंता तेमांहि थकीआपणा प्रदेश तेसंकेलवार बीजे समें शरीर बांधे तिणे समे तेहनो अवगाहना सूक्ष्महुवेछे ते भणी तीजे समय शरीरबांधता अवगाहना सूक्ष्म हुवेछे एतलो खेत्र आंगुलनुं असंख्यात भाग हुवेते अवधि ज्ञाननी जघन्यएत लोखेत्रजाणे देखे १ एहवा जघन्य अवधि ज्ञानीनो देखवो कह्यो हिवे उत्कृष्टो अवधि ज्ञानना धणी खेत्रदेखे तेकहेछे तेवली दूहा अवधिज्ञाने नारकी नीचो घणुं देखे भवनपती वाणव्यंतर उंचो देखे ज्योतिषी नीचो घणो देखे विमानिक नीचो घणुं देखे ते अवधिनो देखवानो आकारसर्व

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



जघन्यमवधेः क्षेत्रमभिधायसाम्प्रतमुत्कृष्टमवधिमभिधातुकाम आह सव्वबहुअगणि यतश्चान्य एकोपि जीवो न कदाच नापि प्राप्यते सर्वबहवः सर्वबहवश्च ते अग्निजीवाश्च सूक्ष्मबादररूपाः सर्वबह्वग्निजीवाः कदा सर्वबह्वग्निजीवा इति चेत् उच्यते यदा सर्वासु कर्मभूमिषु निर्व्याघातमग्निकायसमारम्भकाः सर्व बहवो मनुष्यो स्तो च प्रायोजितस्वामितीर्थंकरकाले प्राप्यन्ते यदा चोत्कृष्टपदवर्त्तिनः सूक्ष्मानलजीवास्तदा सर्वबह्वग्निजीवाः उक्तं च अव्वाघाए सव्वासु कम्मभूमिसु जया तदारंभा सव्वबहु वो मणुस्साहोंति जियजिणिंदकालंमि उक्कोसियाय सुहुमाजया तया सव्व बहु अगणिजीवा इति निरंतरमिति क्रिया विशेषणं यावत्परिमाणं क्षेत्रं भृतवन्तः यत्तदुक्तं भवति नैरन्तर्येण विशिष्टसूचीरचनया यावद्भृतवन्तः भृतवन्त इति च भूतकालनिर्देशः अजितस्वामिका लएव प्रायः सर्वे बहवोनलजीवा अस्यामवसर्पिण्यां सम्भवन्तिस्म इति ख्यापनार्थः इदं चानन्तरोदितं क्षेत्रमेकदिक्कमपि भवति तत आह सर्वदिकं अनेन सूचीभ्रमणप्रमितत्वं क्षेत्रस्य सूचयति परमस्याशावधिस्तु परमावधिः एतावदनन्तरोदितं सर्वबहुनलजीवसूचीपरिक्षेप प्रमितं क्षेत्रमङ्गीकृत्य निर्दिष्टः प्रति पादितो गणधरादिभिः क्षेत्रनिर्दिष्टः एतावत् क्षेत्रं परमावधेर्भवतीति अर्थः किमुक्तं भवति सर्वबह्वग्निजीवानिरंतरं यावत् क्षेत्रं सूचीभ्रमणेन सर्वदिकं भृतवन्त एतावति क्षेत्रे यान्यवस्थितानि द्रव्याणि तत्परिच्छेदसामर्थ्ययुक्तः परमावधिः क्षेत्रमधिकृत्य निर्दिष्टो गणधरादिभिः अयमिह सम्प्रदायः सर्वबह्व ग्निजीवाः प्रायोऽजित स्वामितीर्थंकरकाले प्राप्यन्ते तदारम्भकमनुष्यबाहुल्य सम्भवात्सूक्ष्माश्चोत् कृष्टपदवर्त्तिनस्तत्रैव विवक्ष्यन्ते ततश्च सर्वबहवो नलजीवा भवन्ति तेषां स्वबुद्ध्या षोढावस्थानं परिकल्पते एकैकक्षेत्रप्रदेशे एकैकजीवावगाहनया सर्वतश्चतुरस्रो घन इति प्रथमं स एव घनो जीवैः स्वावगाहनादि भिरिति द्वीतीय एवं प्रतरोपि द्विभेदः श्रेणिरपि द्विधा तथाद्याः पञ्चप्रकारा अनादेश्यास्तेषु क्षेत्रस्याल्पीयस्तया प्राप्यमाणत्वात् षष्ठस्तु प्रकारः सूत्रादेशः उक्तं च एक्केकागास पएसजीवरयणाइ सावगाहेयचउरंस घणं पयरं सेढीवच्छोहयादेसो ततश्चासौ श्रेणिः स्वावगाहना संस्थापित सकलानलजी

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



यावलीरूपावधिज्ञानिन: सर्वासु दिक्षु शरीरपर्यंतेन भ्राम्यते साच भ्राम्यमाणा असंख्येयान् लोकमात्रान् क्षेत्रविभागेनालोके व्याप्नोति एतावत् क्षेत्रमव धेरुत्कृष्टमिति उक्तंच निययावगाहणागणिजीवसरीरावलीसमन्तेण भामिज्जइ ओहिण्णाणि देहपज्जतउसायइयगंतुणमलोगे लोगागासप्पमाणमेत्ताइ ताइं असंखेज्जाइं इदमोहि खेतमुक्कोसं इदं च सामर्थ्यमात्रमुपवर्ण्यते एतावति क्षेत्रे यदि द्रष्टव्यं भवति तर्हि पश्यति यावतातन्न विद्यते अलोकेरूपि द्रव्याणामसम्भवात् रूपिद्रव्यविषयश्चावधि: केवलमयं विशेषो यावदद्यापि परिपूर्णमपि लोकं पश्यति तावदिह स्कन्धानेव पश्यति यदा पुनरलोके प्रतरमव धिरधिरोहति तदा यथा२ भिवृद्धिमासादयति तथा२ लोके सूक्ष्मान् सूक्ष्मतरान् स्कन्धान् पश्यति यावदन्ते परमाणुमपि उक्तंच सामत्थमेत्तमुत्तं दट्ठव्वं जइहवेज्जपेक्के इनउतं तत्थत्थि जउसो रूविनि बंधणोभणिओवड्ढंतोपुणावाहिंलोगच्छं चेवपासइदव्वं सुहुमयरंसुहमपरंपरमोहीजीवपरमाणु परमावधिक लितश्च नियमादन्तर्मुहूर्तमात्रेण केवलालोकलक्ष्मीमालिङ्गति उक्तंच परमोहिन्नाणठिओकेवलमंतो मुहुत्तमेत्तेणं एवं तावत् जघन्यमुत्कृष्टं चावधिक्षेत्र मुक्तं सम्प्रति मध्यमं प्रति पिपादयिषुरेतावत् क्षेत्रोपलम्भे एतावत्कालोपलम्भ: एतावत्कालोपलम्भे वै तावत् क्षेत्रोपलंभइत्यस्यार्थस्य प्रकटनार्थं गाथाचतु ष्टयमाह अङ्गुलेत्यादि अंगुलमिह क्षेत्राधिकारात्प्रमाणांगुलमभिगृह्यते अन्ये त्वाङ्गुरवध्यधिकारादुच्छेधांगुलमिति आवलिका असङ्ख्येय समयात्मिका

सूत्र खेत्तनिद्दिट्ठो २ अंगुलमावलियाणं भागमसंखिज्जदोसु संखिज्जा अंगुलमावलियंतो आवलिया अंगुलपुहुत्तं३

भाषा प्रकारेंछे तेवली माछलो संसारमांहि वलयाकारे न हुइ बाकी सर्व आकारे हुइं अने अवधि ज्ञानतुं देखवो वलीया आकारे पणिहुवे वली विशेष आ गले कहीसि स०जे अग्निकायना जीवते सूक्ष्म अनेबादर सघलाईब० घणां जीव; अग्निना ते अजितनाथने वारे होइ तिहां मनुष्य घणा हुवे तिहां

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



अंगुलं चावलिका चांगुलावलिके तयोरंगुलावलिकयोर्भागमसङ्ख्येयं पश्यत्यवधिज्ञानी इदमुक्तं भवति क्षेत्रतोऽंगुलासंख्येय भागमात्रं पश्यन्कालत आवलिकाया असङ्ख्येयमेव भागमतीतमनागतं च पश्यति उक्तं च खेत्तमसंखेज्जंगुलभागं पासंतमेव कालेणं आवलियाए भागंतीयमाणागयं च जाणाइ आवलिकायाश्चासंख्येयभागं पश्यन् क्षेत्रतोऽंगुलासंख्येय भागं पश्यति एवं सर्वत्रापि क्षेत्रकालयोः परस्परं योजना कर्त्तव्या क्षेत्रकालदर्शनं चोपचारेण द्रष्टव्यं न साक्षात् नखलु क्षेत्रं कालं वा साक्षादवधिज्ञानी पश्यति तयोरमूर्त्तत्वात् रूपि द्रव्यविषयश्चावधिः ततएतदुक्तं भवति क्षेत्रे काले च यानि द्रव्याणि तेषां च द्रव्याणां ये पर्यायास्तान् पश्यतीति उक्तं च तत्थेवयजदव्वा ते सिंवियजहवंति पज्जाया इय खेत्ते कालं मिय जोपज्जा दव्वपज्जाए एवं सर्वत्रापि भावनीयं क्रिया च गाथा चतुष्टये स्वयमेव योजनीया तथा द्वयो रंगुलावलिकयो संख्येयो भागौ पश्यंति अंगुलस्य संख्येयं भागं पश्यन् आवलिकाया अपि सङ्ख्येयमेव भागं पश्यतीत्यर्थं तथा अंगुलं अंगुलमात्रं क्षेत्रं पश्यन् आवलिकांतः किञ्चिदूनामावलिकां पश्यति आवलिकां चेत् कालतः पश्यति तर्हि क्षेत्रतोऽंगुलपृथक् अंगुलपृथक्त्वं अंगुलपृथक्त्वपरिमाणं क्षेत्रं पश्यति उक्तं च संखेज्जंगुलभाग आवलियाए विसुणइतद्भागं अंगुलमिह पेछतो आवलियं तो मुणइकालं आवलियं मुणमाणो सम्पन्नं खेत्तमंगुलपुहुत्तमिति पृथक्त्वं द्विप्रभृतिरानवभ्य इति तथा हस्ते हस्तमात्रे क्षेत्रे श्रायमाने कालतो मुहूर्त्तान्त पश्यन्ति अन्तर्मुहूर्त्तप्रमाणं कालं पश्यतीत्यर्थः तथा कालतो दिवसान्तः किञ्चिदूनं दिवसं पश्यन् क्षेत्रतो गव्यूते गव्यूत विषयो द्रष्टव्यः तथा योजन

हत्थंमिमुहुत्तंतो दिवसंतोगाउ यंमिबोधव्वो जोयणदिवसपुहत्तं पक्खंतोपणवीसाओ ४ भरहंमिअद्धमासो जंबु

**सूत्र भाषा** ऽोम्मपाणि कहूं ते समस्त बहुजीव कहीये नि० ते अग्निकायना जीवानां प्रदेशछे ते एकेक आकाश प्रदेशने विषे असंख्यातर जीवाना प्रदेशव्यापी



For Private and Personal Use Only

रह्याछे ते केतलाकछे तेकहेछे जे समय एकप्रदेश एक आकाश प्रदेशमांहि थी काढतां तो असंख्याती उत्सर्पणी काललागे एतला अग्निकायना जीवाना प्रदेश एकेक आकाशमध्येछे एकेक जीव अग्निनो मूकतां२ एकलोक भराइ तिसा असंख्याता लोकभराइं तेभणी लोकप्रमाणे असंख्याता खंडवा अलो कनादेखे तेमाटे सु०भली परे खे०खेत्र स०सर्वदिशि विदिशिने विषे प०उत्कृष्टो अवधि ज्ञानसु धणी उत्कृष्टो अवधि ज्ञाने करीने उतकृष्टो एतलो खेत्र जाणे देखे तेकेहवो देखे तेभणी हिवे काल थकी अने खेत्रथकी देखवानो विचार कहेछे अं०जे खेत्रथकी आंगुलनो असंख्यातमो भागमात्र जाणेदेखे मा० तेकाल थकी आवलीना असंख्यातमा भावना कालनी आगली पाछली वात भली भुंडी सुभ असुभ ते सर्व कहे१ भा०वली जे खेत्र थकी आं गुलनो सं०संख्यातमो भागमात्र खेत्र जाणे देखे ते काल थकी आवलीकाना संख्यातमा भागना कालनी आगली पाछलीवात कहेछे २ अं० वली जे खेत्र थकी एक अंगुल मात्र खेत्र जाणे देखे मा०ते काल थकी आवलीना काल थकी अंतो० कांइ एकउछेरी आगली पाछली वात कहेछे ३ आ०वली जे खेत्र थकी पृथक आंगुल मात्र खेत्र जाणे देखे आ० तेकाल थकी आवलिकाना संपूर्ण कालना स्वरूपनी सर्व आगली पाछली वात कहेछे ४०वली जे खेत्रदेखे तेमु०काल थको मुहूर्त्त मांहिली २ आगली पाछली वात कहे तथा वली खेत्रथकी पृथक हाथ खेत्रदेखे तेकाल थकी पुरा मुहूर्त्तनी कालनी आगली पाछली वात कहेछे दि०गा०वली खेत्र थकी एकगाउ खेत्र देखे तेकाल थकीदि० एक दिन मांहिलीर वातकहे७ तथावली जेखेत्र थकी पृथकगाउ खेत्रदेखे तेकाल थकीदि० संपूर्ण एक दिननी आगलीपाछली सर्ववात कहेछे वो० सर्वजाणवावोवली जो० जेखेत्रथकी एक योजनमात्र खेत्रदेखेदि० तेकालथको पृथक दिवसनी आगलीपाछली वातकहे प० वली जेखेत्रथकीप० २५ पचीसजोजन खेत्रदेखे प० तेकालथकी पक्ष मांहिलीर आगलीपाछली वातकहे १० दूमवधत.२ भ० वली खेत्रथकी पांचसे जोजन छवीस जोजनछकलानो सर्वभरत खेत्रदेखे तेकालथकी अर्द्धमास पूरापक्षनी

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



योजनमात्रं चेत्रं पश्यन् कालतो दिवसपृथक्त्वं पश्यति दिवसपृथक्त्वमानं कालं पश्यतीत्यर्थः तथा पचान्तः किञ्चिदूनं पचं पश्यन् क्षेत्रतः पञ्चविंशति योजनानि पश्यति भरहमित्यादि भरते सकलभरतप्रमाणो चेत्रावधौ कालतोऽर्द्धम स उक्तः भरतप्रमाणं चेत्रं पश्यन् कालतोऽतीतमनागतं चार्द्धमासं पश्य तीत्यर्थः एवं जंबूद्वीपविषयेऽवधौ साधिको मासः कालतो विषयत्वेन बोद्धव्यः तथा मनुष्यलोके मनुष्यलोकप्रमाणक्षेत्रविषयावधौ वर्षं संवत्सरमतीतमना गतं च पश्यति तथा रुचकाख्यो बाह्यद्वीपप्रमाणक्षेत्रविषयेऽवधौ वर्षं पृथक्त्वं पश्यन्ति तथा संखेज्जेत्यादि सङ्ख्यायत इति संख्येयः स च वर्षमाणोपि भवति ततस्तु शब्दाविशेषणार्थः किं विशिनष्टि संख्येय कालो वर्षसहस्रात्परोवेदितव्यः तस्मिन् संख्येयकाले अवधि गोचरे सति चेत्रत सस्यैवावधेर्गोचर तथा द्वीपाश्च समुद्रास्ते अपि संख्येया भवति अपि शब्दान्महानेकोपि महतएकदेशोपि किमुक्तं भवति संख्येयकाले अवधिना परिछिद्यमाने चेत्रमप्यत प्रज्ञापकापेक्षया संख्येय द्वीपसमुद्रपरिमाणं परिच्छेद्यं भवति ततो यदिनामात्तस्यावधिरुत्पद्यते तर्हि जंबूद्वीपादारभ्य सङ्ख्याद्वीपसमुद्रास्तस्य परि च्छेद्या अथवा बाह्ये द्वीपे समुद्रे वा सङ्ख्येय योजना विस्तृते कस्यापि तिरश्च संख्येयकालविषयोवधिरुत्पद्यते तदा स यथोक्तचेत्रपरिमाणं तमेकेक द्वीपं समुद्रं वा पश्यति यदि पुनरसङ्ख्येय योजनविस्तृते स्वयंभूरमणादिके द्वीपि समुद्रे वा सङ्ख्येयकालविषयोवधिः कस्याप्युत्पद्यते तदानींसप्रागुक्तपरिमाणं



## द्दीवंमिसाहिओमासो वासंचमणुयलोए वासपुहत्तंचरुयगंमि ५ संखिज्जमिउकाले दीवसमुद्दाविहुंति संखि



मासकहे ११ जं० वली जेचेत्रथकी प्रमाण अंगुल लाखजो जननोसर्व जंबूद्वीपनो खेत्रआवे देखे तेकालथकी सा० भाझेरा एक मासनो आगली पाछली सर्ववात कहेछे १२ वा० वली जेचेत्रथकी ४५ लाख जोजननो सर्वमनुष्य चेत्रदेखेतेवे समुद्र अढीद्वीप सर्वदेखे तेकालथकी वा० वरस एकनी सर्ववात

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



तस्यद्वीपस्यसमुद्रस्यवा एकदेशंपश्यति यूक्तमनुष्यस्यावधिरिवकश्चित् तथाकालेऽसङ्ख्येयपल्योपमादिलक्षणेऽवधिविषयेसतितस्यैवसङ्ख्येयकालपरिच्छेदकस्या वधे:क्षेत्रतयापरिच्छेद्याद्वीपसमुद्राभाज्याविकल्पनीया भवन्तिकस्यचित्सङ्ख्येयाकस्यचित् सङ्ख्येयाकस्यचिदेकदेश इत्यर्थ:यदाङ्गमनुष्यस्यासङ्ख्येयकालविषयोव धिरुत्पद्यते तदानामसङ्ख्येया द्वीपसमुद्रास्तस्य विषय: यदा पुनर्बहिर्द्वीपे समुद्रे वा वर्त्तमानस्यकस्यचित्तिरश्चोऽसङ्ख्येय कालविषयोवधिरुत्पद्यते तर्हि तस्य सङ्ख्येया द्वीपसमुद्रा: अथवा यस्य मनुष्यस्यासङ्ख्येय कालविषयो आयते तदानीं तस्य स्वयं भूरमणद्वीपस्य समुद्रस्य एकादशो विषय: स्वयं भूरमणविषयम नुष्यबाह्यावधे र्वा तदेकदेशो विषय: क्षेत्रपरिमाणं पुन र्ये जिनापेक्षया सर्वत्रापि जंबूद्वीपादारभ्यासङ्ख्येय द्वीपसमुद्रपरिमाणमवसेयंतदेवं यथाक्षेत्र

सूत्र

ज्जाकालंमि असंखिज्जे दीवसमुद्दायभइयव्वा ६ काले चउएहवुड्ढी कालोभइयव्वुखित्तवुड्ढीए वुड्ढीए दव्वप

भाषा

कहे१३ वा० वली जेक्षेत्रथकी रुचकद्वीपलगे क्षेत्रजाणे देखे तेकालथकी वा० पृथक्त्वरसनी आगली पाछली वातकहे १४ ५ टी० तेहक्षेत्रथकी सं० संख्याताद्वीप संख्याता समुद्रदेखे १५ तथासंख्याताद्वीप देखेते संख्याता कालनी वातजाणेकहेटी० एकसमुद्र संख्याता योजननुदेखेतथाद्वीप मध्येउपनुतदा संख्याता समुद्र संख्यातायोजनलगे देखवोकह्यो तेजिहां अवधिग्यानछे तिहांअवधिदर्सननिश्चयछे अनेअवधिदर्सनहुवे तिहांअवधिग्याननी भजनाछेतेमाटे अवधि ग्यानसाथे अवधिदर्शन लेवोटी० वली जेक्षेत्रथकी असंख्यातासंख्याता द्वीपसमुद्रांलगेदेखे तेहहां संख्याताद्वीपसमुद्रदेखेतेहना जोजन असंख्याता जहुवे तेभणीभ० भजनाकहीछे तेकालथकीपणि असंख्याताकालनी आगलीपाछलीवातकहेछे पणिधर्म्मास्तिकायादिक१० बोलकेवलज्ञानविनाजाणेनही का० एककालनी रुद्धिकहतीथकी द्रव्य१ क्षेत्र२ काल३ पर्याय४ एहच० च्यारेईवस्तच्यारांद्रव्यांनीवु० रुद्धियाइ तथावलीजे खेत्रनीरुद्धिहुवे तिवारेका०का

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



वृद्धौ कालवृद्धिः कालवृद्धौ च यथा क्षेत्रवृद्धिस्तथा प्रतिपादितं सम्प्रतिद्रव्यक्षेत्रकालभावानां मध्ये यद्वृद्धौ यस्य वृद्धिरुपजायते यस्य च न तदभिधित्सु राह काले इत्यादि कालावधिगोचरे वर्द्धमाने वर्द्धमानेव तुष्यं द्रव्यक्षेत्र कालभावानां वृद्धिर्भवति तथा क्षेत्रस्य वृद्धिः क्षेत्रवृद्धिस्तस्यां सत्यां कालोभजनीयो विकल्पनीयः कदाचिद्वर्द्धते कदाचिन्नक्षेत्रं ह्यत्यन्तं सूक्ष्मं कालस्तु तदपेक्षया परिस्थूरस्ततो यदि प्रभूता क्षेत्र वृद्धिस्ततो वर्द्धते शेषकालंनेति द्रव्य पर्यायो तु नियमतो वर्द्धते आह च भाष्यकृतकाले पवट्टमाणे सव्वे दव्वादओपवट्टंति खेत्ते काले भइयो वट्टंति उदव्वपज्जाया १ तथा द्रव्यं च पर्यायश्च द्रव्य पर्यायौ तयोर्वृद्धौ सत्यां सूत्रे विभक्तिलोपः प्राकृत शैल्याभजनीयावेव क्षेत्रे कालौ तु शब्दएव कारार्थः सचभिन्नक्रमस्तथैव योजितः विकल्पश्चायं कदाचित्तय.वृद्धिर्भवति कदाचिन्न यतो द्रव्यं क्षेत्रादपि सूक्ष्मं एकस्मिन्नपि नभःप्रदेशेऽनन्तस्कंधावगाहनात् द्रव्यादपि सूक्ष्मपर्यायः एकस्मिन्नपि द्रव्येनन्तपर्याय

सूत्र

## ज्जव भइयव्वा खेत्तकालाओ ७ सुहुमोयहोइ कालो तत्तो सुहमयरयं हवइ खित्तं अंगुलसेढीमित्ते उसप्पिणिओ

भाषा

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



गुणा हीणा बीजे चोथे भागे असंख्यातगुणाहीणा त्रीजे चोथे भागे अनंत गुणा हीणा कहिवा वली जिहां२ दस२ सिद्धा तिहां२ जे एकेक सीद्धा ते
घणां १ ते थकी बेबे सीद्धा ते संख्यातगुणाहीणा २ ते थकी तिन२ सिद्धा ते संख्यातगुणा३ तेथकी च्यार२ सिद्धाते असंख्या० ४ ते थकी पांच२ सिद्धा
ते असंख्यात०५ ते थकी छ ६ सिद्धा ते अनंतगुणा ६ जावत् दस२ सिद्धां२ सिधा ते अनंतगुणाहीणा तथा ऊर्ध्वलोके ४ सी० ते एक२ सिद्धा ते रुर्ध थी
घणा ते थकी बेबे सीद्धा ते असंख्यातगुणा ते थकी तीन२ सिद्धा ते अनंतगुणाहीणा तेथकी च्यार२ सिद्धा ते अनन्तगुणाहीणा हूहां संख्यात गुण
हानीं नकही समुद्रमे २सी० तेमध्ये एकेक २ सिद्धा तेघणाते थकी बेबेसिद्धा तेअनन्तगुणाहीणा वली जिहां२ जवमध्यना १०८ सि० तिहां२ हूम करि
वो जेएकेक२ सिद्धा तेघणा तेथकीबे बेसिद्धा तेसंख्यात गुणाहीणा तेथकी तीन२ सिद्धा तेसंख्यातगुणाहीणा तेथकी च्यारि२ सिद्धा ते असंख्यातगुणा
तेथकी पांच पांच सिद्धा तेअनन्तगुणाहीणा तेथकी छ ६ सिद्धा तेअनन्तगुणा ते थकी सात२ सि० ते अनन्तगुणा तेथकी आठ२ सि० तेअनन्तगुणा
हीणा तेथकी नव२ सि२ ते अनन्तगुणाहीणा तेथकी दस२ सि० ते अनन्तगुणाहीणा एहसि० जेमुक्तिपक्षंता तेहनो स्वरूपकहियो विस्तारवली
सि० तेसेगिमा थकी जाणवो एअधिकारसमाप्त: १ प० पनराभेदे प० दृष्यातं० ते जिम छे तिम कहे छे ति० एणे करीने ते भणी तीर्थंकहीये ते
द्रव्य १ भाव २ भेदे ते हूहां नदियादिकनो आव्हो ते द्रव्य तीर्थ अथवा जे यात्रा मा करवाना तीर्थ ते सर्वद्रव्य अथवा पंच भूतिक आदिनो शासन ते
सर्वद्रव्यतीर्थपणें करी संसारन तीराइं अने सावद्य कर्त्तव्य तीर्थकरी तीरवो नथी १ जे भाव तीर्थ ते चतुर्विध संघज ज्ञानादिके करी सहित अज्ञान न
थी ते माटे जे भव थकी तारे ते भाव तीर्थ अथवा क्रोधाग्निदाहनो उपसमाडिवुं १ लोभ ते तृषानो टालनो २ कर्ममलनुं फेडवो ३ ए तिणने विषे
रहिवो अथवा ज्ञान दर्शनचारित्र ३ ए विषे रहे तिणगें भावतीर्थ कहीये ते तीर्थछता जे सी० तीर्थ प्रवर्त्यापछे सी० कहीये ते आदिनाथ नो प्रथम

पिरूपैर्नवभिरनुयोगद्वारैः क्षेत्रादिषु पञ्चदशसु द्वारेषु सिद्धप्राभृते चिन्तितास्तत्तदनुसारेण वयमपि विनेयजनानुग्रहार्थं लेशतश्चिन्तयामः क्षेत्रादीनि च पञ्चदशद्वाराण्यमूनि खेत्ते काले गइवेय तित्थलिंगे चरित्तबुद्धे य नाणोगाहुक्कस्से अंतरमणुसमयगणण अप्पबहू१ तथा प्रथमतएषु द्वारेषु सत्पदप्ररूपणया मन्तरसिद्धाश्चिन्त्यन्ते क्षेत्रद्वारे त्रिविधेपि लोके सिद्धाः प्राप्यन्ते तद्यथा ऊर्ध्वलोके अधोलोके तिर्यग्लोके च तत्रोर्ध्वलोके पण्डकवनादौ अधोलोके अधो लौकिकेषु तिर्यग्लोकेमनुष्यक्षेत्रे तत्रापि निर्व्याघातेन पञ्चदशसु कर्मभूमिषु व्याघातेन समुद्रनदीवर्षधरपर्वतादावपि व्याघातो नाम संहरणं उक्तं च दीपसमु द्दे सुड्डाई एसु वाघायखेत्तओ सिद्धा निव्वाघाएणपुणोपन्नरससुकम्मभूमीसु१ तीर्थकृतः पुनरधोलोके तिर्यग्लोके वा तत्राधोलोके अधोलौकिकेषु ग्रामेषु तिर्यक्लोके पञ्चदशसु कर्मभूमिषु न शेषेषु हि स्थानेषु संहरणतः सम्भवति नचभगवतां संहरणसम्भवः स तथा काले कालद्वारे अवसर्पिण्यां जन्मचरमशरीरिणां नियमतस्तृतीयचतुर्थारकयोः सिद्धिगमनं तु केषाञ्चित्पञ्चमेप्यरके यथा जंबूस्वामिनः उत्सर्पिण्यां जन्मचरमशरीरिणां दुःषमा दिषु द्वितीयतृतीयचतुर्थारकेषु सिद्धिगमनं तु तृतीयचतुर्थकयोरेव उक्तं चदोसुविसमासु जायासिज्झंतोसप्पिणीएकालतिगेतीसुयजायाओसप्पिणीएसिज्झं तिकालदुगे१ महाविदेहेषु पुनः कालः सर्वदैवसुषमदुःषमाप्रतिरूपस्ततस्तद्वक्तव्यता भणनेनैव तत्र वक्तव्यताभणिता द्रष्टव्या संहरणमधिकृत्य पुनरुत्सर्पिण्या मवसर्पिण्यां च षट्स्वप्यरकेषु सिध्यन्तो द्रष्टव्याः तीर्थकृतां पुनरवसर्पिण्यामुत्सर्पिण्यां च जन्मसिद्धिगमनं च सुषमदुःषमादुःषमसुषमारूपयोरेवारकयोर्वे दितव्यं न शेषेष्वरकेषु तथा हि भगवान् ऋषभस्वामीसुषमदुःषमारकपर्यन्ते समुत्पेदे एकोननवतिपक्षेषु शेषेषु सिद्धिमगमत् वर्द्धमानस्वामीतु भगवान् दुष्ष मसुषमारकपर्यन्तेषु एकोननवतिपक्षेषु शेषेषु मुक्तिसौधमध्यास्त तथाचोक्तं समणे भगवं महावीरेतीसंवासाइं अगारवासमज्झे वसित्ता साइरेगाइं दुवालस संवच्छराइं छउमत्थपरियागं पाउणित्ता बायालीसंवासाइं सामन्नपरियागं पाउणित्ताबावत्तरिं वासाणि सव्वाउयं पालइत्ता खीणेवेयणिज्जे आउयना



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



सणीए दूसमसुसमाए बहुविइक्कंताए तिहिं वासेहिं अद्धनवमेहि य मासेहिं सेसेहिं पावाए मज्झिमाए जाव सव्वदुक्खप्पहीणे उत्सर्पिण्यामपि च प्रथमतीर्थकरो दुःषमसुषमायामेकोननवतिपक्षेषु व्यतिक्रान्तेषु जायते यतो भगवद्वर्द्धमानस्वामिसिद्धिगमनस्य भविष्यत्पद्मनाभतीर्थकरोत्पादस्य चान्तरं चतुरशीति वर्षसहस्राणि सप्तवर्षाणि पञ्चमासाः प्रज्ञप्ताः तथा चोक्तं चुलसीइ वाससहस्सा वासा सत्तेव पञ्चमासा य वीरमहापउमाणं अंतरमेयं जिणुद्दिट्ठं ॥ १ ॥ तत उत्सर्पिण्यामपि प्रथमतीर्थकरो यथोक्तकालमान एव जायते तथा उत्सर्पिण्यां चतुर्विंशतितमतीर्थकरः सुषमदुःषमायामेकोननवतिपक्षेषु व्यतिक्रान्तेषु जन्मासादयति एकोननवतिपक्षाधिकचतुरशीति पूर्वलक्षातिक्रमे च सिध्यति ततः उत्सर्पिण्यामवसर्पिण्यां वा दुःषमसुषमासुषमदुःषमयोरेव तीर्थकृतां जन्मनिर्वाणे चेति गतिद्वारे प्रत्युत्पन्ननयमधिकृत्य मनुष्यगतावेव सिध्यन्तः प्राप्यन्ते न शेषासु गतिषु प्राच्यात्यमनन्तरं भवमधिकृत्य पुनः सामान्यतश्चतसृभ्योऽपि गतिभ्य आगताः सिध्यन्ति विशेषचिन्तायां पुनश्चतसृभ्यो नरकपृथिवीभ्यो न शेषाभ्यः तिर्यग्गतेः पृथिवीबादरवनस्पतिपञ्चेन्द्रियेभ्यो न शेषेभ्यः मनुष्यगतेः स्त्रीभ्यः पुरुषेभ्यो वा देवगतेश्चतुर्भ्यो देवनिकायेभ्य तथा चाह भगवानार्यश्यामः नेरइयाणं भंते अणंतरागया अंतकिरियं करेंति परंपरागया अंतकिरियं करेंति गोयमा अणंतरागयावि अंतकिरियं करेंति परंपरागयावि अंतकिरियं करेंति एवं रयणप्पभापुढविनेरइयावि जाव पंकप्पभापुढविनेरइयाणं पुच्छा गोयमा नो अणंतरागया अंतकिरियं करेंति परंपरागयावि अंतकिरियं करेंति एवं जाव अहेसत्तमपुढविनेरइया असुरकुमारा जाव थणियकुमारा पुढविआउवणस्सइकाइयावि अंतकिरियं करेंति परंपरागयावि अंतकिरियं करेंति तेउवाउबेइंदियतेइंदियचउरिंदिया नो अणंतरागया अंतकिरियं करेंति परंपरागया अंतकिरियं करेंति सेसा अणंतरागयावि अंतकिरियं करेंति परंपरागयावि तीर्थस्ततः पुनर्देवगतेर्नरकगतेर्वाऽनन्तरागता सिध्यन्ति न शेषगतेः तत्रापि नरकगतेस्तिसृभ्यो नरकपृथिवीभ्यो न शेषाभ्यो देवगतेर्वैमानिकदेवनिकायेभ्यो न शेषनिकायेभ्यः तथा च भगवानार्यश्याम आह रयणप्पभापुढविनेरइयाणं भंते रयणप्पभा पुढविनेरइ

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



एहिंतो अणंतरं उव्वट्टित्ता तित्थयरत्तं लभेज्जा गोयमा अत्थे गईए लभेज्जा अत्थे गईए नो लभेज्जा सेकेणट्ठे णं भंते एवं वुच्चइ अत्थेगईए लभेज्जा अत्थे गई
एनो लभेज्जा गोयमा जस्सरयणप्पभापुढविनेरइयस्स तित्थयरनाम गोत्ताई कम्माइं निबद्धाइं पुट्ठाइं कडाइं निवट्ठाइं अभिनिव्वट्ठाइं अभिसमन्नागयाइं
उयन्नाइं नोउवसंताइं भवंति सेणं रयणप्पभा पुढविनेरइए रयणप्पभापुढविनेरइए हिंतो उव्वट्टित्ता तित्थयरत्तं लभेज्जा जस्सणं रयणप्पभापुढविने
रइयस्स तित्थयरनामगोत्ताइं कम्माइं नो बद्धाइं जावनो उवसंताइं भवंति सेणं रयणप्पभा पुढविनेरइए रयणप्पभापुढविनेरइएहिंतो उव्वट्टित्ता तित्थयर
त्तं नो लभेज्जा सेए एणं गोयमा एवं वुच्चइ अत्थे गई एलभेज्जा अत्थे गई एनो लभेज्जा एवं जाव वालुयप्पभापुढविने रईए हिंतो तित्थयरत्तं लभेज्जा
पंकप्पभाने रईयाणं भंते पंकप्पभापुढविने रईएहिंतो अणंतरं उव्वट्टित्ता तित्थयरत्तं लभेज्जा गोयमाणोइणट्ठे समट्ठे अंतकिरियं पुणकरेज्जा धूमप्पभा
पुढविनेरइएणं पुच्छा गोयमा णोइणट्ठे समट्ठे विरइं पुणलभेज्जा तमा पुढविपुच्छा गोयमा नोइणट्ठे समट्ठे विरया विरइं लभेज्जा अहे सत्तमा ए
पुच्छा गोयमानो इणट्ठे समट्ठे समत्तं पुणलभेज्जा असुरकुमाराणं पुच्छा गोयमा नोइणट्ठे समट्ठे अंतकिरियं पुण करेज्जा एवं निरंतरं जाव
आउक्काइया ते उक्काइएणं भंते ते उक्काइ ए हिंतो अणंतरं उव्वट्टित्ता तित्थयरत्तं लभेज्जा गोयमा नोइणट्ठे समट्ठे केवलि पन्नत्तं धम्मं लभेज्जा सव
णयाए एवं वा उक्काइ एविवणप्फइकाइएणं पुच्छा गोयमा णोइणट्ठे समट्ठे अंतकिरियं पुणकरेज्जा बे इंदियते इंदियचउरिंदियाणं पुच्छा गोयमाणोइणट्ठे
समट्ठे मणपज्जवनाणं पुणउप्पाडेज्जा पंचिंदियति रिक्खजोणियमणूसवाणमंतरजोइसिए सुपुच्छा गोयमः नोइणट्ठे समट्ठे अंतकिरियं पुणकरेज्जा सो
हम्मगदेवेणं भंते अणंतरं चइत्ता तित्थयरत्तं लभेज्जा गोयमा अत्थे गइएलभेज्जा अत्थे गइए नो लभेज्जा एवं जहारयणप्पभा पुढविनेरइयस्स एवं जाव
सव्वट्ठगदेवा वेदद्वारे प्रत्यु त्पन्ननयमधिकृत्या पगत वेदएवसिद्ध्यति तद्भवानु भूत पूर्ववेदापेक्षया तु सर्वेष्वपि वेदेषु उक्तं च अवगयवे उसिज्झइ पच्चुप्पन्नं

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



नयंपडुच्चाउ सव्वेहिंविवेएहिंसिज्झइ सम्मईयनयवाया १ तीर्थक्षत: पुन: स्त्रीवेदे पुरुष वेदेवा न नपुंसक वेदे तथा तिर्थद्वारे तिर्थकरतीर्थे तीर्थकारीतीर्थे च अतीर्थे च सिध्यन्ति लिङ्गद्वारे अन्यलिङ्गे गृहलिङ्गे स्वलिङ्गे वा एतच्च सर्वंद्रव्यलिंगापेक्षया द्रष्टव्यं संयमरूपभावलिङ्गापेक्षयातु स्वलिङ्गएव उक्तंच लिङ्गेय अन्नलिङ्गे गिहत्थलिङ्गे तहेवयसलिंगे सव्वेहिं दव्वलिंगे भावेण सलिंगसंजमउ १ चारित्रद्वारे प्रत्युत्पन्ननयापेक्षया यथाख्यात चारित्रे तद्भवानुभूतपूर्वचरणापेक्षया तु केचित्सामायिक सूक्ष्मसंपराय यथाख्यात चारित्रिण: केचित् सामायिक च्छेदोपस्थापनसूक्ष्मसंपराय यथाख्यातचारित्रि ण: केचित् सामायिक परिहारविशुद्धिक सूक्ष्मसंपराय यथाख्यात चारित्रिण: केचित्सामायिकच्छेदोपस्थापनपरिहारविशुद्धिक सूक्ष्मसंपराय यथाख्या तचारित्रिण: उक्तं च चरणंमिय चउक्काए पञ्चपन्ने चसिज्झइनएणं सव्वाणंतरचरणेति चउक्कगपंचगगमेणं १ तीर्थकृत: पुन: सामायिकसूक्ष्मसंपराय यथा ख्यात चारित्रिणएव बुद्धद्वारे प्रत्येकबुद्धा: स्वयं बुद्धाबुद्ध बोधिता वा सिद्ध्यन्ति ज्ञान द्वारे प्रत्युत्पन्ननयमपेक्ष्य केवलज्ञाने तद्भवानुभूतपूर्वा ज्ञानापेक्षयातुकेचिन्मतिश्रुतज्ञानिन: केचिन्मतिश्रुतावधिज्ञानिन: केचिन्मतिश्रुतमन: पर्यायज्ञानिन: केचिन्मतिश्रुतावधिमन: पर्यायज्ञानिनस्तीर्थ कृतस्तुमतिश्रुतावधिमन: पर्यायज्ञानिन एवअवगाहना द्वारे जघन्यायामपि अवगाहनायां सिद्ध्यन्ति उत्कृष्टायां मध्यमायां च तत्र द्विहस्तप्रमाणजघन्यापंच विंशत्यधिकपंचधनु: शतप्रमाणा उत्कृष्टा सा च मरुदेवी कालवर्त्ति नामवसेया मरुदेव्याघ्यादेशांतरेण नाभिकुलकरतुल्या तदुक्तं सिद्धप्राभृतटीकायां मरुविदेवी आएसंतरेण नाभितुल्लत्ति तत: आदेशांतरापेक्षया मरुदेव्यामपि यथोक्तप्रमाणावगाहना द्रष्टव्या: उक्तं च उगाहणाजह न्नारयणिदुगं अहपुणाउ उक्कोसा पंचेवधणुसयाइं धणुहपुहुत्तेण अहियाइ १ अत्र पृथक् शब्दो बहुत्ववाची बहुत्वं चेह पंचविंशतिरूपं द्रष्टव्यं सिद्ध प्राभृतटीकायां तथा व्याख्यानात् तेन पंचविंशत्यधिकानामवसेयं शेषात्वजघन्योत्कृष्टाऽवगाहना तीर्थकृतां तु जघन्यावगाहना सप्तहस्तप्रमाणा उत्

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



कृष्टी पंचधनु: शतमाना शेषात्वजघन्योत्कृष्टा उत्कृष्ट द्वारे सम्यक् त्वपरिभ्रष्टा उत्कर्षत: कियता कालेन सिध्यन्ति उच्यते देशोना पार्द्धपुद्गलपरावर्तसंसा रातिक्रमे अनुत्कर्षतस्तु केचित्संख्येयकालातिक्रमे केचिदसंख्येयकालातिक्रमे किञ्चिदनन्तेन कालेन अनंतर द्वारे जघन्यत एक समयो अंतरं उत्कर्षत: षण्मासा: निरंतरद्वारे जघन्यतो द्वौ समयो निरंतरं सिध्यन्त: प्राप्यन्ते उत्कर्षतोऽष्टौ समयान् गणनाद्वारे जघन्य एकस्मिन् समये एक: सिध्यति उत्कर्ष तोऽष्टाधिकं शतं तथा चास्मिन् भरतक्षेत्रेऽस्यामवसर्पिण्यां भगवत: श्रीनाभेयस्य निर्वाणसमये श्रूयतेऽष्टोत्तरं शतमेकसमयेन सिद्धंत तथाचोक्तं संघदा सगणिना वसुदेव चरिते भयवंच उसभसामी जय गुरु पुव्वसयसहस्सं वाससहस्सूणियं विहरिऊणं केवली अट्ठावयपव्वए सहदसहिसमणसहस्सेहिं परि निव्वाणसुवगओ चोद्दसमेणं भत्तेणं माघवहुले पक्खे तेरसीए अभीइणा नक्खत्तेणं एगूण सत्तसएणं अट्ठहियन त्त एहिं सहएगसमएणं निव्वुओ से साणविअणगाराणं दससहस्साणि अट्ठसयऊणगाणि सिद्धाणि तंमिचे वरिक्खे समयंतरे सुबहु सुदृति अल्पबहुत्व द्वारे युगपत् द्वित्यादिका: सिद्धा: स्तोका: एकका: सिद्धा: संखेज्जगुणा: उक्तं च संखाए जहन्नेणं एक्को उक्को सएणा अट्ठसयं सिद्धाणे गाथोवा एगग सिद्धाउसंखगुणा: तदेवं कृता पंच दशास्वपि द्वारेषु सत्पदप्ररूपणा सम्प्रति द्रव्यप्रमाणमभिधीयते तत्र क्षेत्रद्वारे ऊर्द्ध लोके युगपदेकसमयेनचत्वार: सिद्धंति द्वौ समुद्रे चत्वार: सामान्यतो जलमध्ये तिर्यग्लोके अष्टशतं विंशति पृथक् त्वमधो लोके उक्तंच चत्तारिउड्ढलोए जले चउक्कं दुवेसमुद्दंमि अट्ठसयंतिरीलोए वीसपहुत्तं अहोलोए १ तथा नंदनवने चत्वार: नंदने चत्वारीति वचनात् एक स्मिंस्तु विजये विंशति: उक्तंच सिद्ध प्राभृत टीकायां वीसाएगयरे विजये तथा सर्वास्वप्यकर्मभूमिषु प्रत्येकं संहरणातादश दश पंडक वने द्वौ पंच दशस्वपि कर्मभूमिषु प्रत्येकमष्टशतं उक्तंच संकामणा एदसगन्दोचेवहवन्ति पंडगवणंमि समए पायअट्ठसयं पणरससुकम्मभूमीसु १ कालद्वारे उत्सर्पिण्यामवसर्पिण्यां च प्रत्येकं तृतीये चतुर्थके चारके अष्टशतं अवसर्पिण्यां पंचमारके विंशति: शेषेष्वरकेषु प्रत्येकमुत्स

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



पिंथ्यांच संहरणतो दशदश तथाचोक्तं सिद्धप्राभृतटीकायां सेसेसु अरएसु दससिज्झंति दोसुविउस्सप्पिणीसु संहरणतो सिद्धप्राभृतसूत्रे प्युक्तं उसप्पि
णिउस्सप्पिणिदवट्टयचउत्थयसमासुअट्ठसयं पंचमियाएवीसंदसगं दसगं च सेसेसु १ गतिद्वारे देवते रागतानामष्टशतं शेषगतिभ्यः आगताः प्रत्येकं दशदश
उक्तं च सिद्धप्राभृते सेसाणगईएदसदसगं भगवांख्यायेष्याम: पुनरेवमाह नरकगते रागता दश तत्रापि विशेषचिन्तायां रत्नप्रभापृथिव्याः शर्करापभाया
वालुकप्रभायाश्च पृथिव्या आगताः प्रत्येकं दशदशपंकप्रभायाः पृथिव्या आगताश्चत्वारः तथा तिर्यग्गतेरागताः सामान्यतो दशविशेष चिन्तायां पुनः पृथि
वीकायेभ्योऽप्कायेभ्यश्चागताः प्रत्येकं चत्वारो वनस्पति कायेभ्य आगताः षट्पंचेन्द्रियतिर्यक् योनि पुरुषेभ्य आगता दशपञ्चेन्द्रियतिर्यग्योनिस्त्री
भ्योप्यागता दश तथा सामान्यतो मनुष्यगते रागता विंशतिं विशेषचिंतायां मनुष्य पुरुषेभ्य आगता दशमनुष्यस्त्रीभ्य आगता विंशतिः तथा सामान्य
तो देवगते रागता अष्टशतं विशेष चिन्तायां असुरकुमारेभ्यो यावत्स्तनितकुमारेभ्यः प्रत्येकमागताः दशदशअसुरकुमारीभ्यः प्रत्येकमागता पंचपंचव्यन्तर
देवेभ्य आगताः दशव्यंतरीभ्यः आगताः पञ्चज्योतिष्कदेवेभ्य आगता दस ज्योतिष्कदेवीभ्य आगताविंशतिर्वैमानिक देवेभ्य आगता अष्टशतं वैमानिक
देवीभ्य आगता विंशति तथाच प्रज्ञापनाग्रन्थः अणन्तरागयाणंभंते नेरइयाएगसमयेणं केवइया अंतकिरियंपकरेन्ति गोयमाजहन्नेणं एक्कोवादोवाति
न्निवाउक्कोसेणं दसरयण प्पभापुढविनेरइया एवं चेव जाववालुयप्पभा पुढविनेरइया अणंतरागयाणंभंते पङ्कप्पभापुढविनेरइया एग समयेणं केवइया
अंतकिरियं प करेन्ति गोयमा जहन्नेणं एक्कोवादोवातिन्निवा उक्कोसेणं चत्तारि अणंतरागयाणं भंते असुर कुमारा एग सम एणं केवइया अंतकिरि
यं प करेंति गोयमा जन्नेणं एक्कोवादोवातिन्निवा उक्कोसेणं दस अणंतरागयाणंभन्ते असुर कुमारी उएगसमएणं केवइयाउ अंतकिरियंपकरेन्ति गोयमा
जहन्नेणं एक्कोवादो वातिन्निवा उक्कोसेणं पंच एवं जहा असुरकुमारासदेवीया जहा जावथणिय कुमारासदेवीया अणंतरागयाणं

भंते पुढविकाइया एग समएणं केवइया अंतकिरियं पकरें तिगोयमा जहन्नेणं इक्कोवादोवा तिन्निवाउक्कोसेणं चत्तारिएवं आउकाइयाविवणप्फइकाइयाक पंचेन्द्रियतिरिक्ख जोणियाइसमपंचेन्द्रियतिरिक्ख जोणीउवि दसमणुसा दसमणुस्सीउवीसंवाणमंतरा दसवाण मंतरी उपचजोइसिया दसजोइसिणी उवीसंवेमाणिया अट्ठ सयं वेमाणिणीउ वीसमिति तत्वंपुन केवलि नो बहुश्रुतावाविदंति वेदहारे पुरुषाणामष्टशतं स्त्रीणां विंशतिर्दशन पुंसका उक्तंच अट्ठसयं पुरिसाणं वीसइत्थीणदसन पुंसाणं तथा इह पुरुषेभ्य उद्धृताजीवाः केचित्पुरुषाएव जायंते केचित् स्त्रियः केचिन्नपुंसकाः एवं स्त्री भ्योद्धृतानां भंगत्रयं एवमंपुंसकेभ्योपि सर्व्वसंख्यया भंगानव तत्रये पुरुषेभ्य उद्धृताः पुरुषा एवजायन्ते तेषामष्टशतं शेषेषु चाष्टस भंगेषु दशदश तथा चोक्तं सिद्धप्राभृते सेसाउ अट्ठ भंगादसगं दसगं तुहोइ एक्केकं तीर्थद्वारे तीर्थंकतोयुगपदेक समयेन उत्कर्षतश्चत्वारः सिध्यन्ति दशप्रत्येक बुद्धाश्चत्वारः स्वयं बुद्धा अष्टशतमतीर्थंकृतां विंशति स्त्रीणां द्वे तीर्थंकर्यौ लिंगद्वारे गृहलिंगे चत्वारः अन्यलिंगे दशस्वलिंगे अष्टशतं उक्तंच चउरोदस अट्ठसयं गिहन्न लिंगे सलिंगेय चारित्रद्वारे सामायिक सूक्ष्म संपराय यथाख्यात चारित्रिणां सामायिक छेदोपस्थापन सूक्ष्मसंपराय यथाख्यात चारि त्रिणाञ्च प्रत्येकमष्टशतं सामायिक परिहार विशुद्धिक सूक्ष्म संपराय यथाख्यात चारित्रिणां सामायिक छेदोपस्थापन परिहार विशुद्धिक सूक्ष्म संपराय यथाख्यात चारित्रिणां दशकं दशकं उक्तंच पच्छाकडं चरित्तं तिगंचउक्कंच तेसिमट्ठसयं परिहारिएहिंसहिए दसगं दसगं च पंचगडे बुद्ध द्वारे प्रत्येक बुद्धानां दसकं बुद्धबोधितानां पुरुषाणामष्टशतं बुद्ध बोधितानां स्त्रीणां विंशतिः नपुंसकानां दशकं बुद्धीभिर्बोधितानां स्त्रीणां विंशतिः बुद्धीभिर्बोधितानामेव सामान्यतः पुरुषादीनां विंशति पृथक् त्वं उक्तंच सिद्ध प्राभृत टीकायां बुद्धीहि चेवबोहियाणं पुरिसाईणं सामन्नेणवीस पुहुत्तं सिज्झंन्ति बुद्धीच मल्लिस्वामिनी प्रभृतिका तीर्थंकरी सामान्य साध्यादिका वा वेदितव्याः यत सिद्ध प्राभृत टीकाया मेवोक्तं बुद्धिउविसत्ती पनुपाउ

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



अस्मात् स सामन्तसाङ्गणीपसुद्धाव सांचिन्ति ज्ञानद्वारे पूर्वं भावमपेक्ष्य मति श्रुति ज्ञानिनो युगपदेक समये नोत्कर्षं तश्चत्वार: सिद्ध्यन्ति मति श्रुत मन: पर्याय: ज्ञानिनां वा अष्टशतं अवगाहना द्वारे जघन्यायामवगाहनायां युगपदेक समये नोत्कर्षतश्चत्वार सिद्ध्यन्ति उत्कृष्टायां द्वौजघन्योत्कृष्टायामष्ट शतं यवमध्ये अष्टौ उक्तञ्च उक्कोसगाहणाए दोसिज्झंतीति एगसमएणं चत्तारिजहन्नाए अट्ठसयं मज्झिमाए अत्र टीका कारेण व्याख्या कृता गाथा पर्यन्त वर्तिनस्तु यद्दास्याधिकार्थ संसूचनात् जिवमज्झे अट्ठ इति उत्कृष्टद्वारे येषां सम्यक्त्वपरिभ्रष्टानामनन्त: कालोगमत् तेषामष्टशतं संख्यातकालपतितानामसंख्यात कालपतितानांच दशकं दशकं अप्रतिपतित सम्यक्त्वानां चतुष्टयं उक्तञ्च जेसिं अणंतकालोपडिवा उते सिज्झेइ अट्ठ सयं अप्पडिवडिए चउरोदसगं दसगंसेसाणं १ अन्तरद्वारे एकोवासांतर: सिद्ध्यति बहवो वा तत्र बहवो यावदष्टशतं अनुसमयद्वारे प्रति समयमेको वा सिद्ध्यति च बहवोवा तत्रबहूनां सिद्धतामियं प्ररूपणा: एकादयोद्वात्रिंशत्पर्यंतानिरन्तरमुत्कर्षतोऽष्टौ समयान् यावत्प्राप्यन्ते दूयमत्र भावना: प्रथम समये जघन्यत एकोद्वौ वा उत्कर्षतोद्वात्रिंशत् सिद्ध्यन्त: प्राप्यन्ते द्वितीय समयेऽपि जघन्यत एकोद्वौवा उत्कर्षतो द्वात्रिंशदेवं तृतीयसमयेपि एवं चतुर्थ समयेपि एवं यावदष्टमेपि समये जघन्यतएकोद्वौवा उत्कर्षतो द्वात्रिंशत् तत:परमवश्यमन्तरं तथा त्रयस्त्रिंशदादयोष्ट चत्वारिंशत्पर्यंता निरन्तरंसिद्ध्यंत: सप्तसमयान् यावत्प्राप्यन्ते भावना प्राग्वत् परतोनियमादंतरं तथा एकोनपञ्चाशदादय: षष्टिपर्यंतानिरन्तरसिद्धांत उत्कर्षत: षट् समयान् यावदवाप्यन्ते परतोवश्यमन्तरं तथाएक षष्ट्यादयो द्विसप्तति पर्यन्ता निरन्तरं सिद्ध्यन्त: उत्कर्षत: पञ्चसमयान् यावत् प्राप्यंते तत:परमंतरं तथा त्रिसप्तत्यादय: चतुरसीतिपर्यंता निरन्तरं सिद्ध्यन्त: उत्कर्षतश्चतुर: समयान् यावत्प्राप्यंते तत ऊर्द्धमंतरं तथा पंचाशीत्यादय: षण्णवति पर्यंतानिरन्तरं सिद्धांत: उत्कर्षत: त्रीन् समयान् यावदवाप्यंते परतोऽवश्यमंतरं तथा सप्तनवत्यादयोद्युत्तरशत पर्यंतानिरन्तरं सिद्ध्यंत उत्कर्षतो द्वौ समयौ यावदवाप्यंते परतो नियमादंतरं तथात्युत्तर

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



शतादयोष्टोत्तरशतपर्यन्ता: सिद्ध्यन्तो नियमादेकमेव समयं यावदवाप्यन्ते नद्वित्र्यादिसमयानिति एतदर्थसंग्राहिकाचेयं गाथा बत्तीसा अडयालासट्ठीबावत्त रीयबोधव्वा चुलसीई छन्नउई दुरहियसयमट्ठुत्तरसयं च १ अत्र अष्टसामायिकेभ्य आरभ्य द्विसामायिकपर्यन्ता निरंतरं सिद्धा: एकैकस्मिंश्च विकल्पे उत्क र्षत: शत पृथक्त्वं संख्यापरिमाणं गणना द्वारमल्पबहुत्वद्वारंच प्रागिव द्रष्टव्यं तथाच सिद्धप्राभृतेपि द्रव्यप्रमाणचिन्तायामेतयो र्द्वार यो सत्पदप्ररूपणो क्तैव गाथा भूयोपि सत्पदप्ररूपणापरावर्त्तिता संखाए जहन्नेणं एको उक्कोसएण अट्ठसयं सिद्धाणं गाथोवा एक्कगसिद्धाउ संखगुणा १ तदेवमुक्तं द्रव्यप्रमा णं सम्प्रति क्षेत्रप्ररूपणा कर्तव्या तत्र पूर्वभावमपेक्ष्य सत्पदप्ररूपणायामेव कृता सम्प्रति प्रत्युत्पन्ननयमतेन क्रियते तत्र पञ्चदशस्वप्यनुयोगद्वारेषु पृच्छा इह सकल कर्मक्षयं कृत्वा कुत्र गतो भगवान् सिध्यति उच्यते ऋजुगत्याऽमनुष्यक्षेत्र प्रमाणे सिद्धिक्षेत्रे गत: सिध्यति यत उक्तं इहंबोंदि चइत्ताणं तत्थगंतूण सिज्झई गतं क्षेत्रद्वारं सम्प्रति स्पर्शनाद्वारं स्पर्शना च क्षेत्रावगाहादिति रिक्ता यथा परमाणोस्तथा हि परमाणोरेकस्मिन् प्रदेशेऽवगाढ: सप्त प्रादेशिकी च स्पर्शना उक्तंच एगपएसोगाढं सत्तपएसायसे फुसणा सिद्धानां तु स्पर्शना एवमवगन्तव्या फुसइ अणंते सिद्धे सव्वपएसेहिं नियमसोसिद्धो ते उ असंखेज्ज गुणादेस पएसेहिं जे पुट्ठा। गतं स्पर्शनाद्वारं सम्प्रतिकालद्वारं तत्र चेयं परिभाषा सर्वेष्वपि द्वारेषु यत्र यत्र स्थाने अष्टशतमेकसमयेन सिद्ध्य उक्तं तत्र तत्राष्टौ समयानि रंतरं कालो वक्तव्य यत्र यत्र पुनर्विंशति र्दशवा तत्र तत्र चत्वार: समया: शेषेषु स्थानेषु द्वौ समयौ उक्तंच जहिं अट्ठसयं सिज्झइ अट्ठसमया निरंतरं कालो वीस दसएसु चउरोसेसासिज्झंति दोसमए १ संप्रतिएतदेवमन्दविनेयजनानुग्रहाय विभाव्यंते तत्र क्षेत्रद्वारे जंबुद्वीपे धातकी खण्डे पुष्करवरद्वीपे च प्रत्येकं भरतैरावतमहाविदेहेषूत्कर्षतोष्टौ समयान् यावन्निरंतरं सिद्ध्यन्त: प्राप्यन्ते हरिवर्षादिष्वधोलोके च चतुरश्चतुर: समयान् नंदनवने पण्डकवने लवणसमुद्रे च द्वौ द्वौ समयौ कालद्वारे उत्सर्पिण्यामवसर्पिण्यां च प्रत्येकं तृतीयचतुर्थारकयोरष्टावष्टौ सम



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



यान् शेषेषुचारकेषु चतुरश्चतुरस्समयान् गतिद्वारे देवगते रागता उत्कर्षतोष्टौ समयान् शेषगतिभ्यः आगताश्चतुरश्चतुरस्समयानिति वेदद्वारे पश्चात् कृतपुरुषवेदा अष्टौ समयान् पश्चात् कृतस्त्रीवेद नपुंसकवेदाः प्रत्येकं चतुरश्चतुरस्समयानिति पुरुषवेदेभ्य उद्वृत्यपुरुषा एवसन्तः सिद्धां तोष्टौ समयान् शेषेषु चाष्टसु भंगेषु चतुरश्चतुरस्समयानिति तीर्थद्वारे तीर्थंकरतीर्थे तीर्थंकरी तीर्थेवाऽतीर्थकर सिद्धा उत्कर्षतो अष्टौ सम यान् यावत् तीर्थंकरास्तीर्थंकर्यश्च द्वौ द्वौ समयौ लिंगद्वारे स्वलिंगे अष्टौ समयान् अन्यलिंगे चतुरः समयान् गृहलिंगे द्वौ समयौ चारित्रद्वारे अनुभूतपरिहारविशुद्धिकचारित्राश्चतुरः समयान् शेषा अष्टावष्टौ समयान् बुद्धद्वारे स्वयं बुद्धा द्वौ समयौ बुद्धबोधिता अष्टौ समयान् प्रत्येक बुद्धाबुद्धी बोधिताः स्त्रियो बुद्धी बोधिता एक सामान्यतः पुरुषादयो वा प्रत्येकं चतुरश्चतुरः समयान् ज्ञानद्वारे मतिश्रुतज्ञानिनौ द्वौ समयौ मतिश्रुतमनः पर्याय ज्ञानिनौ वा अष्टावष्टौ समयान् अवगाहनाद्वारे उत्कृष्टायां जघन्यायांवावगाहनायां द्वौ द्वौ समयौ यव मध्ये चतुरः समयान् उक्तं च सिद्धप्राभृतटीकायां यवमज्झाए चत्तारि समयादृति अजघन्योत्कृष्टायां पुनरवगाहनायां अष्टौ समयान् उत्कृष्टद्वारे अप्रतिपतितसम्यक्त्वा द्वौ समयौ संख्येयकालप्रतिपति ताश्च चतुरश्चतुरः समयान् अनंतकालप्रतिपतिता अष्टौ समयान् यावत् अंतरादीनि चत्वारि द्वाराणि नेहावतरंति गतं मोक्षं पंचमं काल द्वारं सम्प्रतिषष्ठमंतरद्वारं अंतरं नामसिद्धिगमन विरहकालः सच सकलमनुष्यक्षेत्रापेक्षया सत्पदप्ररूपणायामेवोक्तं यथा जघन्यत एकसमय उत्कर्षतः षण्मासा इति ततः इह क्षेत्र विभागतः सामान्यतो विशेषतश्चोच्यते तत्र जंबूद्वीपे धातकीखण्डे च प्रत्येकं सामान्यतो वर्षपृथक्त्वमन्तरं जघन्यतः एकः समयः वि. शेषचिन्तायां जंबूद्वीपविदेहे धातकीखण्ड विदेहयोश्चोत्कर्षतः प्रत्येकं वर्षपृथक्त्व मन्तरं जघन्यतः एकसमयः तथा सामान्यतः पुष्करवरद्वीपे विशेषचिंता यां तत्तयोर्द्वयोरपि विदेहयोः प्रत्येकमुत्कर्षतः साधिकवर्षमन्तरं जघन्यएक समय उक्तञ्च जंबूद्वीपे धायई उहविभागेयतिस्र विदेहेसु वासपुहुत्तं अंतरपुक्ख

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



रमुभयंपि वासच्चियं १ कालद्वारे भरतैरावतेषु च जम्बूत्कृष्टमन्तरं किञ्चिदूना अष्टादशसागरोपमकोटीकोट्यः संहरणतः संख्येयानिवर्षसहस्राणि जघन्यतः उभयत्राप्येकः समयः गतिद्वारे निरयगते रागत्योपदेशेन सिद्धानामुत्कृष्टमन्तरं वर्षसहस्रं हेतुमाश्रित्य प्रतिबोधसंभवेन सिध्यतां संख्येयानि वर्षसहस्राणि जघन्यतः पुनरुभयत्राप्येकः समयः तिर्यग्योनिकेभ्य आगत्योपदेशतः सिध्यतां वर्षशतपृथक्त्वं हेतुमाश्रित्य प्रतिबोधतः सिध्यतां संख्येयानि वर्षसहस्राणि जघन्यतः पुनरुभयत्राप्येकः समयः तिर्यग्योनिकः स्त्रीभ्यो मनुष्येभ्यो मनुष्य स्त्रीभ्यः सौधर्मेशानवर्जदेवेभ्यो देवीभ्यश्च पृथक् समागत्योपदेशतः सिद्धानां प्रत्येकमुत्कर्षतोऽन्तरं सातिरेकं वर्षं हेतुमाश्रित्यप्रतिबोधतः सिध्यतां संख्येयानिवर्षसहस्राणिजघन्यतः पुनरुभयत्राप्येकः समयः तथापृथिव्यप्वनस्पतिभ्यो गर्भव्युत्क्रांतेभ्यः प्रथमद्वितीयनरक पृथिवीभ्यामीशानदेवेभ्यः सौधर्म्मदेवेभ्यश्च समागत्योपदेशेन हेतुना च सिध्यतां प्रत्येकमुत्कृष्टमन्तरंसङ्ख्येयानि वर्षसहस्राणि जघन्यतः एकः समयः वेदद्वारे पुरुषवेदानामुत्कर्षतोऽन्तरं साधिकं वर्षं स्त्रीनपुंसकवेदानां प्रत्येकं संख्येयानि वर्षसहस्राणि पुरुषेभ्यः उद्वृत्यपुरुषत्वेन सिध्यतां साधिकं वर्षं शेषेषु चाष्टसु भङ्गकेषु प्रत्येकं संख्येयानि वर्षसहस्राणि जघन्यतः सर्वत्राप्येकः समयः तीर्थद्वारे तीर्थकृता पूर्वसहस्रपृथक्त्वमुत्कर्षतोऽन्तरं तीर्थकरीणामनन्तः कालः अतीर्थकराणां साधिकं वर्षंनोतीर्थसिद्धानां संख्येयानि वर्षसहस्राणि नो तीर्थसिद्धाः प्रत्येकबुद्धाः जघन्यतः सर्वत्रापि समयः उक्तं च पुव्वसहस्सपुहुत्तं तित्थकरानंतकालतित्थगरीनो तित्थकरावासाहि गम्सुसेसेसु संखसमा१ एएसिंच जहन्नं सम उक्कतमंत्वसमन्ति संख्येयानि वर्षसहस्राणि लिंगद्वारे स्वलिंगादिषु सर्वेष्वपि जघन्यत एकः समयांतरमुत्कर्षतोऽन्यलिंगेगृहलिंगे च प्रत्येकं संख्येयानि वर्षसहस्राणि स्वलिंगे साधिकं वर्षं चारित्रद्वारे पूर्वभावमपेक्ष्य सामायिक सूक्ष्मसंपराय यथा ख्यातचारित्रिणामुत्कृष्टमन्तरं साधिकं वर्षं सामायिकछेदोपस्थापनसूक्ष्मसम्पराय यथाख्यात चारित्रिणां सामायिकपरिहारविशुद्धिकसूक्ष्मसम्पराय यथाख्यात चारित्रिणां सामायिकछेदोपस्थापनपरिहारविशु

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



द्धिकसूक्ष्मसंपराय यथाख्यात चारित्रिणां सामायिक छेदोपस्थापनपरिहार विशुद्धिकसूक्ष्मसंपराय यथाख्यात चारित्रिणां च किञ्चिदूनाष्टादशसागरोप मकोटीकोट्यः जघन्यतः सर्वत्राप्येकः समयः बुद्धद्वारे बुद्धबोधितानामुत्कर्षतोऽन्तरं सातिरेकं वर्षं स्वयंबुद्धबोधितानां स्त्रीणां प्रत्येकबुद्धानां च संख्येयानि वर्ष सहस्राणि स्वयंबुद्धानां पूर्वसहस्रं पृथक्त्वं जघन्यतः पुनः सर्वत्रापि समयः उक्तं च बुद्धेहिं बोहियाणं वा सहियं सेसयाणसंखसमापुव्वसहस्स पुहुत्तं होदूस यं बुद्धिसमयूयरं १ समदृयरमित्ति दूतरत् जघन्यमन्तरं समयः ज्ञानद्वारे मतिश्रुतज्ञानिनामुत्कृष्टमन्तरं पल्योपमासंख्येयभागः मतिश्रुतावधिज्ञानिनां सा धिकं वर्षं मतिश्रुतमनः पर्यायज्ञानिनां मतिश्रुतावधिमनःपर्यायज्ञानिनां च संख्येयानि वर्षसहस्राणि जघन्यतः सर्वत्रापि समयः अवगाहनाद्वारे जघन्य यामुत्कृष्टायां चावगाहनायां यवमध्ये चोत्कृष्टमन्तरमसंख्येयभागः अजघन्योत्कृष्टायां साधिकं वर्षं जघन्यतः पुनः सर्वत्रापि समयः उत्कृष्टद्वारे च प्रतिपतितसम्यक्त्वानां सागरोपमासंख्येयभागः संख्येयकालप्रतिपतितानामसंख्येयकालप्रतिपतितानां च संखेयानि वर्षसहस्राणि अनन्तकालप्रति पतितानां साधिकं वर्षं जघन्यतः सर्वत्रापि समयः उक्तं च उयहिअसंखो भागो अप्पडियपडियाणसेस संखसमाधा समहितं मणंते समउयजहन्नउहोइ अंतरद्वारे सांतरं सिद्धतामनुसमयद्वारे निरन्तरं सिध्यतां गणनाद्वारे एककानामनेकेषां च सिद्धतामुत्कृष्टमसंख्येयानि वर्षसहस्राणि जघन्यतः पुनः सर्वत्रापि समयः गतमंतरद्वारं संप्रतिभावद्वारं तत्र सर्वेष्वपि क्षेत्रादिषु द्वारेषु पञ्चाकतरस्मिन् भावे वर्त्तमानाः सिद्धन्तीति उत्तरं क्षायिके भावे उक्तं च खेत्ताइएसुपुच्छा वागरणं सव्वहिखइए गतभावद्वारं संप्रत्यल्पबहुत्वद्वारं तत्र ये तीर्थंकराः ये च जलेऊर्ध्वलोकादौ च चतुष्काः सिद्धन्ति ये च हरिवर्षा दिषु सुखमसुखमादिषु च संहरणतोदशदशसिद्धन्ति ते परस्परं तुल्यास्तथैवोत्कर्षतो युगपदेकसमयेन प्राप्यमानत्वात् तेभ्योपि विंशति सिद्धाः स्तो कास्तेषां स्त्रीषु दुःखमायामेकतरस्मिन् विजये प्रमाणत्वात् तथाचोक्तं वीसगसिद्धादुत्थी अहलोगे गविजयादिसु चउचउदसमेहिं तोयोवातेतुल्याविंश

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



तिर्यक् सिद्धा यतस्ते सर्व्वाधोलौकिकग्रामेषु बुद्धबोधितस्त्र्यादिषु वा लभ्यन्ते ततो विंशतिसिद्धैः स्तुल्याः तदुक्तं वीसपुहुत्तसिद्धा सव्वाहोलोगबुद्धबोहि याइ अउवीसगेहिं तुल्ला खेत्तकालयो स्तुल्यत्वात्कादाचित्कत्वेनचसम्भवादिति तेभ्योऽष्टशतसिद्धाः संख्येयगुणा उक्तंच चउदसगातह्वीसा वासपुहुत्ताय अट्ठ सया तुल्लायोवा तुल्लासंखेज्जगुणाभवेसेसा १ गतमल्पबहुत्वद्वारं कृतानन्तरसिद्धप्ररूपणा संप्रतिपरम्परसिद्ध प्ररूपणाक्रियते तत्र सत्पदप्ररूपणापञ्च दशस्वपि क्षेत्रादिष्वनन्तरसिद्ध वदविशेषेणद्रष्टव्या द्रव्यप्रमाणचिन्तायां सर्व्वेष्वपि द्वारेषु सर्व्वत्रै वानन्तावक्तव्याः क्षेत्रस्पर्शने प्रागिवकालः पुनः सर्व्वत्राप्य नादिरूपोनन्तो वक्तव्यः अतएवांरभसम्भवाच्च वक्तव्यं तदुक्तं द्रव्यप्रमाणं कालमंतरञ्चाधिकृत्य सिद्ध प्राभृते परिमाणेन अनंताकालोणाई अणंतओ तेसिंनत्थिय अंतरकालोत्ति भावद्वारमपि प्रागिवसंप्रत्यल्पबहुत्वं सिद्ध प्राभृतक्रमेणोच्यते समुद्रसिद्धा स्तोकातेभ्यो द्वीपसिद्धाः संख्येयगुणाः तथाजलसि द्धाः स्तोकाः तेभ्यस्थलसिद्धाः संख्येयगुणाः तथा ऊर्द्धलोके सिद्धाः स्तोकास्तेभ्योधोलोक सिद्धाः संख्येयगुणाः तेभ्योपि तिर्यग्लोक सिद्धा संख्येयगुणाः उक्तञ्च सामुद्ददीव जलथलदुयदुयं दुयह तुथोवसंखगुणाउड्ढ अहतिरियलोएथोवासंखगुणासंखा १ तथालवणसमुद्रसिद्धाः सर्व्वस्तोकास्तेभ्यः कालोदधिसमुद्र सिद्धाः संख्येयगु०स्तेभ्योपि जंबूद्वीपसि० संख्येयगु०तेभ्योधातकीखंडसि० संख्येयगु०स्तेभ्योपि पुष्करवरद्वीपार्द्धसि०संख्येयगु०उक्तञ्च लवणेकालोएवा जंबु द्दीवेयधायईसंडे पुक्खरवरेयदीवे कमसोथोवायसंखगुणा१ तथा जंबूद्वीपे संहरणतो हिमवच्छिखरिसि० सर्व्वस्तोकातेभ्यो हेमवतऐरणवतसि०संख्येयगु०ते भ्योमहाहिमवद्रूपिरु० संख्येयगुणा तेभ्यो देवकुरूत्तरकुरुसि० संख्येयगुणाः तेभ्योहरिवर्षरम्यकसि०संख्येयगु०क्षेत्रबाहुल्यात्तेभ्योपि निषधनीलवत्सि० संख्येयगुणास्तेभ्योपि भरतैरावतसि० संख्येयगुणा स्वस्थानत्वात्तेभ्यो महाविदेहसि० संख्येयगुणासदाभावात् संप्रतिधातकी खंडक्षेत्रविभागे नोच्यते धातकी खंडे संहरणतो हिमवच्छिखरसि० सर्व्वस्तोकाः तेभ्योपि हिमवद्रूपिसि० संखेयगुणा तेभ्योपि निषधनीलवत्सि० संख्येयगुणा तेभ्योपि हैमवतै

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



रण्यवत्सि० विशेषाधिकास्तेभ्यो देवकुरूत्तरकुरुसि० सङ्ख्येयगुणास्तेभ्योपि हरिवर्षरम्यकसि० विशेषाधिकास्तेभ्योपि भरतैरावतसि० सङ्ख्येयगुणा:ते
भ्योपि महाविदेहसि० संङ्ख्येयगुणा तथापुष्करवरद्वीपार्द्धे हिमवच्छिखरिसि० सर्वस्तोका: तेभ्योपि महाहिमवद्रूपिसि०सङ्ख्येयगुणा तेभ्योपि निषधनीलव
त्सि० सङ्ख्येयगुणा ३ तेभ्योपि हैमवतैरण्यवतसि० सङ्ख्येयगुणा४ तेभ्योपि देवकुरूत्तरकुरुसि० संख्येयगुणा: तेभ्योपि हरिवर्षरम्यकसि० विशेषाधिका६
तेभ्योपि भरतैरावतसि० सङ्ख्येयगुणा: ७ स्वस्थानमिति ज्ञात्वा तेभ्योपि महाविदेहसि० संख्येयगुणा क्षेत्रबाहुल्यात् स्वस्थानत्वाच्च संप्रतित्रयाणामपि
समवायेनाल्पबहुत्वमुच्यते सर्वस्तोका जंबूद्वीपे हिमवच्छिखरिसि०तेभ्यो हिमवतैरवतसिद्धा: संख्येयगुणा: तेभ्योपि महाहिमवद्रूपि सिद्धा: संख्येयगुणा:
तेभ्योपि देवकुरूत्तरकुरुसि० संख्येयगुणा: ४ तेभ्योपि हरिवर्षरम्यकसि० संख्येयगुणा५ तेभ्योपि निषधनीलवत्सि० संख्येयगुणा ५ तेभ्यो धातकीखंडे
हिमवतशिखरिसि० विशेषाधिका: स्वस्थाने तु परस्परं तुल्या ततो धातकी खंड महाहिमवद्रूपि पुष्करार्द्धद्वीपार्द्धे हिमवच्छिखरिसि० संख्येयगुणा
स्वस्थानेपि चत्वारोपि परस्परतुल्या ततो धातकी खंड हैमवतैरण्यवत् सि० विशेषाधिका १० तेभ्योपि पुष्करवरद्वीपार्द्धे निषधनीलवत् सि०
संख्येयगुणा १० ततो धातकीखंडे देवकुरूत्तरकुरु सि० संख्येयगुणा १२ तेभ्योपि धातकीखंड एव हरिवर्षरम्यक् सि० विशेषाधिका तत:
पुष्करवरद्वीपार्द्धे हिमवतैरण्यवतसिद्धासङ्ख्येयगु० १३तेभ्योपि पुष्करवरद्वीपार्द्धे एवदेव कुरूत्तर कुरुसिद्धासंख्येयगु० १५तेभ्योपि तत्रैव हरिवर्षरम्यक्सिद्धा
विशेषाधिका १६ तेभ्योपि जंबूद्वीपे भरतैरावतसिद्धासंख्येयगु० १७तेभ्योपि धातकीखण्डगत भरतैवतसिद्धा१८संख्येयगु०तेभ्योपि पुष्करवरद्वीपार्द्धे भरतैरा
वतसिद्धा:संख्येयगु० १९तेभ्योपिजंबुद्वीपे विदेहसिद्ध: संख्येयगु०२०ततोधातकीखण्डविदेहसिद्ध संख्येयगु०२१ततोपि पुष्करवरद्वीपार्द्धे विदेहसिद्धा सं०२२
इदंच क्षेत्र विभागेनाल्पबहुत्वं सिद्धप्राभृतटीकातो लिखितं गतं क्षेत्रद्वारमधुना कालद्वारं तत्रावसर्पिण्यां संहरणत: एकांत दु:खमासिद्धासर्वस्तोका:

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



इतो दुःखमासिद्धाः सङ्ख्ये० तेभ्य सुखमदुःखमासिद्धा असंख्येयगुणाः कालस्यासंख्येयगुणत्वात्तत सुखमासिद्धाः विशेषाधिकाः तेभ्योपि दुःखमसुखमा सिद्धा संख्येयगुणा उक्तंच अइदु समाइ योवासंखे दुवेविसेसहिया दुसमसुसमा असङ्ख गुणा उउसप्पिणी सिद्धा १ एवमुत्सर्पिण्यामपि द्रष्टव्यं तथा चोक्तं अइदूसमाएथो वासंख असंखाउ दुन्नियविसेसादुसमसुसमससंखगुणाउउसप्पिणी सिद्धा १ संप्रत्युत्सर्पिण्यो समुदायेनाल्पबहुत्वमुच्यतेतत्र द्वयो रप्युत्सर्पिण्योरेकांतदुःखमासिद्धाः सर्वस्तोकाः तत्र उत्सर्पिण्यवसर्पिण्यां दुःखमासिद्धा विसेषाधिकाः ततोवसर्पिण्यांदुःखमासिद्धाःसंख्येयगुणा ततोद्वयोरपि सुखमदुःखमासिद्धाः असंखेयगुणाः तेभ्योपि द्वयोरपि सुखमासिद्धा विशेषाधिकाः तेभ्योपि द्वयोरपि दुखमासिद्धा विशेषाधिकाः तेभ्योपि द्वयोरपि सुख मासिद्धा विशेषाधिकाः तेभ्योपि द्वयोरपि दुःखमसुखमासिद्धाः असंखेयगुणा ततोवसर्पिण्यां सर्वसिद्धा असंख्येयगुणा तेभ्योप्युत्सर्पिण्यां सर्वसिद्धाविशेषा धिकागतंकालद्वारंसम्प्रति गतिद्वारं तत्रमानुषेभ्यो अनन्तरागताः सिद्धासर्वस्तोकाः ततोमानुषेभ्योऽनन्तरागतासिद्धाः सङ्ख्येयः गु० तेभ्योपि नैरयिकेभ्योऽ नन्तरागताः सिद्धाः संख्येयगुणाः तेभ्योपि तिर्यग्योनि स्त्रीभ्योऽनंतरागता सिद्धा संख्येयगुणा तेभ्योपि तिर्यग्योनिकेभ्योऽनंतरागताः सिद्धाः संख्येय गुणा उक्तंच मणुइमणुयानारयतिरिक्खीणा तह तिरिक्खदेवी देवाय जहा कमसो संखेज्ज गुणासुणेयव्वा १ तथा एकेंद्रियेभ्योनंतरगताः सिद्धा सर्व स्तोकाः ततः पंचेन्द्रीयेभ्योऽनंतरागताः सिद्धाः संख्येयगुणा तथा वनस्पतिकायेभ्योनंतरागता सिद्धा सर्वस्तोकाः ततः पृथ्वीकायेभ्योनंतरागता सिद्धा संख्येयगुणा ततोप्यप्कायेभ्योनंतरागता सिद्धासंख्येयगुणाः तेभ्योपि त्रसकायेभ्योनंतरागताः सिद्धाः संख्येयगुणा उक्तंच एगिंदिएहिंयोवा सिद्धा पंचें दिएहिं संखगुणा तरुपुढविद्या उतसकाइएहिं संखा गुणाकमसो १ तथा चतुर्थनरक पृथिवीतोनंतरागता सिद्धाः सर्वस्तोकाः तेभ्य स्तृतीयपृथिवीतोनंत रागता सिद्धाः संखेयगुणा तेभ्योपि पर्याप्तबादरपृथिवीकायोभ्योनंतरागताः सिद्धा संख्येयगुणाः तेभ्योपि पर्याप्तबादराप्कायेभ्योऽनंतरागताः सिद्धा सं

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



ख्येयगुणा तेभ्योपि भवनपतिदेवीभ्योनंतरागता: सिद्धा: संख्येयगुणा तेभ्योपि भवनपतिदेवेभ्योनंतरागता: सिद्धासंखेयगुणा: ततोपि व्यंतरीभ्योनंत
रागता: सिद्धा: संख्येयगुणा: तेभ्योपिव्यंतरदेवेभ्योनंतरागता: सीद्धा: संखेयगुणातेभ्योपि ज्योतीष्कदेवीभ्योनंतरागता: सिद्धा संखेयगुणा स्तेभ्योपि
ज्योतिष्कदेवेभ्योऽनंतरागता: सिद्धा: सङ्ख्येयगुणा तेभ्योपि मनुष्यस्त्रीभ्योप्यनंतरागता सिद्धा: संखेयगुणा: तेभ्योपि मनुष्येभ्योनंतरागता: सिद्धा: संख्ये
यगुणा तेभ्योपि प्रथमनरकपृथिवीतोनंतरागता: सिद्धा सङ्ख्येयगुणा: तेभ्योपि तिर्यग्योनिस्त्रिभ्यऽनंतरागता: सिद्धा: सङ्ख्येयगुणा तेभ्योपि तिर्यग्योनि
केभ्योऽनंतरागता सिद्धा: सङ्ख्येयगुणा: तेभ्योप्यनुत्तरोपपातिदेवेभ्योऽनंतरागता सिद्धा संख्येयगुणा तेभ्योपि ग्रैवेयकेभ्योनंतरागता:सिद्धा:संख्येयगुणा
तेभ्योप्यच्युत देवलोकानंतरागता: सिद्धा संख्येयगुणा तेभ्योपि आरणदेवलोकादनंतरागता: सिद्धासंख्येयगुणा एवमधोमुखंतावन्नेयं यावत्सनत्कुमारा
दनंतरागता सिद्धा: संख्येयगुणा तत ईसानदेवीभ्योऽनंतरागता सिद्धा: संख्येयगुणा:ततापि सौधर्म्मदेवीभ्योनंतरागता: सिद्धासंख्येयगुणातेभ्योपीशा
नदेवेभ्यऽनंतरागता: सिद्धा संख्येयगुणा: तेभ्योपि सौधर्मदेवेभ्योऽनंतरागता सिद्धा संखेयगुणा: उक्तंच नरगचउत्थी पुढवीतच्चादोतरूपुढविआउ
भवणवइदेविदेवाएवं वणजोइसाणंपि १ मणुईमणुअनारय पढमातहतिरिक्खतिरियावदेवाणुत्तराई सव्वेविसणं कुमारंता १ ईसाणदेविसोहम्मदेवि
ईशाणदेवसोहम्मा सव्वेविअहा कमसो अणंतरा आउसंखगुणा १ गतंगतिद्वारं सम्प्रतिवेदद्वारं तत्र सर्वस्तोका नपुंसकसिद्धा: तेभ्य स्त्रीसिद्धा: संख्येय
गुणा ततोपि पुरुषसिद्धा: संख्येयगुणा उक्तंच थोवा नपुंसइत्थी संखासंखगुणातओ पुरिसा तीर्थद्वारे सर्वस्तोकास्तीर्थकरीसिद्धा तत:तीर्थकरीतीर्थेप्रत्येक
बुद्धसिद्धा: संखेयगुणा:तेभ्योपि तीर्थकरीतीर्थे अतीर्थकरासिद्धा: संख्येयगु० तेभ्योपि तीर्थकरतीर्थे एवातीर्थकरसिद्धा: संख्येयगुणातेभ्यस्तीर्थकरसिद्ध:
अनंतगुणातेभ्योपि तीर्थकरतीर्थे प्रत्येकबुद्धसिद्धा: संखेयगुणा तेभ्योपि तीर्थकरतीर्थेएव साध्वीसिद्धा: संख्येयगुणा: तेभ्योपि तीर्थकरतीर्थे एवातीर्थकर

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



सिद्धा: संख्येयगुणा: लिंगद्वारे गृहिलिंग सिद्धा: सर्वस्तोका: तेभ्योऽप्यन्यलिङ्गसिद्धा: असंख्येयगुणा: तेभ्योपि स्वलिङ्गसिद्धा: असंखेयगुणा उक्तं च गिहि अन्नसलिङ्गे हिं सिद्धा थोवा दुवे असंखगुणा चारित्रद्वारे सर्वस्तोका:च्छेदोपस्थापनपरिहारविसुद्धिक सूक्ष्मसंपराय यथाख्यातचारित्रसिद्धा: तेभ्योसामायिक च्छेदोपस्थानपरिहारविशुद्धिक सूक्ष्मसंपराय यथाख्यात चारित्र सिद्धा: असंख्येयगुणा: तेभ्योपि च्छेदोपस्थापन सूक्ष्मसंपराय यथाख्यात चारित्रसिद्धा: तेभ्योपि सामायिकच्छेदोपस्थापन सूक्ष्म संपरा यथाख्यात चारित्रसिद्धा: संख्येयगुणा: तेभ्योपि सामायिक सूक्ष्म संपराययथाख्यात चारित्रसिद्धा: संख्येयगुणा उक्तं च थोवा परिहारचउपंचगसिद्धा असंखसंखा यतिगस्येय चउक्कं संखसामाइयतिगं च संखगुणं बुद्ध द्वारे सर्वस्तोका: स्वयं बुद्धसिद्धा: तेभ्य: प्रत्येकबुद्धसिद्धा: संख्येयगुणा: तेभ्योपि बुद्धबोधितसिद्धा: संख्येयगुणा: तेभ्योपि बुद्धबोधितसिद्धा: संख्येयगुणा: ज्ञानद्वारे मतिश्रुतमन: पर्यायज्ञानिन: सिद्धा: सर्वस्तोकास्तेभ्यो मतिश्रुतज्ञान सीद्धा: संख्येयगुणा: तेभ्योपि मतिश्रुता वधिमन: पर्यवज्ञानिसिद्धा: असंख्येय गुणा: तेभ्यो मतिश्रुतावधिज्ञानि सिद्धा: संख्येयगुणा: उक्तं च मणपज्जवनाणतिगेदुगे चउक्के मणनाणास्थोवा संख असंखाउहि तिगेडंति संखेज्जा १ अवगाहनाद्वारे सर्वस्तोका: द्विहस्तप्रमाणजघन्यावगाहनासिद्धस्तेभ्यो धनुःपृथक्त्वाभ्यधिकपंचधनु: शतप्रमाणोत्कृष्टावगाहनासिद्धा: असंख्येयगुणा ततोमध्यमावगाहना सिद्धा असंखेज्जयगुणा उक्तं च उगाहणा जहन्नाथो वा उक्कोसिया असंखगुणा ततोविअसंखगुणाना यव्वामज्झिमा एवि १ अत्रैव सिद्धप्राभृतटीकाकारोपदर्शितो विशेषो दर्श्यते सर्वस्तोका: सप्तहस्तावगाहना सिद्धा: तेभ्य: पंचधनु: शतप्रमाणावगाहना सिद्धा: विशेषाधिका: पञ्चधनु: शतोन्यूनतप्रमाणावगाहना सिद्धा: संख्येयगुणास्तेभ्योपि सातिरेकसप्तहस्तप्रमाणावगाहनासिद्धा: विशेषाधिका उत्कृष्टद्वारे सर्वस्तोका: अप्रतिपतित सिद्धास्तेभ्य: संख्येयकालप्रतिपतितसिद्धा: असंख्येयगुणा: तेभ्योप्यसंखेज्जयकालप्रतिपतितसिद्धा: संखेज्जयगुणा: तेभ्योप्यनन्तकाल



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



प्रतिपतितसिद्धाः असंखेयगुणाः उक्तंच अपडिवडियासिद्धा संखाऽसंखा अणंतकालायथोवअसंखेज्जगुणा संखेज्जगुणा असंखगुणा १ अंतरद्वारे सर्वस्तो
काः षण्मासांतरसिद्धास्ततएक समयांतरसिद्धासंखेयगुणाः ततो द्विसमयांतरसिद्धासंखेयगुणाः ततोपि त्रिसमयांतरसिद्धा संखेयगुणाः एवंतावद्वाच्यंया
वत् यवमध्यं ततः संखेयगुणाहीनास्तावद्वक्तव्याः यावदेकसमयहीनःषण्मासांतरसि०संखेयगुणाहीनाः अनुसमयद्वारेसर्वस्तोकाअष्टसमयसिद्धास्ततः सप्तसम
यसिद्धासंखेयगुणाः तेभ्यषट्समयसिद्धाऽसंखेयगु०एवं समयहान्यातावद्वाच्यंयावत् द्विसमयसिद्धासंखेयगु०उक्तंच अट्ठसमयंमिथोवासंखेज्जगु०उसत्तसम
याओ एवं पडिहायंते जावपुणोदोन्निसमयाउ१ अत्रअट्ठसमयं मीत्यादो द्विगुसमाहारत्वादेकवचनं गणनाद्वारैसर्वस्तोका अष्टशतसि० ततः सप्ताधिकशत
सिद्धाः अनंतगुणातेभ्योपि षडधिकशतसिद्धा अनंतगुणा तेभ्योपि पञ्चाधिकशतसिद्धा अनंतगुणा एवमेकैकहान्या अनंतगुणास्तावद्वाच्या यावदेकपंचाश
त्सिद्धेभ्य पंचाशत्सिद्धा अनंतगुणाः ततस्तेभ्यएकोनपंचाशत्सिद्धाःअसंखेयगु० तेभ्योप्यष्टचत्वारिंसिद्धाः असंख्येगु०तेभ्योपि त्रयोविंशतिसिद्धाः संख्येयगुणाः
एवमेकैकपरिहान्यायावद्वाच्यं यावत्षड्विंशतिसिद्धेभ्यो पंचविंशतिसिद्धाअसंख्येयगु० ततस्तेभ्यश्चतुर्विंशतिसिद्धाः संख्येयगुणा एवमेकैकहान्या संख्येयगुणा
स्तावद्वाच्यायावत् द्विसिद्धेभ्य एकैकसिद्धाः संख्येयगुणाः उक्तंच अट्ठसयसिद्ध थो वा सत्तहियसया अणंतगुणियसया एवंपरिहायंते सयामाउजावपन्नासं १
ततोपन्नासाओ असंखगुणियाउजावपणवीसं पणवीसा आरंभा संखगुणा होंति एगंता १ सम्प्रत्यस्मिन्नेवाल्पबहुत्वद्वारे योविशेषः सिद्धप्राभृते दर्शितः
सविनेय जनानुग्रहाय दर्श्यते तत्र सर्वस्तोका अधोमुखसिद्धाः ते च पूर्ववैरिभि पादेनोत्पाट्यनीयमाना अधो मुखकायोत्सर्गस्थिता वेदितव्या तेभ्यः ऊर्द्ध
स्थितकायोत्सर्ग सिद्धाः संख्येयगुणाः तेभ्यो उत्कटिका सनसिद्धाः संख्येयगुणास्तेभ्योवीरा सनसिद्धा संख्येयगुणाः तेभ्योपिन्युब्जासनसिद्धा संख्येयगुणाः
न्युब्जउपविष्ट एवाधोमुखो द्रष्टव्यः तेभ्योपि पार्श्वस्थितसिद्धाः संखेयगुणा स्तेभ्योप्युत्तानस्थितसिद्धाः संख्येयगुणाः यथा चैतदेव पश्चानुपूर्व्याभि

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



च्छितं उत्तानगपातिल्लगनिउक्कवीरासणेय उक्कडिए उड्ढट्ठियडमंथिय संखिज्जगुणा हीणाओ १ तदेवमुक्तमल्पबहुत्वद्वारं सम्प्रति सर्वद्वारगताल्प बहुत्वविशेषोपदर्शनाय सन्निकर्षद्वारमुच्यते सन्निकर्षो नामसंयोगः ह्रस्व दीर्घयोरिव विवक्षितं किंचित् प्रतीत्य विवक्षितस्याल्प तया बहुत्वेन वाऽवस्थान रूपसम्बन्धः उक्तंच संयोगसन्निगासो पडुच्च सम्बन्ध एगट्ठा तत्रेयं व्याप्तिर्यत्र यत्राष्टशतमुपलभ्यते तत तत्रोपरितनमष्टकरूपमंकमपनीय शेषस्य शतस्य चतु-र्भिभार्गो क्रियते कृते च भागे लब्धा पंचविंसति तत्र पंचविंशति संख्येय प्रथमचतुर्थभागे क्रमेण संखेय्रयगुणहानिर्वक्तव्या तद्यथा सर्वस्तव एकैकसि० ततो द्विकद्विकसिद्धा संखेय्रयगुणहीनास्तेभ्योपित्रिकर सिद्धा संखेय्रयगुणहीनः एवंतावद्वाच्यं यावत्पंचविंशतिसिद्धा संखेय्रयगुणहीना तदुक्तं पढमोचउत्थभागो पणवीसातत्थ संखेज्जगुणहीणा दट्ठव्वन्ति द्वितीये पुनश्चतुर्थभागे क्रमेण संखेय्रयगुणहानिर्वक्तव्यातद्यथा पंचविंशतिसिद्धेभ्यः षट्विंशतिसिद्धा असंखेय्रय गुणहीना एवमेकैकवृद्ध्या असंखेय्रयगुणहानिस्तावद्वक्तव्या यावत्पंचाशत्तदुक्तं बिइए चउभागे असंखगुणहानि जावपन्नासंति तृतीयस्माच्चतुर्थभागादारभ्य सर्वत्राप्यनंतगुणहानिर्वक्तव्या तद्यथा पंचाशत् सिद्धेभ्यः एकपंचाशदेकपंचाशत्सिद्धा अनंतगुणहीना तेभ्योपि द्विपंचाशत्सिद्धा अनंतगुणहीना एव मेकैकवृद्ध्या अनंतगुणहानि स्तावद्वक्तव्या यावदष्टाधिकशतसिद्धा अनंतगुणहीना उक्तंच तइयपयं आइकाउणचउत्थपयं जाव अट्ठसयं जाव अणंतगुणहीणा एगवन्नाउ आरंभदट्ठव्या सिद्धप्राभृतसूत्रेप्युक्तं पढमे भागे संखाबिइए असंखयणंत तईयाए तथा यत्र२ विंशतिसिद्धा स्तत्रतत्रापि व्याप्तिरियमनुसर्त्तव्या प्रथमे चउर्थभागे संख्येयगुणहानिर्द्वितीये असंख्येय गुणहानि स्तृतीये चतुर्थे चानन्तगुणहानिस्तत् यथा एकेकसिद्धाः सर्वबहवस्तेभ्योपि द्विकरसिद्धा संखेय्रयः गुणहीनाः एवं तावद्वाच्यं यावत्पंचततः षडादिसिद्धा असंखेय्रयगुणहीणा यावद्दश ततएकादशादयः चतुर्थभागे असंखेय्रयः तृतीयचतुर्थभागाद्दारभ्य पुनः सर्वत्राप्यनन्तगुणहानि येषु तु हरिवर्षादिषु स्थानेषु उत्कर्षतोदससिद्धान्ति तत्रैवं व्याप्तिस्त्रिकं यावत्संखेय्रयगुणहानिः ततश्चतुष्के पंचकेवा सं० गुण

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



हानिः ततःषट्कादारभ्य सर्वत्राप्यनंतगुणहानिस्तद्यथा एकैकसिद्धाःसर्वबहवः ततोद्विकरसिद्धासंख्येयगुणाः तेभ्योपित्रिकर सिद्धासं० तेभ्योपि चतुश्चतुःसिद्धा असं० तेभ्योपि पंचर सिद्धाअसं० ततः षडादयः सर्वेऽनंतगुणहीना यत्र पुनरवगाहनायवमध्यादावुत्कर्षतोष्टौ सिद्ध्यन्तः प्राप्यन्ते तत्रैवं व्याप्तिश्चतुष्कं यावत्सं० ततः परमनंतगुणहानि तद्यथा एकैकसिद्धा सर्वबहवस्तेभ्योपि द्विकर सिद्धा सं० तेभ्योपि त्रिकर सिद्धाः सं० तेभ्योपि चतुश्चतुसिद्धा सं० गुणहीना ततःपरं पञ्चादयोनंतगुणहीनाः अत्रासंख्य गुणहानि नैविद्यते यत्र पुनरूर्द्ध्वलोकादावुत्कर्षतश्चत्वार सिद्ध्यन्त प्राप्यन्ते तत्रैवं व्याप्तिः एकैकसिद्धाः सर्वबहव तेभ्यो द्विकर सिद्धाअसं०गुणहीना तेभ्योपि त्रिकरसिद्धाअनंतगुणहीना तेभ्योपि चतुश्चतुसिद्धा अनंतगुणहीनाः अत्रसंख्य गुणहानीनैविद्यते तदुक्तं जत्थ चत्तारि सिद्ध दिट्ठातत्थसंखेज्जगुणहाणी नत्थि संखेज्जविवज्जि यचयोक्ते इति वचनात् इति यत्र पुनर्लवणादौ द्वौद्वावुत्कर्षतः सिद्ध्यन्तौ दृष्टौ तत्रैवं व्याप्तिरेकैकसिद्धाःसर्व बहवः ततो द्विकरसिद्धा अनंतगुणहीनाः तदुक्तं लवणादौ दोसिद्धा दिट्ठातत्थएक्कगसिद्धा बहुगाद्गुगसिद्धा अणंतगुणहीना तदेवमिह सन्निकर्षो द्रव्यप्रमाणे सप्रपञ्चं चिन्तितः शेषेषु द्वारेषु सिद्ध प्राभृतटीकातो भावनीयः इह तु ग्रंथ गौरवभयान्नोच्यते सिद्ध प्राभृत सूत्रं तद्वृत्ति चोपजीव्यमत्रयगिरिसिद्ध स्वरूपमेतन्निरवो चच्छिष्यहितः सिद्ध संप्रतिविशेषांतरजिज्ञासुरनन्तरं सिद्ध स्वरूपं शिष्य प्रश्नयन्नाहसे किंतमित्यादि अथ किं तदनंतरसिद्ध केवलज्ञानं सूरिराह अनंतरसिद्धकेवलज्ञानं पञ्चदशविधं प्रज्ञप्तं पञ्चदशविध ताच तस्यानन्तरसिद्धानामनन्तरपाश्चात्यभवरूपोपाधिभेदापेक्षया पञ्चदशविधत्वातोनन्तरं सिद्धानामेवानन्तर भवोपाधिभेदतः पञ्चदशविधतां सुव्यक्त आह तद्यथेत्यु पप्रदर्शने तित्थ सिद्धा इत्यादि तीर्यं ते संसारसागरोनेनेति तीर्थं यथावस्थितसकलजीवा जीवादि पदार्थप्ररूपकं परमगुरुप्रणीतं प्रवचनं तच्च निराधारं न भवतीति कृत्वा संघः प्रथमगणधरोवाव्यवसेयः उक्तं च तित्थं भंते तित्थं तित्थं करेतित्थं गोयमा अरहातावतित्थं करेतित्थं पुण्णचाउवण्णो समणसंघोपढमगणहरो वा तस्मिन् उत्पन्ने ये सिद्धा ते तीर्थसिद्धाः

For Private and Personal Use Only

तथा तीर्थस्याभावो तीर्थं तीर्थस्याभावश्चानुत्पादो अपांतराले व्यवच्छेदो वा तस्मिन् ये सिद्धा स्ते तीर्थसिद्धाः तत्रातीर्थस्यानुत्पादे सिद्धा मरुदेवी प्रभृतयः न हि मरुदेव्यादि सिद्धगमनकाले तीर्थमुत्पन्नमासीत् तथा तीर्थस्य व्यवच्छेदश्चन्द्रप्रभस्वामिसुविधिस्वाम्यपांतराले तत्र ये जातिस्मरणादिनाऽप वर्गमवाप्य सिद्धास्ते तीर्थः व्यवच्छेदसिद्धास्तथातीर्थंकरा सन्तो ये सिद्धास्ते तीर्थकरसिद्धाः अतीर्थंकरसिद्धा अन्ये सामान्यकेवलिनः तथा स्वयं बुद्धा संतो ये सिद्धास्ते स्वयं बुद्धसिद्धाः प्रत्येकबुद्धाः संतो ये सिद्धास्ते प्रत्येकबुद्धसिद्धाः अथ स्वयं बुद्धः प्रत्येकबुद्धानां कः प्रतिविशेषः उच्यते बोध्युपधिश्रुतलिंगकृतो विशेषः तथा हि स्वयं बुद्धा बाह्यप्रत्ययमन्तरेणैव बुध्यन्ते स्वयमेव बाह्यप्रत्ययमन्तरेणैव निजजातिस्मरणादिना बुद्धाः स्वयं बुद्धा इति व्युत्पत्तेः ते च द्विधा तीर्थकरातीर्थकरव्यतिरिक्ताश्च इह तीर्थकर व्यतिरिक्तैरधिकारः आह च चूर्णिकृत् ते दुविहातित्थयरवइरित्तावा इहयइरित्तेहिं अहिगारो इति प्रत्येक बुद्धास्तु बाह्यप्रत्ययमपेक्ष्य बुद्ध्यन्ते प्रत्येकं बाह्यं वृषभादिकं कारणमभिसमीक्ष्य बुद्धा प्रत्येकबुद्धाः इति व्युत्पत्तेः तथा च श्रूयते बाह्यवृषभादिप्रत्ययसापेक्ष्य करकंड्वादीनां बोधिः बहिः प्रत्ययमपेक्ष्य बुद्धाः संतो नियमतः प्रत्येकमेव विहरंति नगच्छवासिनइव संहताः आह च चूर्णिकृत् पत्तेयं बाह्यं वृषभादिकारणमभिसमीक्ष्य बुद्धाः प्रत्येकबुद्धा बहिःप्रत्ययप्रति बुद्धानां च पत्तेयं नियमाविहारो जम्हाय तम्हायते पत्तेयबुद्धा इति तथा स्वयंबुद्धा

मूल अतित्थसिद्धा १ तित्थयर सिद्धा३ अतित्थयरसिद्धा४ सयंबुद्धसिद्धा५ पत्तेयबुद्धसिद्धा६ बुद्धबोहियसिद्धा७ इत्थिलिंग

भाषा गणधरऋषभसेन गौतम स्वामी आदि प्रभृत सीद्ध सिद्धपणु पाम्या सर्वकार्यसिद्ध ऊआ ते तीर्थ सिद्ध १ अति० तीर्थकरने आंतरे साधुनाविरहने विषे विरह आठ मानव मासिद्धने वारे तिहां जातिस्मरणादिके करी सिद्धा तथा तीर्थ प्रवर्त्या विना सिद्धा ते अतीर्थसिद्धा मरुदेव्यावत् ति० जे पूर्वोक्तरूप

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



तीर्थनाकरणहार स्थापणहार ते तीर्थंकरसिद्धा ते ऋषभादिकवत सर्वजाणवा ३ अति० जे सामान्य केवली छता गोतमादिकनी परिसिद्धा ते तीर्थंकर सिद्धा स० स्वयमेव ते पोतेज जातिस्मरणादिक ज्ञानकरीने तत्वना जाण थयाते स्वयं बुद्धसिद्धा कहीये इहां स्वयंबुद्ध अने प्रत्येकबुद्धनुं फेर काहेछे बोधि १ उपधि २ स्रुत ३ लिंग ४ एहवो विशेष छइ ते स्वयं बुद्धनावे भेदतीर्थंकर १ अतीर्थंकर२ जे अतीर्थंकर स्वयं बुद्ध ते वाह्यना निमित्त देखे ते वैराग्यनो विणादीट्ठे बुझे १ प्रत्येकबुद्धकरकंडू आदिकनी परिवाहिरली वस्तु दीट्ठे बुझे ते स्वयं बद्धने उपधिना १२ उपगरण राखिवा पत्तं १ पत्ताबंधो २ पायट्ठवणंच३ पायकेसरिया ४ पडलाइ यरयत्ताणा ६ गोच्छउ ७ पायनिज्जोगो ८ तिणे वपछाग१० रयहरणं ११ चेव होंति सुहपती १२ उपगरणाराखीवा १ ते प्रत्येक बुद्धिने एकलोज विचरवुं छइ ते प्रत्येक बुद्धिना उपधिना भेद जघन्य उत्कृष्टा २ ते जघन्य २ उपगरण ते रजो हरणो १ सुहपती २ उत्कृष्टा९ उपगरणतेजे ३ तीचादि ३ वर्जीने विशेष९ उपगरण लेवा ते सातपात्राना ७ रजो हरणो १ सुहपती २ सर्वउपगरण ९ स्वयं बुद्धना कह्या ते १२ हवे स्वयं बुद्धने पूर्वे सूत्रभणवानो नियमनथीजे सुतभणीयो छइ तथा न छइ १ प्रत्येकबुद्धि पूर्वे नियम सुतभणीइ छइ ते जघन्य ११ अंग उत्कृष्टा किंचित्ऊणां १० पूर्वभण्यां सांभरे लिंग० स्वयं बुद्धने देवता पणि लिंगदेवे तथा आचार्यनी समीपे पणिलिंगपडिवजे अने जे सूत्र भण्युं छइं समर्थाइ हवे तो एकाकी विचरे अने जे सूत्रनी सरादिकनी समर्थी इन हवे तो गच्छमाहिवसे गुरा कन्हे रहे प्रत्येक बुद्धिने तो निश्चय देवता इज भेष आपे एकांकी रहे अग्रे सूत्र लिख्यते १।२ प० जे एक काइं एक वृषभादिक वस्तु देखीने अनित्यभावनादिक कारण तेहवे प्रतीती बुझ्या तेहने प्रत्येकबुद्धसीद्धाक हीये ६ बु० जे आचार्यादिके प्रतिबोधिया छता जे सिद्धा ते बुद्धबोधितसिद्धा ७ इ० स्त्रीपणा स्त्रीनो चिह्न छइ ते स्त्रीवेदने सीझे भावस्त्रीने सीझे द्रव्य अवेदी सीझे तथा पुरुषें स्त्रीनो वेस कीधो छइ जे स्त्रीलिंग सिद्धा ८ पु० भावपुरुष सीझे ९ न० नपुंसक जन्मतो सीझे नही पुरुषकृत नपुंसक

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



नामुपधिर्द्वादशविध एव पात्रादिकः प्रत्येकबुद्धानां तु द्विधा जघन्यत उत्कर्षतश्च तत्र जघन्यतो द्विविध उत्कर्षतो नवविधः प्रावरणवर्ज्जः आह च चूर्णिकृत पत्तेयबुद्धाणं जहन्नेणं दुविहो उक्कोसेणं नवविहो नियमा पाउरणं वज्जो भवे तथा स्वयंबुद्धानां पूर्वाधीतं श्रुतं भवति वा न वा यदि भवति ततो लिंगं देवता वा प्रयच्छति गुरुसन्निधौ वा गत्वा प्रतिपद्यते यदि चैकाकी विहरणसमर्थः इच्छा च तस्य तथा रूपा जायते तत एकाकी विहरत्यन्यथा गच्छवासे अवतिष्ठते अथ पूर्वाधीतं श्रुतं न भवति तर्हि नियमाद्गुरुसन्निधौ गत्वा लिंगं प्रतिपद्यते गच्छं चावश्यं न मुञ्चति उक्तं च चूर्णिकृता पुव्वाधीतं से सुयं भवइ वा नवा जइ से नत्थितो लिंगं नियमा गुरुसन्निहे पडिवज्जइ गच्छे य विहरइत्ति अहवा पुव्वाधीतसुयसंभवो अत्थितो से लिंगं देवयाए पयच्छइ गुरुसन्निधौ वा पडिवज्जइ जइ य एगविहारविहरणजोगो इच्छा वा से तो एक्कोवि विहरइ अन्नहा गच्छे विहरइति प्रत्येकबुद्धानां तु पूर्वाधीतं श्रुतं नियमतो भवति तच्च जघन्यत एकादशांगानि उत्कर्षतः किञ्चिन्न्यूनानि दशपूर्वाणि तथा लिङ्गं तस्मै देवता प्रयच्छति लिंगरहितो वा कदाचिद्भवति तथा चाह चूर्णिकृत् पत्तेयबुद्धाणं पुव्वाधीतं सुयं नियमा भवइ जहन्नेणं एक्कारस अंगा उक्कोसेणं भिन्नदसपुव्वा लिंगं च से देवया पयच्छइ लिंगवज्जिओ वा भवति यतो भणियं कप्पं पत्तेयबुद्धा इति तथा बुद्धा आचार्यास्तैर्बोधिताः सन्तो ये सिद्धास्ते बुद्धबोधितसिद्धाः एते च सर्वेऽपि केचित् स्त्रीलिंगसिद्धाः स्त्रिया लिंगं स्त्रीलिङ्गं स्त्रीत्वस्योपलक्षणमिति अर्थः तच्च त्रिधा तद्यथा वेदशरीरनिर्वृत्तिर्नेपथ्यं च तदेह शरीरनिर्वृत्त्या प्रयोजनं न वेदनेपथ्याभ्यां वेदे सति सिद्धत्वाभावान्नेपथ्यस्याप्रमाणत्वात् आह च चूर्णिकृत् इत्थीए लिंगं इत्थिलिंगं इत्थीए उवलक्खणंति वुत्तं भवति तं च तिविहं वेदो सरीरनिव्वत्ती नेवत्थं वा इह सरीरनिव्वत्तीए अहिगारो न वेयनेवत्थेहिंति तस्मिन् स्त्रीलिङ्गे वर्त्तमानाः सन्तो ये सिद्धास्ते स्त्रीलिंगसिद्धाः एतेन यदा कुराणां नरा न स्त्रीणां निर्वाणमिति तदपास्तं द्रष्टव्यं स्त्रीनिर्वाणस्य साक्षादनेन सूत्रेणाभिधानात् तत्प्रतिषेधस्य युक्त्यनुपपन्नत्वात्तथा हि मुक्तिपथो ज्ञानदर्शनचारित्राणि सम्यग्दर्शनज्ञानचारित्राणि

For Private and Personal Use Only

मोक्षमार्ग इति वचनात् सम्यग्दर्शनादीनि च पुरुषाणामिव स्त्रीणामपि अविकलानि तथाहि दृश्यन्ते स्त्रियोपि सकलमपि प्रवचनार्थमभिरोचयमाना जानते च षडावश्यककालिकोत्कालिकादि भेदभिन्नं श्रुतं परिपालयंति च सप्तदशविधमकलंकं संयमं धारयन्ति च देवासुराणामपि दुर्धरं ब्रह्मचर्यं तप्यन्ते च तपांसि मासक्षपणादीनि ततः कथमिवतासां नमो क्षसंभवः स्यादेतदस्ति स्त्रीणां सम्यग्दर्शनं ज्ञानं चनपुनश्चारित्रं संयमाभावात्तथा हि स्त्रीणामवश्यं वस्त्रपरिभोगेन भवितव्यमन्यथा विवृतायस्तास्तिर्यग्वृव पुरुषाणामभिभवति वा भवेयुः लोकेच गर्होपजायते ततोवश्यं ताभिर्वस्त्रपरिभोक्तव्यं वस्त्रपरिभोगे च सपरिग्रहता सपरिग्रहत्वे च संयमाभाव इति तदसमीचीनं सम्यक् सिद्धांता परिज्ञानात्परिग्रहादि परमार्थतो मूर्च्छाभिधीयते मुच्छापरिग्गहो वुत्तो इति वचनप्रमाण्यात् तथा हि मूर्च्छारहितो भरतचक्रवर्त्ती सांतःपुरोप्यादर्शकगृहेऽवतिष्ठमानोनिः परिग्रहो गीयते अन्यथा केवलोत्पादासम्भवात् अपि च यदि मूर्च्छाया अभावेपि वस्त्रसंसर्गमात्रं परिग्रहो भवेत् ततो जिनकल्पप्रतिपन्नस्य कस्यचित् साधोस्तुषारकणानुषक्ते पतति शीते केनाप्यविपस्त्रोपनिपातमद्यशीतमिति विभाव्यधर्मार्थिना शिरसि वस्त्रे तस्य स परिग्रहता भवेत्तस्मान्नसंसर्गमात्रं परिग्रहः किन्तु मूर्च्छा सा च स्त्रीणां वस्त्रादिषु न विद्यते धर्मोपकरणमात्र तया तस्योपादानात् न खलु तावद्वस्त्रमन्तरेणात्मानं रक्षितुमीशतेनापि शीतकालादिष्वर्वाग्दशावां स्वाध्यायादिकं कर्तुं ततोदीर्घतरसंयमपरिपालनाययतनयावस्त्रं परिभुंजानानताःपरिग्रहवत्यः अथोच्येतसंभवति नामस्त्रीणामपि सम्यग्दर्शनादिकं रत्नत्रयं परं न तत् संभवमात्रेण मुक्तिपदप्रापकं भवति किंतु प्रकर्षप्राप्तमन्यथादीक्षानन्तरमेव सर्वेषामप्यविशेषेण मुक्तिपदप्राप्तिप्रसक्तेः सम्यग्दर्शनादिरत्नत्रयप्रकर्षश्च स्त्रीणामसंभवीततो न निर्वाणमिति तदप्ययुक्तं स्त्रीषु रत्नत्रयप्रकर्षासम्भव ग्राहकस्यप्रमाणस्याभावात् नचखलुसकलदेशकालव्याप्त्या स्त्रीषु रत्नत्रयप्रकर्षा सम्भवग्राहकं प्रत्यक्षमनुमानं वा प्रमाणं विजृम्भते देशकालविप्रकृष्टतया तत्र प्रत्यक्षस्याप्रवृत्तेस्तदप्रमाणवृत्तौ चानुमानस्याप्यसंभवात् नापिताश्च रत्नत्रयप्रकर्षासंभव

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



प्रतिपादक: कोप्यागमो विद्यते प्रत्युतसंभवप्रतिपादक: स्थाने२ स्थानेसियथा इदमेव प्रस्तुतं सूत्रं ततो न तासां रत्नत्रयप्रकर्षो सम्भवोऽवमन्येथा स्वभाव तएवातपेमेवच्छायाविरुध्यते स्त्रीत्वेरत्नत्रयप्रकर्षस्ततसादसंभवोनुमीयते तदयुक्तं युक्तिविरोधात् तथाहि रत्नत्रयप्रकर्ष: स उच्यते यतोनन्तरं मुक्तिपदप्राप्ति: सचायोग्यवस्थाचरमसमये अयोग्यवस्थाचास्माद्दृशामप्रत्यक्षत: कथं विरोध गति: नहि अदृष्टेनसह विरोध: प्रतिपत्तुं शक्यतेमाप्रापत्पुरुषेष्वप्यप्रसङ्ग: ननु जगति सर्वोत्कृष्टपदप्राप्ति: सर्वोत्कृष्टेनाध्यवसायेनाऽवाप्यते नान्यथा एतच्चोभयोरप्यावयोरागमप्रामाण्यबलत: सिद्धं सर्वोत्कृष्टे च द्वे पदेसर्वोत्कृष्टं दु:खस्थानं सर्वोत्कृष्टं सुखस्थानंच तत्र सर्वोत्कृष्टदु:खस्थानं सप्तमनरकपृथिवीअत: परंपरमदु:खस्थानस्याभावात्सर्वोत्कृष्टसुखस्थाने तु निश्रेयसं तत: परमन्यस्य सुखस्थानस्या सम्भवात्तत: स्त्रीणांसप्तमनरकपृथिवी गमनमागमेननिषिद्धं निषेधस्यच कारणं तद्गमनयोग्यतथा विधसर्वोत्कृष्टमनोवीर्यपरिणत्य भाव: तत: सप्तमपृथिवीगमननिषेधादवसीयते नास्ति स्त्रीणां निर्वाणं निर्वाण हेतो स्तथा रूपसर्वोत्कृष्टमनोवीर्यपरिणामस्या सम्भवात् तथाचात्र प्रयोग: असंभवनिर्वाणं स्त्रिय: सप्तमपृथिवीगमनवत्वाभावात् सन्मूर्च्छिमादिवत् तदेतदयुक्तं ततो यदि नाम स्त्रीणां सप्तमनरकपृथिवीगमनं प्रतिसर्वोत्कृष्टमनो वीर्यपरणात्यभावस्तत एतावता कथमवसीयते नि:श्रेयसमपि प्रति तासां सर्वोत्कृष्टमनोवीर्यपरिणात्य भावो नहि यो भूमिकर्षणादिकं कर्मकर्तुं न शक्नोति स शास्त्राणामप्यवगाढं न शक्नोतीति प्रत्येतु शक्यं प्रत्यक्षविरोधात् अथसन्मूर्च्छिमादिषू भयमपि प्रति सर्वोत्कृष्टमनोवीर्य परिणत्यभावो दृष्टस्ततोत्रा प्यवसीयते ननु यदि तत्र दृष्टस्तर्हि कथमत्रावसीयते न खलु वह्निव्याप्तिमात्रेण हेतुर्गमको भवति किंत्वं तद्व्याप्या अंतरव्याप्तिश्चप्रतिबन्धबलेन सिध्यति न चात्र प्रतिबन्धो विद्यतेनखलु सप्तमपृथिवीगमनं निर्वाणगमनस्य कारणं नाप्येवमत्राविभावप्रतिबन्धत: सप्तमपृथिवीगमनाभाविनिर्वाणगमनचरमशरीराणां सप्तमपृथिवीगमनमंतरेणैव निर्वाणगमनाभावात् नच प्रतिबन्धमन्तरेण एकास्याभावेन्ययाभावो माप्रापद्यस्यकस्य वा कस्यचिदेकस्याभावे सर्वस्याभाव



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



प्रसङ्गःयद्येवं तर्हि कथं सम्मूर्च्छिमादिषु निर्वाणगमनाभाव इति उच्यते यथा भवस्वाभाव्यात्तथाहि ते संमूर्च्छिमादयो भवस्वभावात् एवन सम्यग् दर्श
पान्नवपदार्थान् परिपाट्यापट्टिकादौ विरचय्यजीवपदार्थस्याधः स्वपरभेदावुपन्यसनीयो तयोरधोनित्यानित्यभेदौ तयोरप्यधःकालेश्वरात्मनियतिस्वभाव भेदापंचन्यसनीया पुनश्चैवं विकल्पाः कर्त्तव्याः तद्यथा अस्ति जीवः स्वतोनित्यः कालतइत्येको विकल्पः अस्य च विकल्पस्यायमर्थः विद्यते खल्वयमात्मास्वेन रूपेण नित्यश्चकालतः कालवादिनोमते कालवादिनश्च नामते मन्तव्याये कालकृतमेव सर्वं जगन्मन्यन्ते तथाच ते आहुर्नकालमन्तरेण पंचकाशोक सह कारादिवनस्पति कुसुमोद्गमफलावंभादयो हिमकणानुषक्तशीतप्रपातनक्षत्रगर्भाधानवर्षादयो वा ऋतुविभागसम्पादिता बालकुमारयौवनवलपलितागमा दयो वावस्थाविशेषाघटं ते प्रतिनियतकालविभाग एव तेषामुपलभ्यमानत्वात् अन्यथा सर्वमव्यवस्थावा भवेत् नचैतत् दृष्टमिष्टं वा अपि च मुद्गपंक्तिरपिन कालमन्तरेण लोके भवतीदृश्यते किन्तु कालक्रमेण अन्यथास्थालीं धनादिसामग्रीसंपर्कसंभवे प्रथमसमयेपि तस्याभावप्रसङ्गो नच भवति तस्मात् यतक्र

सूत्र राशीईए अकिरियावाईणं सत्तसट्ठीए अणाणियवाईणं बत्तीसाएवेणइ वाईणं तिण्हं तेसट्ठाणंपासंडीयसयाणं बूहंकि

भाषा वीसभेदजाणवा एवंपूर्वपरथई १८० क्रियावादीनाभेदइ अ० चोरासीमत८४ अ० जीवने क्रिया पुन्यपापरूपनथी जागतां एहवोवोलेतेअक्रियावादी एतले नास्तिकमती८४ भेदते जीवसहजइ पुन्यपापवर्जीने७ पदार्थ१ स० ६७ मत अ० आत्माने अज्ञानपणोते श्रेयएहवो जेवदेज्ञानभण्या अहंकार आवेकर्मबंध उपजेअभिनिवेसपणु आवेविवादकरे संसारमेतेभणी ज्ञाननथीइ तथानवपदार्थ उपरिसात२ मेभेदे१ असत् २ सदसत३ अव्यक्तव्यसदवक्तव्य५ असदवक्तव्य७ असतीभावोत्पति२ सदसतीभावोत्पति व० मनुष्यपशुपंखी सहुनोविनयकरवो जे एहवोवदेते विनयवादी तेहनां३२ भेदके तेकि स्वासुर१ नृप२ यती ग्यांन४ स्थिवर५ धम६ मात७ पिता८ आठनोविनयकरेमनवचने२ काये३ दान४ एवंसर्वमत३२ जाणवा ति० तिणसे तसहिअधिक अन्यदर्शनीपाखंडी

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



तकं तत्सर्वं कालकृतमिति तथाचोक्तं न कालव्यतिरेकेण गर्भबालशुभादिकं यत्किंचिज्जायते लोके तदसौ कारणं किल किंच कालादृश्यतेनैवमुक्तपंक्तौद
पीष्यते स्थाल्यादिसन्निधानेपि ततः कालादसौ मताकालाभावे च गर्भादिसर्वं स्यादव्यवस्थाया परेष्टहेतु सद्भावमात्रादेव तदुद्भवात् कालः पचतिभूता
निकालः संहरति प्रजाः कालः सुप्तेषु जागर्त्ति कालोहि दुरतिक्रमः अथ परेष्टहेतुसद्भावमात्रादिति पराभिमतवनिता पुरुषसंयोगादिमात्ररूपहेतुस
भावमात्रादेव तदुद्भवा इति गर्भाद्युद्भवप्रसंगादिति तथाकालः पचतिपरिपाकं नयति परिणतिं नयतिभूतानि पृथिव्यादीनि तथाकालः संहरति प्रजाः
पूर्वपर्यायात् प्रच्याव्यपर्यायांतरेण प्रजालोकानि स्थापयति तथाकालः सुप्तेषु जनेषु जागर्त्ति काल एवतंतं सुप्तं जनमापदोरक्षतीति भावः तस्मात्हिस्फुटं
दुरतिक्रमोपाकर्तुमशक्यः कालइति उक्तेनैव प्रकारेण द्वितीयोपि विकल्पोवक्तव्यो नवरं कालवादिन इति वक्तव्ये ईश्वरवादिन इति वक्तव्यं तद्यथा
अस्ति जीवः स्वतो नित्यईश्वरतः ईश्वरवादिनश्च सर्वजगदीश्वर कृतं मन्यंते ईश्वरं च सह सिद्धज्ञान वैराग्य धर्मैश्वर्यरूपं चतुष्टयं प्राणिनांच
स्वर्गापवर्गयो प्रेरकमिति तदुक्तं ज्ञानमप्रतिघंयस्य वैराग्यंच जगत्पते ऐश्वर्यंचैव धर्मश्च सहसिद्धंच तुष्टयंअन्यो जन्तुरनीशोयमात्मनः सुखदुःखयोः
ईश्वरप्रेरितो गच्छेत् स्वर्गंवाश्व भ्रमेव वा इत्यादि एवं तृतीयो विकल्प आत्मवादिनां आत्मवादिनो नामपुरुष एवेदं सर्वमित्यादि प्रतिपन्नाः
चतुर्थो विकल्पो नियतिवादिनां तेह्येवमाहु र्नियतिर्नामतत्वांतरमस्ति यद्वशादेते भावाः सर्वेपि नियतेनैव रूपेणप्रादुर्भावमश्नुवते नान्यथा तथाहि यत्
यदायतो भवति तत्तदा ततएव नियतेनैवरूपेण भवदुपलभ्यते अन्यथा कार्यं कारणभावव्यवस्था प्रतिनियतरूपा व्यवस्थाचन भवेत् नियामकाभावात्
ततः एवं कार्यनैयत्यतः प्रतीयमानामेता नियतिं कोनामप्रमाणकुशलो बाधितुं क्षमते माभापदन्यत्रापि प्रमाणपद्व्याघात प्रसंगः तथाचोक्तं नियतेनै
नैवरूपेण सर्वभावा भवन्ति ततो नियतिजायते तत्स्वरूपानुवेधतः यत् यदैव यतो यावतश्च दैवततस्तथा नियतं जायते न्यायात् कएनां बाधितुं क्षमः

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



पञ्चमो विकल्पः स्वभाववादिनां तेहि स्वभाववादिन एवमाहुः इह सर्वेभावा स्वभाववशादुपजायंते तथाहि मृदः कुंभो भवति न पटादितन्तुभ्योपि पट उपजाय तेन कुंभादि एतच्च प्रतिनियतं भवनं न तथा स्वभावता मन्तरेण घटासंटङ्कमाटी कते तस्मात् सकलमिदंस्वभावकृतमवसेयं अपि चास्तामन्यत् कार्यंजातमिह मुद्गपंक्तिरपि न स्वभावमन्तरेण भवितु मर्हति तथाहि स्थालीं धनकालादिसामग्री संभवेपि न कांकटुकमुद्गानां पंक्तिरुपलभ्यते तस्माद्यद्भावे भवति यदभावे च न भवन्ति तत्तदन्वयव्यतिरेकानुविधायितत्कृतमिति स्वभावकृतामुद्गपंक्तिरप्येष्टव्या ततः सकलमेवेदं वस्तुजातं स्वभाव हेतुकमेव सेयमिति ततः एवं स्वतः इतिपदेन लब्धाः पञ्चविकल्पाः एवं परतइत्यनेनापि पञ्चलभ्यंते परत इति परेभ्यो व्यावृत्तेन रूपेण विद्युते खल्वयमात्मेत्यर्थः एवं नित्यत्वा परित्यागेन दश विकल्पा लब्धाः एव मनित्य पदेनापि दश सर्वेपि मिलिताविंशतिः एते च जीव पदार्थेन लब्धाः एवम जीवादिष्वप्यष्टषु पदार्थेषु प्रत्येकं विंशतिविकल्पा लभ्यन्ते ततो विंशतिर्नवगुणिता शतशीत्युत्तरं क्रियावादिनां भवति तथा न कस्यचित् प्रतिक्षण मनवस्थितस्य पदार्थस्य क्रियासम्भवति उत्पत्त्यनं तरमेव विनाशात् इत्येवं ये वदन्तिते अक्रियावादिनः तथाचाहुरेकेक्षणेकाः सर्वेपि संस्कारा अस्थिराणांकुतः क्रियाभूतिर्येषां क्रियासैवकारकं सैवचोच्यते एतेचात्मादि नास्तित्व प्रतिपत्ति लक्षणा अमुनोपायेन चतुरशीति संख्या द्रष्टव्या पुण्यापुण्य वर्जित शेष जीवाजीवादि पदार्थ सप्तकन्यासस्तथैव च जीवादि सप्तकस्याधः प्रत्येकं स्वपरविकल्पोपादानं असत्वादात्मनो नित्यानित्यविकल्पौनस्तः कालादीनाञ्च पञ्चानामधस्तात्षष्ठी यदृच्छान्यस्यते इह यदृच्छावादिनः सर्वेप्य क्रियावादिन एव केचिदपि क्रियावादिनस्ततः प्राक्यदृच्छानोपन्यस्ता ततः एवं विकल्पाभिलापः नास्तिजीवः स्वतः कालतइति इत्येकोविकल्पः एवमीश्वरादिभिरपि यदृच्छापर्यंतिः सर्वेमिलिताः षट्विकल्पाः अमीषांच विकल्पानामर्थः प्राग्वद्भावनीयः न वरं यदृच्छावादिनां मते अथकेते यदृच्छावादिन उच्यते इह ये भावानां सन्तानापेक्षयान प्रतिनियतं कार्यकारण भावमिच्छन्ति किन्तु यदृच्छायाते यदृच्छावादि

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



नस्तथाच ते एवमाहुर्नखलु प्रतिनियतो वस्तुनां कार्यकारण भावस्तथा प्रमाणेनाग्रहणात्तथाहि शालूकादपि जायते शालूको गोमयादपि वन्हिरूपजायन्ते अरणिकाष्ठादपि धूमादपि जायते धूमोग्नौ धनसम्पर्कादपि कंदादपि जायते कदली बीजादपि वटादयोबीजाद्रुम जायन्ते शाखैक देशादपि ततो न प्रति नियत: क्वचिदपि कार्यकारणभाव इति यदृच्छात: क्वचित्किंचिद्भवतीति प्रतिपत्यव्यं न खल्वन्यथा वस्तुसद्भावं पश्यन्तोन्यथात्मानं प्रेच्चावन्त: परिक्लेशयंतीति यथाचस्वत: षट् विकल्पा लब्धास्तथा नास्तिपरत: कालतश्चत्येवमपि षट्विकल्पालभ्यन्ते सर्वेपिमिलिता: द्वादशविकल्पाजीवपदेलब्धा: एवमजीवादिष्वपिषट् सुपदार्थेषु प्रत्येकं द्वादशविकल्पा लभ्यन्ते ततो द्वादशभि: सप्तगुणिताश्चतुरशीतिर्भवन्ति अक्रियावादिनां विकल्पा: तथा कुत्सितज्ञानम ज्ञानंतदेषामस्या स्तीति अज्ञानिका: अतोऽनेक स्वरादितिमत्वर्थीय इकप्रत्यय: अथवा अज्ञानेन चरंतीति अज्ञानिका: असंचिंत्यकृतं बन्धनै फलादि प्रतिपत्तिलक्षणास्त थाहि ते एव माहुर्नेज्ञानं श्रेयस्तस्मिन् सति परस्परं विवाद योगतश्चित्तकालुष्यादि भावतो दीर्घतर संसारप्रवृत्ते: तथाहि केनचित्पुरुषेणान्यथा देशिते सति वस्तुनि विवक्षितो ज्ञानीज्ञानगर्वाध्मात मानसस्तस्योपरिकलुष चित्तस्तेनसह विवाद मारभते विवादेच क्रियमाणेतीव्र तीव्रतर चित्तकालुष्यभावतोऽहंकारतश्च प्रभूततरा शुभकर्म्म बंधसंभव: तस्माच्च दीर्घतर: संसार: तथाचोक्तं अन्नेण अन्नहा देसियंमि भावंमि नाणगव्वेण कुणइविवायं कलुसियचित्तो तत्तोयसेबन्धो १ यदा पुनर्नज्ञानमाश्रीयते तदानाहंकारसम्भवो नापि परस्योपरि चित्तकालुष्यभावस्ततो न कर्मबंधसम्भव: अपिच सचित्तक्रियते कर्म्म र ंध: सदारुण विपाको अतएवचावश्यवेद्य: तस्य तीव्राध्यवसायतो निष्पन्नत्वात् यस्तुमनोव्यापार मंतरेण कायवाक् कर्म्म वृत्ति मात्रतोविधीयते न तत्रमन सोभिनिवेशस्ततो नासाववश्यवेद्योनापि तस्य दारुणविपाक: केवलमतिशुष्क सुधापङ्क धवलित भित्तिगत रजोमल इव स कर्मसङ्ग: स्वत एवशुभाध्यवसाय पवनविक्षोभितोऽपयाति मनसोभिनिवेशाभावश्च ज्ञानाभ्युपगमे समुपजायते ज्ञाने सत्यभिनिवेश सम्भवात् तस्मादज्ञानमेव मुमुक्षुणा मुक्तिपथ प्रवृत्तेना



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



भ्युपगन्तव्यं न ज्ञानमिति अन्यथाभवेत् यतोज्ञानस्याभ्युपगमो यदि ज्ञानस्य निश्चयः कर्त्तुंपार्येत: तावता स एव नपार्यते तथाहि सर्वेपिदर्शनिनः परस्परं भिन्नमेव ज्ञानं प्रतिपन्नास्ततोन निश्चयः कर्त्तुं शक्यते किमिदं ज्ञानंसम्यग्नेदमिति उक्तञ्च सर्व्वेयमिहो भिन्नंनाणं दूहनाणिणोजडवेन्ति तीरदूनतउक्काड विणिच्छउ एवमर्यंति अथोच्येत इडयत्सकल वस्तुस्तोम साक्षात्कारि भगवदुपदेशादुपजायते ज्ञानं तत्सम्यक्नेतरत् असर्वज्ञमूलत्वादिति सत्यमेतत् किन्तु स एव सकलवस्तुस्तोमसाक्षात्करोति कथं ज्ञायते तद्ग्राहक प्रमाणाभावात् अपिच सुगतादयोपिसौ गतादिभिः सकल वस्तुस्तोमसाक्षात्कारिणइष्यन्ते तत् किं सुगतादि सकलवस्तुस्तोमसाक्षात्करोति प्रतिपद्यतामस्माभिः किंवा भगवद्वर्द्धमान स्वामीति तदवस्थ एव निश्चयोभावः स्यादेतत्किमत्र संशयेन यस्य पदारविन्दयुगलं प्राणिगणं सर्वोदिवौकसः परस्पर मह्महमिकया विशिष्ट विशिष्टतर विभूतिद्युतिपरिकलिताः शतसहस्र संख्येन विमाननिवहे नसकलमपि नभोमण्डलमाच्छादयन्तो महामहतीर्यपूजादिकमातन्वतेस्म स भगवान् वर्द्धमान स्वामीसर्वज्ञोनशेषाः सुगतादयः मनुष्यादि मूढमनस्का अपि सम्भाव्यन्तेन देवास्ततो यदि शेषा अपि सुगतादयः सर्वज्ञा अभविष्यन् तर्हि तेषामपि देवाः पूजादेवाकरिष्यन् न च कृतवन्त स्तस्मान्न ते सर्वज्ञाः तदेतद्दर्शनानुराग तरलित मनस्कतासूचकं यतो वर्द्धमान स्वामिनोदेवः समागत्य देवास्तथा पूजाकृतवन्तः इत्येतदपि कथमवसीयतेभग वतश्चिरातीतत्वेनेदानीं तद्भाव ग्राहक प्रमाणाभावात् संप्रदायादवसीयते इति चेतनत्सोपि संप्रदायो धूर्त पुरुष प्रवर्त्तितः किंतुसत्पुरुषप्रवर्त्तित एवेति कथमव गंतव्यं तद्ग्राहक प्रमाणाभावात् न वा प्रमाणकं वयंप्रति पत्तुंक्षमामाप्रापद प्रेक्षावताप्रसङ्गः अन्यच्चमायाविनः स्वयम सर्वज्ञा अपि जगतिस्वस्य सर्वज्ञ भावं प्रविकटयिषवस्तथाविधेंद्रजालवशाद्दर्शयन्ति देवानितस्ततः सञ्चरतः स्वस्यच पूजादिकं कुर्वंतस्ततो देवागमदर्शनादपि कथं तस्य सर्वज्ञत्व निश्चयस्तथाचाह भावक एव स्तुतिकारसमंतभद्रः देवागमनभोयान चामरादि विभूतयः मायादिष्वपि दृश्यंतेनातस्त्वमसिनोमहान् भवतुवा वर्द्ध

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



मानस्वामी सर्वज्ञस्तथापि तस्य सत्कोयमाचारादिक उपदेशोन पुन: केनापि धूर्त्तेन स्वयं विरचय्य प्रवर्त्तित इतिकथमवसेयमतीन्द्रियत्वेन तद्विषये प्रमाणा भावात् अथवा भवत्वेषोपि निश्चयो यथाऽयमाचारादिक उपदेशो वर्द्धमानस्वामिन इति तथापि तस्योपदेशस्यायमर्थोनान्य इति न शक्य:प्रत्येतुं नानार्था हि शब्दालोके प्रवर्त्तन्ते तथादर्शनात् ततोन्यथाप्यर्थ सम्भावनायां कथं विवक्षितार्थ नियम निश्चय: अथमन्येथास्तदात्वेन त एवसर्वज्ञसाक्षात् श्रमणतो गौतमादिरर्थ नियम निश्चयोभूत् तत: आचार्यपरं पम्परयेदानीमपि भवतीति तदप्ययुक्तं यतोनाम गौतमादिरपिछद्मस्थ: छद्मस्थस्य च परचेतोवृत्तिर प्रत्यक्षा तस्या अतीन्द्रियत्वेन तद्विषये चक्षुरादीन्द्रिय प्रत्यक्ष प्रवृत्त रभावात् अप्रत्यक्षायां च सर्वज्ञस्य विवक्षायां कथमिदंज्ञायते एष सर्वज्ञस्याभिप्रायोऽनेन चाभिप्रायेण शब्द: प्रयुक्तोनाभिप्रायांतरेण तत एवं सम्यक्परिज्ञाना भावात् या मेव वर्णावली मुक्तवान् भगवान् ता मेव केवलां घटतोलग्नो गौतमादिरभिभाष्यन्ते न पुन: परमार्थ तस्तस्योपदेशस्यार्थमवबुध्यते यथार्थदेशोत्पन्नोक्तस्याऽनुवादकोऽपरिज्ञात शब्दार्थोम्लेछ: उक्तञ्च मिलक्खु अमिलक्खुस्सजहावुत्ताणु भास ए नहेउ सेवियाबाइ भासियंतणुभासए १ एव मन्नाणियानाणं वयंताभासियं सयं मिक्कयत्थं नयाणंतिमिलक्खुव्वअबोहि ए तदेवं दीर्घ तरसंसार कारणत्वात्सम्यग् निश्चयाभावाच्चनज्ञानंश्रेय: किंत्वज्ञानमेवेति स्थितं ते चाज्ञानिका: सप्तषष्ठि संख्या: अमुनोपायेन प्रतिपत्तव्या इह जीवाजीवादीन् नव पदार्थान् क्वचित्पट्टिकादौ व्यवस्थापयंन्त उत्पत्ति: स्थाप्यते तेषां जीवादीनां न वानां पदार्थानां प्रत्येकमध: सप्तसत्वादयोन्यस्य ते तद्यथासत्वं असत्वं सदसत्वं अवाच्यत्वं सदवाच्यत्व मसदवाच्यत्वं सदसद वाच्यत्व वेति तत्र सत्वं स्वरूपेण विद्यमानत्वं असत्वं पररूपेणाविद्यमानत्वं सदसत्वं स्वरूपपररूपाभ्यां विद्यमाना विद्यमानत्वं तत्र यद्यपि सर्वं वस्तु स्वरूप पररूपाभ्यां सर्वदैव स्वभावत एव सदसत् तथापि क्वचित् किञ्चित् कदाचिदुद्भूतं मात्राविवच्यते: तत: एवं त्रयोविकल्पा भवन्ति तथा तदेवसत्वमसत्वञ्च यदा युगपदे केन शब्देन वक्तुमिष्यते तदा तद्वाचक: शब्द: कोपि न विद्यते इति अवाच्यत्वं

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



एतेचत्वारोपि विकल्पा: सकलादेशाइति गीयंते सकल वस्तुविषयत्वात् यदात्वेकोभाग: सन्नपरश्चा वाच्यो युगपद्विवक्ष्यते तदासदवाच्यत्वं यदात्वेकोभागोऽ सन्नपरश्चा वाच्यस्तदा असदवाच्यत्वं यदातु एकोभाग: सन्नपरश्चासन् अपरतरश्चा वाच्यस्तदासदसदवाच्यत्व मितिनचैतेभ्य: सप्तविकल्पेभ्यो अन्योविकल्प: सम्भवति सर्वस्यैतेष्वेव मध्यंतर्भावात् तत: सप्तविकल्पाउपन्यस्ता: सप्तनवभिर्गुणिता जातास्त्रिषष्ठि: उत्पत्ते श्चत्वार एवाद्याविकल्पा: तद्यथा सत्वसदसत्वम वाच्यत्वंचेति सदसत्ववाच्यत्वं एते चत्वारोपि विकल्पास्त्रि षष्टिमध्ये प्रक्षिप्यते तत: सप्तषष्टि भवन्ति तत्रकोजानाति जीव: सन्नित्यको विकल्पोन कश्चिदपि जानाति तद्ग्राहक प्रमाणाभावादिति भाव: ज्ञानेन वा किं तेन प्रयोजनं ज्ञानस्याभिनिवेश हेतु तया लोक प्रतिपंथित्वात् एवम सदादयोपि विकल्पा भावनीया: उत्पत्तिरपि किं सतो असत: सदासतो अवाच्यस्यवेतिको जानाति ज्ञानेन वा किञ्चिदपि प्रयोजनमिति तथा विनयेन चरन्तीति वैनयिका: एतेचाऽनवष्टते लिंगाचार शास्त्राविनय प्रतिपत्ति लक्षणावेदितव्या: ते च द्वात्रिंशत्संख्या अमुनोपायेन द्रष्टव्या: सुरनृपतियति ज्ञाति स्थविराधर्म मातृ पितृरूपेष्वष्ट सुस्थानेषु कायेन वा चामनसा दानेन च देश कालोपपन्नेन विनय: कार्य: इति चत्वार: कायादय: स्थाप्यन्ते चत्वारिश्चाष्टभिर्गुणिताजाता द्वात्रिंशत एतेषां च त्रयाणां त्रिषष्ट्यधिकानां पाषण्डिक शतानां प्रतिक्षेप: सूत्रकृतांगे शेषेषु पूर्वाचार्यैरनेकधायुक्तिभि: कृतस्ततोवयमपि स्थाना शून्यार्थं तेषां पूर्वाचार्यकृतं प्रतिक्षेपं संक्षेपतो दर्शयाम: तत्रये कालवादिन: सर्वकालकृतं मन्यंतेताम् प्रतिब्रूम: कालोनामकि मेक स्वाभावो नित्योव्यापी किंवा समयादि रूपतयापरिणामी तत्र यद्याद्य:पक्षस्तदयुक्तं तथा भूतकालग्राहक प्रमाणाभावात् नह्यलु तथा भूतं कालं प्रत्यक्षेणोपलभ्यामहे नाप्यनुमानेन तदविनाभावि लिङ्गाभावात् अथ कथं तदविनाभाविलिङ्गाभावोयावताहश्यते भरत रामादिषु पूर्वापर व्यवहार: स च नवस्तु स्वरूपमात्र निमित्तोवर्त्तमाने चकाले वस्तुस्वरूपस्य विद्यमान तया तथा व्यवहार प्रवृत्ति प्रसक्ते: ततोयन्निमित्तोयं भरत रामादिषु पूर्वापर व्यवहार: स काल इति तथाहि

पूर्वकालयोगी पूर्वोभरतचक्रवर्त्ती अपरकालयोगी वा परोरामादिरिति ननुयदि भरतरामादिषु पूर्वापरकालयोगतः परव्य वहारस्तर्हि कालस्यैवकथं स्वयं पूर्वापर व्यवहारस्तदन्य कालयोगादिति चेत् न तत्रापि स एव प्रसङ्गः इत्यनवस्था अथमाभूदेष दोष इति तस्य स्वयमेव पूर्वत्वमपरत्वंवेष्यते नान्यकालयोगादिति तथाचोक्तं पूर्वकालादि योगायः स पूर्वादिव्यपदेशभाक् पूर्वापरत्व तस्यापि स्वरूपादेव नान्यतः तदप्याकण्ठपीता सवप्रलाप देशीयं यतएकातेनैको व्यापिनित्यः कालोभ्युपगम्यते ततः कथं तस्य पूर्वादित्व सम्भवः अथ सहचारिसंपर्कवशादेकस्यापि तथात्वेकल्पना तथा सहचारिणो भरतादयः पूर्वा अपरेच रमादयोपरास्ततस्तत्संपर्कवशात्कालस्यापि पूर्वापरव्यपदेशो भवति २ सहचारिणो व्यपदेशो यथामञ्चाः क्रोशंती तितदेतदपि बालिशजल्पितमितरेतराश्रयदोषप्रसंगात् तथाहि सहचारिणां भरतादीनां पूर्वादित्वं कालगतपूर्वादित्वयोगात् कालस्य च पूर्वादित्वं सह चारि भरतादिगतपूर्वादित्वयोगतः ततः एकासिद्धावन्यतरस्याप्यसिद्धि उक्तंच एकत्वव्यापितायां हि पूर्वादित्वं कथं भवेत् सहचारिवशात्तच्चेदन्योन्याश्रयता गमः सहचारिणां हि पूर्व्वत्वं पूर्वकालसमागम त् कालस्य पूर्वादित्वं च सहचार्यवियोगतः प्रागसिद्धावेकस्य कथमन्यसिद्धिरिति तन्नायं पक्षः श्रेयान् अथ द्वितीयः पक्षः सोप्ययुक्तो यतः समयादिरूपे परिणामिनिकाले अविशिष्टोपि फलवैचित्रमुपलभ्यते तथाहि समयकालमारभ्यमाणापि मुद्गपंक्तिरविकला कस्यचित्दृश्यते अपरस्य तु स्थाल्यादिसंगतावेवविकला तथासमयकालमेकस्मिन्नेव राजनिसेव्यमान सेवकस्यैकस्य फलमचिराद्भवति अपरस्य तु कालां तरेपि न तथा समानेपि समकालमपि क्रियमाणे कृष्यादिकर्म्मण्यकस्य परिपूर्णधान्यसंपदुपजायते अपरस्य तु खण्डस्फुटितावान किञ्चिदपि ततो यदि कालएव केवलः कारणं भवेत् तर्हि सर्वेषामपि सममेव मुद्गपंक्त्यादिकं फलं भवेत् न च भवति तस्मान्नकालमात्रकृतं विश्ववैचित्र्यं किन्तु काला दिसामग्रीसापेक्षं तत्कर्मनिवन्धनमितिस्थितं यदपि चेश्वरवादिनोब्रुवते ईश्वरकृतं जगदिति तदप्यसमीचीनमीश्वरग्राहक प्रमाणाभावात् अथास्ति

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



तद्ग्राहकं प्रमाणमनुमानं तथाहि यत् स्थित्वा२भिमतफलसंपादनाय प्रवर्त्तते तत्बुद्धिमत्कारणाधिष्ठितं यथा वास्यादिर्छेदाकरणादौ प्रवर्त्तते च स्थित्वा स्थित्वा सकलमपि विश्वं स्वफलसाधनायेति न खलु वास्यादयः स्वयमेव प्रवर्त्तंते तेषामचेतनत्वात् स्वभावतएव चेत्प्रवर्त्तंते तर्हि सदैव तेषां प्रवर्त्तनं भवेत् नच भवति तस्मादवश्यं स्थित्वा स्थित्वा प्रवर्त्तनं केनचित्प्रेरावता प्रवर्त्तकेन भवितव्यं सकलस्यापि च जगतः स्थित्वा२ स्वफलं साधयतः प्रवर्त्तक ईश्वरएवोपपद्यते नान्यइतीश्वरसिद्धिः तथा अपरमनुमानं यत्परिमण्डल्यादिलक्षण संनिवेशविशेष भाक् तच्चेतनावत् कृतं परिमंडल्यादिलक्षणसन्निवेशविशेषभाक्च भभूधरादिकमिति तदेतदयुक्तं सिद्ध साधनेन पक्षस्य प्रतिकुलसंबंधत्वात् तथाहि सकलमपीदं विश्ववैचित्र्यं वयं कर्म्मनिबंधनमिच्छामोय तोमीवैताढ्यहिमवदादयः पर्वताभर तैरावतविदेहान्तर द्वीपादीनिचक्षेत्राणि तथाप्राणिनां सुखदुःखादि हेतुतयायत्परिणमंते तत्तथा तथापरिणमनेन तन्निवासिनामेव तेषां जंतूनां कर्म्मकारणमवसेयंनान्यत् तथाचहश्यंते एवंपुण्यवतिराज्य मनुशासति भूपतौतत्कर्म्मप्रभावतः सुभिक्षादयः प्रवर्त्तमानाः कर्म च जीवाश्रितं जीवाश्वबुद्धिमंतश्चेतनावत्वात् ततोबुद्धिमत्कारणाधिष्ठितत्वे चेतनावत् कृतत्वेचसाध्यमाने सिद्धसाधनं अथबुद्धिमान् चेतनावान्वा विशिष्टएवेश्वरः कश्चित्साध्यते तेन सिद्धसाधनं नहिदृष्टांतस्य साध्यविकल्पता वास्यादौच घटादौच ईश्वरस्याधिष्टाय कत्वेनकारणत्वेनवाच्या प्रियमाणस्या नुपलभ्यमानत्वात् वर्द्धकिकुंभकारादीनामिवतत्वान्वयतो व्यतिरेकतोवा व्याप्रियमाणानां निश्चीयमानत्वात् अथवार्द्धक्यादयोपि ईश्वरप्रेरिताएव तत्तर कर्म्मणि प्रवर्त्तंते नेनस्वतःस्वतो न दृष्टांतस्य साध्यविकलतानन्वेवं तदीश्वरोप्यन्येनश्वरेण प्रेरितः स्वकर्म्मणि प्रवर्त्तेतेन स्वतो विशेषाभावात् सोप्यन्येने श्वरेणप्रेरित इति त्रिकालसंख्यायांतमः संततिरिवा दृष्टपर्यन्ताध्यांध्यमापादयन्ती प्रसरत्यनवस्था अथ मन्येथावार्द्धक्यादि जन्तुः सर्वोपि स्वकर्मणाप्रस्ततः सप्रेरित इव स्वकर्म्मणि प्रवर्त्तते भगवांस्त्वीश्वरः सकलपदार्थज्ञाताततो नासौ स्वकर्मण्यन्यं स्वप्रेरकमपेक्षते तेननानवस्थात्तदप्यसत् इतरेतराश्रयदोष

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



प्रसंगात् तथाहि सकलपदार्थयथावस्थित स्वरूपज्ञातृत्वे सिद्धे सत्यन्याप्रेरितत्वसिद्धि अन्याप्रेरितत्वसिद्धौ च सकलजगत्कारणत: सर्वज्ञत्वसिद्धिरित्येकासि द्धावन्यतरस्याप्यसिद्धि: अपिच यद्यसौ सर्वज्ञो वीतरागश्च तत्किमर्थमन्यं जनमसद्व्यवहारे प्रवर्त्तयति मध्यस्था हि विवेकिन: सद्व्यवहारएव प्रवर्त्तयन्ति ना सद्व्यवहारे सतु विपर्ययमपि करोति तत: कथमसौ सर्वज्ञोवीतरागश्च तत्किमर्थमन्यं जनमसद्व्यवहारे प्रवर्त्तयति मध्यस्थाहि विवेकिनश्चोवा अथोच्येतस द्व्यवहारविषयमेव भगवानुपदेशं ददाति तेन सर्वज्ञो वीतरागश्च यस्त्वधर्म्मकारी जनस्तस्य तं फलमसदनुभावयति येन सतस्मादधर्माद्व्यावर्त्तते तत् उचितफलदायित्वाद्विवेकवानेव भगवानिति न कश्चिद्दोष: तदप्यसमीचीनाभिधानं यत: पापेपि प्रथमं सएव प्रवर्त्तयति नान्यो नच स्वयं प्रवर्त्तते तस्याच्च त्वेन पापे धर्मे वा स्वयं प्रवृत्तेरयोगात् तत: पूर्वंपापे प्रवर्त्त्य तत्फलमनुभाव्य पश्चाद्धर्मे प्रवर्त्तयतीति केयमीश्वरस्य प्रेक्षापूर्वकारिता अथ पापेपि प्रथमं प्रवर्त्तयति तत्कर्माधिष्ठितएव तथाहि तदेव तेन जन्तुनाकृतं कर्म यद्वशात्पापएव प्रवर्त्तते ईश्वरोपि च भगवान् सर्वज्ञस्तथारूपं तत्कर्मसाक्षात् ज्ञात्वातं पापएव प्रवर्त्तयति तत्र उचित फलदायित्वात्प्रेक्षा पूर्वकारीति ननु तदपि कर्म तेनैव कारितं ततस्तदपि कस्मात्प्रथमं कारयतीति सएवाप्रेक्षा पूर्वकारि ताप्रसङ्ग: अथाधर्म्ममसौ न कारयति किन्तु स्वतएवासौ धर्ममाचरति अधर्मकारिणन्तु तं तत्फलमसदनुभावयति तदन्येश्वरवत् तथाहि तदन्ये ईश्वर राज्ञादयोनाधर्मेजनं प्रवर्त्तयन्ति अधर्म्मफलं तु मेच्छादिकमनुभावयंति तद्वद्भगवानीश्वरोपि तदप्ययुक्तमन्येहि ईश्वरानपापप्रतिषेधं कारयितुमीशानहि नामराजानोपि उग्रशासना: प्रायेमनोवाक्कायनिमित्त सर्व्वथाप्रतिषेधयितुं प्रभविष्णव सतु भगवान् धर्म्माधर्मविधिप्रतिषेध विधापनसमर्थइष्यते तत: कथं पापे प्रवृत्तं न प्रतिषेधयति अप्रतिषेध्य परमार्थत: सएव कारयति तत्फलञ्च पश्चादनुभावनादिति तदवस्थएव दोष: अथ पापे प्रवर्त्तमानं प्रतिषेधयितुम शक्तइष्यते तर्हि नैवोच्चकैरिदमभिधातव्यं सर्वमीश्वरेण कृतमिति अपिच यद्यसौ स्वयमधर्म्मं करोति तथाधर्म्ममपि कारिष्यति फलञ्च स्वयमेव भोक्ष्यते

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



ततः किमीश्वरकल्पनयाविधेयमिति उक्तं च अयत्नात्यै श्वराः पापप्रतिषेधं न कुर्व्वते सत्वत्यं तमशक्तेभ्यो व्याहृत्तमतिरिच्यते १ अथाप्यशक्तएवासौ तथा सतिपरिस्फुटं नेश्वरेणाक्तं सर्वमिति वक्तव्यमुच्चकैः पापवत्तीर्थकारित्वाधर्म्मादिरपि किंतत् इति अथ ब्रवीथाः स्वयमसौ धर्म्माधर्म्मौकरोति तत्फलंत्वीश्वरं एव भोजयति तस्यधर्म्माधर्म्म फलभोग स्वयमशक्तत्वादिति तदप्यसत् यतोयोनामस्वयं धर्माधर्मौ विधातुमलं सकथं तत्फलं स्वयमेव न भोक्तुमीशो न हि पक्कमोदनं समर्थो न भोक्तुमिति लोके प्रतीतं अथवा भवत्वे तदपि तथाप्यसौ धर्म्म फलमुन्मत्तदेवांगनां संस्पर्शादिरूपमनुभावयतु तस्येष्टत्वात् अधर्म्म फलं तु नरकप्रपातादिरूपं कस्मादनुभावयति नहि मध्यस्थभावमवलम्बमानाः परमकरुणापरीतचेतसः प्रेक्षावन्तो निरर्थके परपीडाहेतौ कर्म्मणिप्रवर्त्तंते क्रीडार्थाभगवतस्तथाप्रवृत्तिरिति चेत् यद्येवं तर्हि कथमसौ प्रेक्षावान् तस्य हि प्रवर्त्तने क्रीडामात्रमेव फलं ते पुनः प्राणिनः स्थानेर प्राणैर्व्वियुज्यंते उक्तञ्च क्रीडार्थातस्य वृत्तिश्चेत्प्रेक्षापूर्वं क्रियाकुतः एकस्य क्षणिकात्प्रिरत्यः प्राणैर्व्वियुच्यते १ अपिच क्रीडालोके सरागस्योपलभ्यते भगवांश्च वीतराग स्ततः कथं तस्य क्रीडासङ्गतिमङ्गति अथ सोपि सरागइष्यते तर्हि शेषजन्तुरिवा वीतरागत्वात् नसर्व्वज्ञोनापि सर्वज्ञस्यकर्त्तृत्वापतितं अथ रागादियुतोपि ससर्वज्ञः सर्वस्य कर्त्ताच भवति तथाच स्वभावत्वाद तोन कश्चिद्दोषो न हि स्वभावे पर्यनुयोगो घटनानुपपद्यते उक्तंच इदमेवं नचेतत्कास्य पर्यनुयोज्य तां अग्निर्दहति नाकाशं कोत्र पर्यनुयुज्यतां १ तदेतदसम्यक् यतः प्रत्यक्षतस्तथा रूपस्वभावेवगते यदि पर्यनुयोगाविधीयते तत्रेदमुत्तरं विजृंभते यथास्व भावे पर्यनुयोगो न भवतीति यथाप्रत्यक्षेणोपलभ्यमाने वह्नेर्दाह्यं दहतो दाहकात्मरूपे स्वभावे तथाहि यदि तत्र कोपि पर्यनुयोगमाधत्ते यथाकथमेषवह्नि र्दाहकस्वभावो जातो यदि वस्तुत्वेन तर्हि व्योमापि किं न दाहकं स्वभावं भवति वस्तुत्वाविशेषादिति तत्रेदमुत्तरं विधीयते दाहकत्वरूपोहि स्वभावो वह्नेः प्रत्यक्षतएवोपलभ्यते ततः कथमेष पर्यनुयोगमर्हानिति नहि दृष्टनुपपन्नतानाम तथाचोक्तं स्वभावेध्यक्षतः सिद्धे यदिपर्यनुयुज्यतेतत्रेदमुत्तरं वाच्यं न

दृष्टेनुपपन्नता ईश्वरस्तु सर्वजगत्कर्तृत्वेन सर्वज्ञत्वेन च नोपलभ्येतस्तत्र तथा स्वभावाश्च कल्पनोवश्यं पर्यनुयोगमाश्रयते यदि पुनरदृष्टेपि तथा स्वभावत्व कल्पनापर्यनुयोगानाश्रयाभ्युपगम्येत तर्हि सर्वोपि वादीतंतं पक्षमाश्रयन् परेणविक्षोभितस्तत्र तत्र तथा स्वभावताकल्पनेन परं निरुत्तरीकृत्यलब्धजयपताकाएवभवेत् उक्तंच अन्यथा यत्किञ्चिदात्माभिमतं विधाय निरुत्तरस्तत्रकृतः परेण वस्तु स्वभावैरिति वाच्यमित्थं तदोत्तरंस्याद्विजयीसमस्तः किञ्च सर्वंयदि जगदीश्वरकृतं मन्यते तर्हि सर्वाण्यपि शास्त्राणि सकलदर्शनगतानि तेन प्रवर्त्तितानीति प्राप्तं तानिच शास्त्राणि परस्परविरुद्धार्थानि ततोऽवश्यं कानिचित्सत्यानिकानिचिदसत्यानि ततः सत्यासत्योपदेशदानात्कथमसौ प्रमाणं उक्तंच शास्त्रान्तराणि सर्वाणियदीश्वरविकल्पतः सत्यासत्योपदेशश्च प्रमाणं दानतः कथं अथ न सकलानि शास्त्राणीश्वरेणकारितानि किन्तु सत्यान्येव ततो न कश्चिद्दोषावकाशस्तर्हि शास्त्रान्तरवदेव नेश्वरेणान्यदपि व्यधायीतिकुतो तवपक्षसिद्धिरितिअन्यच्च यादृग्भूतं संस्थानादिबुद्धिमत्कारणपूर्वकत्वेनोपलब्धं तादृग्भूतमेवान्यथापि बुद्धिमन्तमात्मानो हेतुमनुमापयति यथाजीर्णदेवकुलकूपादिगतंनशेषं न हि संध्याभ्ररागवल्मीकादिगत संस्थानाद्यात्मनो बुद्धिमन्तं कर्त्तारमनुमापयति तथा प्रतीतेरभावात् तच्चतस्य संस्थानादेर्बुद्धिमत्कारणत्वेन निश्चयाभावात् तथाभूभूधरादिगतमपि संस्थानादिकं न बुद्धिमत्कारणपूर्वकत्वेन निश्चितमिति कथं तद्वशात्बुद्धिमन्तः कर्तुरनुमानं अथमन्येथाः तदपि संस्थानादितादृग्भूतमेव संस्थानादिशब्दवाच्यत्वात् नचैवंतत्कर्तृबुद्धिमतोनुमाने काचिदपि बाधामुपलभामहे ततः सर्वंसुस्थमिति तदयुक्तं शब्दाहि रूढि वशायात्यंतरेणिप्रवर्त्तंतेततःशब्दसामाद्यदि तथारूपवस्त्वनुमानंतर्हि गोत्वात्गवादीनामपि विषाणितानुमीयतां विशेषाभावात् अथतत्रप्रत्यक्षेणबाधोपलभ्यते ईश्वरानुमानेतुनततो न कश्चिद्दोषइति तदेतदतीव प्रमाणमार्गानभिज्ञतासूचकं यतोयतएवतत्रप्रत्यक्षेण बाधोपलंभोऽतएव नान्यत्रापिशब्दसाम्यात्तथा रूपवस्त्वनुमानं कर्त्तव्यं प्रत्यक्षतएव शब्दसाम्यस्य वस्तुतथारूपेण सहाविना भावित्वस्याभावावगमात् नच बाधकमत्रनोपलभ्यते इत्येवानुमानं प्रवर्त्तते किन्तु वस्तुसम्बन्धव

लात्तथाचोक्तं न नवाध्यत इत्येवमनुमानं प्रवर्त्तते सम्बन्धदर्शनात्तस्य प्रवर्त्तनमिष्येत १ इति स च सम्बन्धोत्र न विद्यते तद्ग्राहकप्रमाणाभावात् ततो नैकांतिकताहेतोरित्थचैतदङ्गीकर्त्तव्यमन्यथा योयोवद्विकार: स सकुम्भकारकृतो यथा घटादि: वद्विकारश्चायं वल्मीकस्तद्यथा कुंभकारकृत इत्यप्यनुमानं समीचीनतामाचनीस्कंद्यते बाधकादर्शनात् अथास्तिबाधकमत्रादर्शनंतथाहि यदितत्र कुम्भकार: कर्त्ताभवेत्तर्हि कदाचिदुपलभ्यतेनचोपलभ्यते तस्मादेतद युक्तमिति तदेतदीश्वरानुमानेपि समानं यदि हि सर्वस्यापि वस्तुजातस्येश्वर: कर्त्ता तर्हि क्वचित्कदाचिदुपलभ्यते तस्मात्तदप्य लीकमितिकृतं प्रसंगेन येपि चात्मवादिन: पुरुषएवेदं सर्वमिति प्रतिपन्नास्तेपि महामोह महोरगगरलपुरमूर्छितमानसा वेदितव्या: तथाहि यदिनाम पुरुषमात्ररूपमद्वैतं तत्त्वं तर्हिय देदुपलभ्यतेसुखित्वदु:खित्वादि तत्सर्वं परमार्थतोसत् प्राप्नोति ततश्चैवं स्थिते यदेतदुच्यतेऽप्रमाणतोऽधिगम्य संसारनैर्गुण्यं तद्विमुखया प्रज्ञयातदुच्छेदायप्रवृ त्तिरित्यादि तदेतदाकाशकुसुमसौरभवर्णनोपमानमवसेयं अद्वैतरूपेहि तत्वेकुतो नरकादिभवभ्रमणरूपसंसारो यन्नैर्गुण्यमवगम्य तदुच्छेदायप्रवृत्तिरुप पद्यते यदप्युच्यते पुरुषमात्रमेवाद्वैतं तत्वं यत्तु संसारनैर्गुण्यभावभेददर्शनं ततसर्वदासर्वेषामविद्यात् प्रतिपन्नावपि चित्रेनिम्नोन्नतभेददर्शनमिव भ्रांतमयसे यमिति तदप्यचारु तद्विषयवास्तवप्रमाणाभावात् तथाहि नाद्वैताभ्युपगमे किंचिदद्वैतग्राहकं तत: पृथग्भूतंप्रमाणमस्ति द्वैततत्वप्रसक्ते: नच प्रमाणमंतरेण नि:प्रतिपन्नातत्वव्यवस्थाभवति माप्रापत् सर्वस्य सर्वेष्टार्थसिद्धिप्रसङ्ग: तथाभ्रांतिरपि प्रमाणभूतादद्वैता द्भिन्नाभ्युपगन्तव्या: अन्यथाप्रमाणभूतमद्वैतमप्रमा णमेवभवेत् तदव्यतिरेकात्तत्स्वरूपवत् तथाच कुतस्तत्वव्यवस्थाभिन्नायांचभ्रांता वभ्युपगम्यमाना यांद्वैतं प्रसक्तमित्यद्वैतहानि: अपिचयदीदं स्तंभकुंभां भोरुहादिभाव भेददर्शनं भ्रांतमुच्यते तर्हि नियमात्तदपि क्वचित्प्रत्यक्षवगन्तव्यं अभ्रांतदर्शनमन्तरेण भ्रांतेरयोगा नखलु येन पूर्वमासीविषो नदृष्टस्तस्यर ज्वामासीविष भ्रांतिरुपजायते तदुक्तं नादृष्टपूर्वसर्पस्य रज्ज्वां सर्पमपि: क्वचित् तत: पूर्वा नुसारित्वात् भ्रान्तिरभ्रान्तिपूर्विका १ ततएव मथ्याहतो भेद:

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



अन्यच्च पुरुषाद्वैतरूपं तत्त्वमवश्यं परस्मै निवेदनीयं नात्मने आत्मनो व्यामोहाभावात् विमोहश्चेद्य तत्प्रति दैव न भवेत् अथोच्येत एवव्यामोहात् एवतन्निष्ट
त्यर्थमात्मनो द्वैतप्रतिपत्तिराश्रेया तदयुक्तमेवं सत्यद्वैतप्रतिपत्त्याधानेनात्मनोऽव्यामोहा निहत्यमानेवश्यं पूर्वरूपत्यागोऽपररूपस्य वाप्त्या स्फुटतालक्षणा
स्योत्पत्तिरित्यद्वैतप्रतिज्ञाहानिः परस्मै च प्रतिपादयन्नियमतः परमभ्युपगच्छेतपरं चाभ्युपगच्छेतपरं चाभ्युपगच्छन् तस्मैवाद्वैतरूपं तत्त्वनिवेदयन्
पितामेव कुमारब्रह्मचारीत्यादिवदन्निव कथं नोन्मत्तः स्वपराभ्युपगमेनाद्वैत वचसो वा धनादिति यत्किञ्चिदेतत् यदपि च नियतिवादिन उक्तवन्तो नि
यतिर्नामतत्त्वान्तरमस्तीति तदपि ताड्यमानाति जीर्णपटइव विचारताडनमसहमानं शतधाविशरारुभावमाभजते तथाहि तन्नियतिरूपं नामतत्त्वान्तरं
भावरूपं वास्यादभावरूपं वा यदिभावरूपं तर्हि किमेकरूपं वा यद्येकरूपं ततस्तदस्तिनित्यमनित्यं वा यदिनित्यं वा यदिनित्यं कथं भावनाहेतुर्नित्यस्य
कारणत्वायोगात् तथाहि नित्यमाकालमेकरूपमुपवर्ण्यते अप्रच्युतानुत्पन्नस्थिरैकस्वभावतया नित्यत्वस्य व्यावर्णनात् ततो यदि तेन रूपेण कार्याणि
जनयति तर्हि सर्वदा तेन रूपेण जनयेत् विशेषाभावात् नच सर्वदा तेन रूपेण जनयति क्वचित्कदाचित्तस्य भावस्य दर्शनात् अपि च यानि द्वितीयादिषु
क्षणेषु कर्त्तव्यानि कार्याणि तान्यपि प्रथमसमय एवोत्पादयेत् तत्कारणस्वभावस्य तदानीमपि विद्यमानत्वात् मावाद्वितीयादिष्वपि क्षणेषु विशेषाभावात्
विशेषेवा बलादनित्यत्वं अतोवश्यमनित्यतां ब्रूम इति वचनप्रमाण्यात् अथा विशिष्टमपि नित्यं तं तं सहकारिणमपेक्ष्य कार्यं विधत्ते सहकारिणश्च
प्रतिनियतदेशकालभाविनस्ततः सहकारिभावा भावाभ्यां कार्यस्य क्रमइति तदप्यसमीचीनं यतः सहकारिणोपि नियतिसंपाद्या नियतिश्च प्रथमक्षणेपि
तत्कारणस्वभावाद्वितीयादिषु क्षणेषु तत्करणभावनाभ्युपगमे नित्यत्वक्षितिप्रसंगात् ततः प्रथमेपि क्षणे सर्वसहकारिणां संभवात्सकलकार्यकरणप्रसंगः अ
पिच सहकारिषु सत्सु भवति कार्यं तदभावे च न भवति ततः सहकारिणामेवान्वय व्यतिरेकदर्शनात्कारणतापरिकल्पनीया न नियते स्तद्व्यतिरेका

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



संभवात् उक्तञ्च हेतुत्वान्वयपूर्वेण व्यतिरेकेणासिद्धति नित्यस्याव्यतिरेकस्य कुतो हेतुत्वसंभवः अथैतद्दोषभयादनित्यमिति पक्षाश्रयणं तर्हि तस्य प्रतिक्षणमन्यान्यरूपतया भवनतो वक्तृत्वभावादेकरूपमिति प्रतिज्ञाव्याघातप्रसंगः नच क्षणक्षयित्वे कार्यकारणभाव इति प्रागेवोपपादितं अन्यच्च यदिनियतिरेकरूपां ततस्तं निबंधननिखिलकार्याणामेकरूपताप्रसंगः नहि कारणभेदमन्तरेण कार्यस्य भेदो भवितुमर्हति तस्य निर्हेतुकत्वप्रसक्तेः अथानेकरूपमिति पक्षो ननु सानेकरूपता न तदन्यनानारूपविशेषणमन्तरेणोपपद्यते न खलु जपरेतरादिधरावेदमन्तरेण विहायसः पततामंभसामनेकरूपताभवति विशेषणं विना यस्मान्नतुल्यां नाविशिष्टतेति वचनप्रामाण्यात् ततोऽवश्यं तदन्यानि नानारूपाणि विशेषणानि नियतेर्भेदकान्यभ्युपगन्तव्यानि तेषां च नानारूपाणां विशेषणानां भावः किंतत् एवनियतेर्भवेदुतान्यतः यदिनियतेस्ततस्याः स्वतएकरूपत्वात् कथं तन्निबन्धनानां विशेषणानां रूपता अथ विचित्रकार्यान्यथानुपपत्त्या साविचित्ररूपाभ्युपगम्यते ननु साविचित्ररूपताविशेषण बाहुल्यसंपर्कमन्तरेण न घटामंचति ततस्तत्रापि विशेषणबाहुल्यमभ्युपगन्तव्यं तेषामपि विशेषणानां भावः किंतत्एव नियतेर्भवेदुतान्यत इत्यादि तदेवावर्त्तते इत्यनवस्था अथान्यतइति पक्षस्तदप्ययुक्तं नियतिव्यतिरेकेणान्यस्य हेतुत्वे नानभ्युपगमादिति यत्किञ्चिदेतत् किंवानेकरूपमिति पक्षाभ्युपगमेभवतिः प्रतिपन्थिविकल्पयुगलमुपढौकते तद्धिमूर्त्तं वास्यादमूर्तं वायदिमूर्तंतर्हि नामन्तरेणकर्मैवप्रतिपन्नं यस्मात्तदपि कर्मपुद्गलरूपत्वान्मूर्त्तमनेकं वास्माकमभिप्रेतं भवतापि च नियतिरूपं तत्वान्तरमनेकं मूर्त्तं वाभ्युपगम्यते इत्यादयोरविप्रतिपत्तिः अथामूर्त्तमित्यभ्युपगमः तर्हि नतत्सुखदुःखनिबन्धनममूर्त्तत्वात् न खल्वाकाशममूर्तमनुग्रहायोपघातायवा जायतेपुद्गलानामेवानुग्रहोपघातविधानसमर्थत्वात् अमणुण्णहोवघायाजीवाणं पुग्गलेहिंतो इति वचनात् अथमन्यथा दृष्टमाकाशमपि देशभेदेन सुखदुःखनिबन्धनं तथाहिमरुस्थलीप्रभृतिषु देशेषु दुःखं शेषेषु सुखमिति तदप्यसत्तत्रापि तदाकाशस्थितानामेव पुद्गलानामनुग्रहोपघातकारित्वात्तथाहि मरुस्थलीप्रायासुभूमिषु जलविकलतयानतथा

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



विधाधान्यसंपत् वालुकाकुलतयावाध्वनि प्राणिनांगमनागमनं विधावतिशायीपदेर खेदोनिदाघे च खरकिरणतीव्रकरनिकर संपर्कतो भूयान् संतापोजला
भ्यवहरणमिति स्वलीयोमहाप्रयत्न संपाद्यचेति महत्तवदुःखंशेषेषु तद्विपर्यीयात्सुखमिति तत्रापि पुद्गलानामेवानुग्रहोपघात कारित्वंनाकाशस्येति यथा
भावरूपमिति यच्चत्तदप्ययुक्तमभावस्य तुच्छरूपतया सकलशक्त्यायोगतः कार्यकारित्वायोगात् नहिकटककुंडलाद्यभावत कटककुंडलाद्युपजायते तथादर्शना
भावात् अन्यथा ततएवकटक कुंडलाद्युत्पत्तेर्विश्वस्यादरिद्रताप्रसंगः नन्विहघटाभावो मृत्पिंडएव तस्माच्चोपजायमानोदृश्यते घटस्ततः किमिहायुक्तं न
खलुमृत्पिंडस्तुच्छरूप स्वरूपभावात् ततः कथमिवतस्य हेतुतानोपपत्ति मर्हति तदप्यसमीचीनं यतोनयएव मृत्पिंडस्य स्वरूपभावः सएवाभावाभवितुमर्हति
भावाभाव विरोधात्तथाहियदिभावः कथमभावः अथाभावःकथंभावइति अथोच्यते स्वरूपापेक्षयाभावरूपता पररूपापेक्षयावाभावरूपता ततोभावाभावयोभि
न्ननिमित्तत्वात् न कश्चिद्दोषइति नन्वेवं मृत्पिंडस्य भावात्मकत्वाभ्युपगमेनेकांतात्मकता स्वतंत्रविरोधिना भवतः प्राप्नोति एवंहि त्र्वाणाजिनाएव सदसिवि
राजंतेये सर्ववस्तु स्वपरभावादिनानेकांतात्मक मभिमन्यंते न भवादृशाएकांत ग्रहग्रस्तमनसः स्यादेतत्परिकल्पित स्तत्रपररूपाभाव स्वरूपभावस्तुतात्विक
स्ततोनानेकांतात्मकत्वप्रसंगइति यद्येवंतर्हिकथं ततोमृत्पिंडात् घटभावः तत्रपरमार्थ तो घटप्रागभावस्याभावात् यदिपुनः प्राग्भावाभावेपि ततो घटोभवेत्
तर्हिसूत्रपिंडादेरपि कस्मान्नभवति प्रागभावाभावाविशेषात् कथं वा ततो न खरविषाणमिति यत्किंचिदेतत् तदप्युक्तं यत् यदायतोभवति कालांतरेपित
त्तदाततएव नियतेनैव रूपेणाभव दुपलभ्यते नैवरूपेणाभवदुपलभ्यते इति तदपि अयुक्तमेवकारण सामग्री शक्तिनियमतः कार्यस्य तदाततएवते नैवरूपेणाभाव
संभवात्ततो यदुक्तमन्यथाकार्यकारणात् एवं च कारणशक्तिनैयत्यतः कार्यस्य नैयत्येकथं प्रेक्षावान् प्रमाणपथ कुशलप्रमाणोपपन्न युक्तिवाधिनां नियतिमंगी
कुरुते मामापदप्रेक्षावत्ताप्रसंगः एतेनयदाहुः स्वभाववादिनः इहसर्वेभावाः स्वभाभाववशादुपजायंते इतितदपि प्रक्षिप्तमवगंतव्यं उक्तदूषणानांप्रायस्तत्रापि

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



समानत्वात् तथाहि स्वभावोभावरूपोवास्यादभावरूपोवाभाव इत्यर्थरूपोप्येक रूपोवेत्यादि सर्वं तदवस्थमेवात्रापि दूषणजालमुपढौकते अपि चय: स्वभाव स्वभाव आत्मीयोभाव इत्यर्थ: स च कार्यगतो वा हेतुर्भवेत् कारणगतो वा न तावत्कार्यगतो यत: कार्यपरिनिष्पन्ने सति सकार्यगत: स्वभावो भविष्यति नानिष्पन्ने २ च कार्ये कथं स तस्य हेतु: योहि यस्यालब्धलाभ संपायप्राय प्रायप्रभवति पितस्य हेतुकार्यं च परिनिष्पन्नतया लब्धात्मलाभमन्यथा तस्यैवस्वभावस्याभावप्रसङ्गात् तत: कथं स कार्यस्य हेतुर्भवति कारणगतस्तु स्वभाव: कार्यस्य हेतुरस्माकमपि सम्मत: स च प्रतिकारणं विभिन्न स्तेन घट: कुम्भो भवति न पटादि: घट: पटादिकारणस्वभावाभावात् तन्तुभ्योपि पटएव भवति न घटादि तन्तूनां घटादिकरणे स्वभावाभावात् ततो यदुच्यते घट: कुम्भो भवति न पटादिरित्यादि तत्सर्वं कारणगतस्वभावा भ्युपगमे सिद्धसाध्यतामध्य मध्यासीनमिति ततोबाधामादधातियदपि चोक्तमास्तामन्यत्कार्यजातमित्यादि तदपि कारणगत स्वभावांगीकारे समीचीनमे वावसेयं तथाहि तकांकटुकमुद्गा: स्वकारणवशतस्तथारूपा एव जाता ये स्थाल्यां धनकालादि सामग्रीसंपर्केपि न पाकमश्नुते इति स्वभावश्च कारणादभिन्न इति सर्वं सकारण मेवेति स्थितं उक्तश्च कातणगत उहेतुकेण विनिद्दोति नियमकञ्जस्य नयसोतउविभिन्नो सकारणं सव्वमेवतउ १ यदपि च यदृच्छावा दिन: प्रलपन्ति न खलु प्रतिनियतो वस्तूनां कार्यकारणभाव इत्यादि तदपि च कार्याकार्यादिविवेचन पटीयसो मुखीविकलतासूचकमवगन्तव्यं कार्यकार णभावस्य प्रतिनियततया संभवात् तथाहि य: शालूकादुपजायते शालूक: ससदैव शालूकादेव न गोमयादपि च गोमयादुपजायते शालूक:गोमयादेव न शालूकादपि नचानयोरैकरूपता शक्तिवर्णा दिवैचि त्यत: परस्परजात्यन्तरत्वात् योपि च वह्नेरुपजायते वह्नि: सोपि सदैव वह्नेरेव नारणिकाष्ठादपि] योपि चारणिकाष्ठादुपजायते सोपि सर्वदारणि काष्ठादेव न वह्नेरपि यदपि चोक्तं वीजादपि जायते कदलीत्यादि तत्रापि परस्परविभिन्नत्वादेत देवोत्तरं अपि च यो कंदादुपजायते

For Private and Personal Use Only

कदलीसोपि परमार्थतोबीजादेव वेदितव्या परंपरया बीजस्यैव कारणत्वात् एवं घटादयोपि शाखैकदेशादुपजायमानाः परमार्थतो बीजादव गन्तव्याः तथाहि शाखातः शाखाप्रभवति नच साशाखाशाखाहेतुकालोके व्यवह्रियते वटबीजस्यैव सकलशाखादि समुदायरूप वटहेतुत्वेन प्रसिद्धत्वात् एवं शाखैकदेशादपि जायमानो वटः परमार्थतो मूलवटशाखारूप इति मूल वटबीजहेतुकएव सोपि वेदितव्यः तस्मान्न क्वचिदपि कारणकार्यव्यभिचारः निपुणप्रवीणेन च प्रतिपत्ता भवितव्यं ततो न कश्चिद्दोषः एवं च यदुच्यते न खल्वन्यथा वस्तुसद्भावं पश्यन्तोन्ययात्मानं प्रेक्षावंतः परिक्लेशयन्तीति तत् वाङ्मात्रमिति स्थितं येपि चाज्ञानवादिनो न ज्ञानं श्रेयस्तस्मिन् सति परस्परं विवादयोगतश्चित्तकालुष्यादि भावतो दीर्घतरसंसारप्रवृत्ते रित्थाहुक्तवन्तस्तेप्य ज्ञान महानिद्रोप सुप्तमनस्कतयायत् किंचित् भाषितवंतोवेदितव्याः तथाह्यास्तामन्य देतावदेव ते च प्रष्टव्याः ज्ञाननिषेधकं ज्ञानं वास्यादज्ञानं वा तत्र यदि ज्ञानं ततः कथमभाषिष्ट अज्ञानमेव श्रेयोनन्वेवं ज्ञानमेव श्रेयस्तामाचनीस्कंद्यते तदन्तरेण ज्ञानस्य प्रति ष्ठापयितुमशक्यत्वात् तथा च प्रतिज्ञाव्याघातप्रसंगः अथाज्ञानमिति पक्षः सोप्ययुक्तोऽज्ञानस्य ज्ञाननिषेधन सामर्थ्यायोगात् न खल्वज्ञानं साधनायबाधनाय वा कस्यापि प्रभवति अज्ञानत्वादेव ततोऽप्रतिषेधादपि सिद्धं ज्ञानं श्रेयः आहच नाणनिसेहणा हेऊनाणं इयरंच होज्जजइनाणं अब्भुवगमम्मितस्स केइंतु अन्नाणमोसेयं अहअन्नाणं न तयंनाणनिसेहेण समत्थमेवंपि अपडिसेहाउच्चियं सिद्धं नाणमेवत्ति २ यदप्युक्तं ज्ञाने सति परस्परं यविवादयोगतश्चित्तकालुष्यादिभाव इति तदप्यपरभावितभाषितं इहहि ज्ञानीपरमार्थतः सएवोच्यते योविवेकपूतात्मा ज्ञानगर्वमात्मनि सर्वथानविधत्ते यस्तु ज्ञानलवमासाद्याकण्ठपीता सच इवोन्मत्तः सकलमपि जगत्तृणायमन्यते सपरमार्थतोऽज्ञानी वेदितव्यो ज्ञानफलाभावात् ज्ञानफलं हि रागादिदोषगणनिरासः सचेन्न भवति तर्हि न परमार्थतो ज्ञानस्य तत्ज्ञानमेव न भवति यस्मिन्नुदिते विभाति रागगणः तमसः कुतोस्ति शक्तिर्दिनकरकिरणाग्रतः स्थातुं

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir
For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



१ ततइत्थंभूतो ज्ञानी विवेकपूतात्मा परहितकरणैकरसिको वादमपि परेषामुपकारार्थमाधत्ते न यथाकथञ्चिततमपि च वादं वादिनरपति परीक्षकेषु निपुणबुद्धिषु मध्यस्थेषु सत्सु विपक्षे नान्येषु तीर्थंकरगणधरैरनुज्ञानात् उक्तञ्च वादोविवादूनरवदू परित्यगजणे सुनिउणबुद्धीसु मज्झत्थेसुय विहिणाउच्च गोणं अणुणाउ १ ततएवं स्थिते कथंतु नामचित्तकालुष्यभावो यद्वशात्तीव्रतीव्रतरकर्मबंधयोगतो दीर्घदीर्घतर संसारप्रवृत्तिः संभवात् केवलं वादिनरप तिपरीक्षकाणामज्ञानापगमतः सम्यग्ज्ञानोन्मीलनं जायते तथाच भवदुपकारिज्ञानमिति तदेवश्रेयः यत्पुनरुच्यते तीव्राध्यवसायनिष्पन्नः कर्मबन्धोदा रुणविपाको भवतीति तदभ्युपगम्यते एव नच तीव्राध्यवसायो ज्ञाननिबन्धनोऽज्ञानिनोपि तस्य दर्शनात् केवल ज्ञानेसति यदि कथञ्चित् कर्मदोषतो कार्येपि प्रवृत्तिरुपजायते तथापि ज्ञानवशतः प्रतिक्षणं संवेगभावतो न तीव्रपरिणामो भवति तथाहि यथाकश्चित् पुरुषो राजादिदुष्टनियोगतो विष मिश्र मन्नं जानानोपिभयभीति मानसो भुंक्ते तथा सम्यग्ज्ञान्यपि कथंचित्कर्मदोषतोऽकार्यमाचरन्नपि संसारदुःखभयभीतमानसः समाचरति ननिः शङ्कं संसारभयभीतता च संवेग उच्यतेततः संवेगवशान्न तीव्रः परिणामो भवति उक्तंच जाणंतोपिसुखाणं पवत्तमाणोविवाइ एजहउ नउद्दवो ना णीपवत्तमाणो विसंविग्गो १ जंसंवेगपहाणो भज्जंतसुहोयहोइ परिणामो पावनिव्वतायपरानेयं अणाणिणोउभयं ततो यदुक्तमज्ञानमेव मुमुक्षुणा मुक्तिपथप्रवृत्ते नाभ्युपगन्तव्यं न ज्ञानमिति तत्तेषांमूढमनस्कतासूचकमवगन्तव्यं यदप्युक्तं भवेत् युक्तो ज्ञानस्याभ्युपगमो यदिज्ञानस्य निश्चयः कर्तुं पार्यते इत्यादि तदपि बालिशजल्पितं यतो यद्यपि सर्वेपि दर्शनिनः परस्परं भिन्नमेव ज्ञानं प्रतिपन्नास्तथापि यद्वचो दृष्टेष्टा वाधितं पूर्वापराव्याहतंच तत्सम्यग्रूपमवसेयं तादृग्भूतं च वचो भगवत्प्रणीतमेवेति तदेतत् प्रमाणं न शेषमिति यदप्युक्तं सुगतादयोपि सौगतादिभिः सर्वज्ञा इष्यंते इत्यादितद प्यसत् दृष्टेष्टबाधित वचनतया सुगतादीनामसर्वज्ञत्वात् यथा च दृष्टेष्टवाधित वचनतासु गतादीनां तथाप्रागेव सर्वज्ञसिद्धौ लेशतो दर्शिता ततो भगवानेष

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



सर्वज्ञ: उक्तञ्च सव्वन्नु विहाणं मिव दिहे द्वावाचिया [उवयणाउ सव्वस् होइ जिणोसेसासव्वे असव्वसु १ एतेन यदुक्तं भवतु वा वर्द्धमानस्वामी सर्वज्ञस्तथापि तस्य सत्कोयमाचारादिक उपदेशइति कथं प्रतीयते इति तदपि दूरापास्तं अन्यस्येत्थंभूत दृष्टेष्टाबाधितवचन प्रवृत्तिरसम्भवात् यदप्युक्तं भवत्वेषोपि निश्चयो यथायमाचारादिक उपदेशो वर्द्धमानस्वामिन इति तथापि तस्योपदेशस्यायमर्थोनान्य इति न शक्यं प्रत्येतु मित्यादि तदप्युक्तं भगवान् हि वीतरागस्ततो न विप्रतारयति विप्रतारणहेतुरागादिदोषगणा सम्भवात् तथा सर्व्वज्ञत्वेन विपरीतं सम्यग्वार्थमवबु ध्यमानं शिष्यं जानाति ततो यदि विपरीतमर्थमवबुध्यते श्रोता तर्हि निवारयेत् न च निवारयति न च विप्रतारयति करोति च देशनां कृतकृत्योपि तीर्थंकरनामकर्मोदयात् ततो ज्ञायते एष एवास्योपदेशस्यार्थ इत्युक्तं च नाएवितदुवएसे एसोवत्थोमउत्तिसे एवं मज्जइपवत्तमाणं जंनंनिवारेइतच्चेव १ अन्नहयपवत्तं तनिवारई नियतउपवंचेइ जम्हासवीयरागोकारणे पुणाकारणंकम्मं २ एवंच भगवद्विवक्षाया: परोक्षत्वेपि सम्यगुपदेशस्यार्थनिश्चयेजाते यदुक्तं गोतमादिरपि छद्मस्थइत्यादि तदप्यसारमवसेयं छद्मस्थस्याप्युक्तप्रकरणे भगवदुपदेशार्थनिश्चयोपपत्ते: तथाचितार्था अपि शब्दाभगवति च समयि तास्ते च प्रकरणाद्यनुरोधेन तत्तदर्थप्रतिपादका: प्रतिपादिता: ततो न कश्चिद्दोष: तत्तत्प्रकरणाद्यनुरोधेन तत्तदर्थनिश्चयोपपत्ते: भगवतापि च तथा तथार्थावगमे प्रतिषेधाकरणादिति एवं च तदानीं गोतमादिना सम्यगुपदेशार्थं च गतावाचार्यपरंपरात इदानीमपि तदर्थावगमो भवति नचाचार्यपरं परा नप्रमरणं अविपरीतार्थं व्याख्यातृत्वेन तस्या: प्रामाण्यस्यापाकर्तु मशक्यत्वात् अपिच भगवद्दर्शनमपि किमागममूलमनागममूलंवा यद्यागममूलं तर्हि कथमाचार्यपरंपरामन्तरेणागमार्थस्याववोद्धुमशक्यत्वात् अथानागममूलं तर्हि न प्रमाणमुन्मत्तकविरचितदर्शनवत् अथ यद्यपि नागममूलं तथापि युक्त्युप पन्नमिति कृत्वासमाश्रीयते अहोदुरंत: स्वदर्शनानुरागोयएवमपि पूर्वापरविरुद्धंभाषयति अथवा भूषणमेत दज्ञानपक्षाभ्युपगमस्य यदित्थं पूर्वापरविरुद्धार्थ



For Private and Personal Use Only

भाषणं कथं पूर्वापरविरुद्धार्थं भाषितेतिचेत् उच्यते युक्तयोहि ज्ञान मूलाभवतांवा ज्ञानाभ्युपगमस्तत: कथंता स्रूत्वघटंते इति पूर्वापर विरूद्धार्थं भाषितेति यत्किंचिदेतत्येपि च विनयप्रतिपत्ति लक्षणास्तेपि मोक्षान्मुक्ति पथ परिभ्रष्टावेदितव्या: तथाहि विनयो नाम मुक्त्यंगंयोमुक्ति पथानुकूलोनशेष: मुक्तिपथश्च ज्ञान दर्शन चारित्राणिमोक्षमार्ग इति वचनात् ततो ज्ञानादीनां ज्ञानाद्याधाराणां च बहुश्रुतादि पुरुषाणांयो विनयोज्ञानादि वर्द्धमान प्रतिपत्ति लक्षण: स ज्ञानादि संपदृद्धि हेतु त्वेन परंपरयामुक्त्यंगमुपजायते यस्तुसुरनृपत्यादिषु नियमात्संसार हेतु: यत: सुरनृपत्यादिषु विनयोविधीयमान: सुरनृपत्यादि भाव विषयं बर्द्धमानमापादयति अन्यथा विनयकरणाप्रवृत्ते: सुरनरनृपत्यादिभावश्च भोगप्रधानस्तद्वर्द्धमाने भोगवर्द्धमानमेवकृतं परमार्थतो भवतीति दीर्घसंसारपथप्रवृत्ते: येपि च यतिविनयवादिनस्तेपि यदिसाक्षाद्विनयमेव केवलमुक्त्यंगमिच्छन्ति तर्हि तेप्यसमीचीनवादिनो वेदितव्या: ज्ञानादिरहितस्य केवलस्य विनयेस्य साक्षान्मुक्त्यंगत्वा भावात् न खलु ज्ञानदर्शनचारित्ररहिता: केतलपादपतनादिविनयमात्रेण मुक्तिमश्नुवते जन्तव: किन्तु ज्ञानादिसहितास्ततो ज्ञानादिकमेव साक्षान्मुक्त्यङ्गं न विनय: कथमेतदवसीयते इति चेदुच्यते इह मिथ्यात्वाज्ञानाविरतिप्रत्ययं कर्म्मजालं कर्मजालक्षयाच्च मोक्षामुक्ति: कर्म्मक्षयादिष्टेति वचनप्रामाण्यात् कर्म्मजालक्षयश्च न निर्म्मूलकारणोच्छेदमन्तरेण सर्वथा सम्भवति ततो मिथ्यात्वप्रतिपक्षं

सूत्र

ज्जा ससमणट्ठाविज्जंत्ति सूयगडेणंपरित्तावायणा संखिज्जाअणुओ गदारासंखिज्जावेढा संक्खिज्जासिलोगा संक्खिज्जा

भाषा

परसादीठीमिथ्याहष्टीनाशास्त्र नासेतेहनोमति वृ० एकठाछे तेभेदनिराकि० करीरनेस० जिनवचन सिद्धांत जिनमतने विषे द्रा० थापे प० अनेकप्रकारे दृष्टांतछे सु० सुयगडांग सुत्रेपरि० संख्याती वाचनार्थ प्रदानरुप शिष्यनेभणी सं० संख्याता अ० अनुयोगभेदछे सं० संख्याता सि० स्लोकतेगाथादिकनीर

सम्यग्दर्शनप्रतिपत्तं च ज्ञानं असंयमप्रतिपत्तं चारित्रं सम्यक्सेव्यमानं यदा प्रकर्षप्राप्तं भवति तदा सर्वथाकारणापगमतो निर्मूलकर्मोच्छेदो भवतीति ज्ञानादिकं साक्षात् मुक्त्यङ्गं न विनयमात्रं केवलं विनयो ज्ञानादिषु विधीयमानः परंपरया मुक्त्यङ्गं साक्षाज्ज्ञानादिहेतुरिति सर्वकल्याणभाजनं तत्र प्रदेशेगीयते यदि पुनर्यति विनयवादिनोपि ज्ञानादिप्रवृत्तिहेतुतया मुक्त्यङ्गं विनयमिच्छन्ति तदा तेप्यसत्ययवर्त्तिन एवेति न कदाचिद्विप्रतिपत्तिरितिकृतं प्रसंगेन प्रकृतिमनुसंधीयते सूयगडस्स णं परित्ता वायणा इत्यादि सर्वं प्राग्वत् उद्देशानां च परिमाणं कृत्वा उद्देशसमुद्देशकालं संख्याभावनीया

मूल

सौ निज्जुत्तीओ संखिज्जाओ पडिवत्तीओ सेणं अंगट्टयाए विईए अंगेदो सूयक्खंधा तेवीसं अज्झयणा तित्तीसं उद्देसणकाला तित्तीसं समुद्देसणकाला छत्तीसं पयसहस्साणि पयग्गेणं संखिज्जा अक्खरा अणंता गमा अणंता पज्जवा परित्ता तसा अणंता थावरा सासयकडनिबद्धनिकाइया जिणपण्णत्ता भावा आघविज्जंति पण्णविज्जंति परूविज्जंति दंसिज्जंति निदंसिज्जंति

भाषा

चनाविशेष सं०संख्याती नि०निर्युक्तिते पदभंजनादिक ते सूत्रविषे अर्थनो जोडीवोते युक्तिविशेषपणे प्रकारे सं०संख्याता प०प्रतिपत्ती एक१ वि२ ज्ञारागमे गिणताते एकवे तिणजावदसविषए पडिवती से० तेह अं० अंगार्थे पणेते वि० वीजोतेवीजा अंगने विषेदो०वे श्रुतस्कंधकह्या१ ते०तेवीस अ० अध्ययनछे समुद्दप ते० तेत्तीस३३ उद्देसककालते प्रश्नरूप अवसरेकालेछे ते०तेत्ती३३ समुद्देसनकाल जेपूछिवतेहनो उत्तरदेवोते समुद्देसो तेविशेषे छ० ३६००० छत्रीससहस्रपदछे जेसूत्रार्थनीसमाप्ति जिहां प०एतलोपदानोपरिणामसं०संख्याता अ० अक्षरमीलोपछेअं०अनंतागं०गमायरिछेदछे अनंत०पर्यवअक्षरपदार्थमा पर्यायनाभेद प०जिहांपरित्तात्रस एतले अनंतानकह्याथा०थावरते वनस्पति सचितजाणवासा०सासतातेधर्मास्तिकायादिक तथाद्रव्यार्थकरी अविछेदपणे

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



सेत्तं सूयगडे तदेतत् सूत्रकृतं सेकिंतमित्यादि अथ किं तत्स्थानं तिष्ठन्तिप्रतिपाद्यतया जीवादयः पदार्था अस्मिन्निति स्थानं तथाचाह सूरिः
ठाणेण मित्यादि स्थानेन स्थानेवाणमिति वाक्यालंकारे जीवाः स्थाप्यंते यथावस्थितस्वरूपप्ररूपणाया व्यवस्थाप्यंते प्रायोनिगद सिद्धं
नवरंटंकच्छिन्नं तटंटंकं कूटानि पर्वतस्योपरि सिद्धायतनकूटादीनि नवकूटानि शैलहिमवदादयः शिखरिणः शिखरणसमन्विताः ते च वैताढ्या

सूत्र

उवदंसिज्जंति सेएवंआयाएवंनाया एवंविन्नायाएवंचरणकरण परूवणाआघविज्जइसेतंसुयगडे२ सेकिंतंठाणेठाणेणंजीवाठा
विज्जंति अजीवाठाविज्जंति जीवाजीवाठाविज्जंति ससमएठाविज्जइ परसमएठाविज्जइ ससमयपरसमयठाविज्जइ लोएठावि
ज्जइ अलोएठाविज्जइलोयालोएठाविज्जइठाणेणंटका कुडासेलासिहरिणोपब्भाराकुंडाइ गुहाओआगरादहानईओ आघ

भाषा

साखाताछे वली केलवाछे क० पर्याय अर्थपणे जि० जिनते श्रीवीतराग रुपजे जेभावते पदार्थने आ० सामान्य अर्थनोकहवो प० नाम उपमादिकेकरी
प० नामउपमादिके करीने नि० हेतुदृष्टांते करीशिष्यने उ० उपमाते नैगमादिकनयकरीने कह्या से० तेशिष्यए० दूम सुगडंगछे तेभणीने ए०दूम ना०ज्ञान
करीने१ ए० दूमसूगडांगभण्यायी१ ए० दूमचरण सतरीसहित क० करण ७० सतरीकरी सहित प० परूपणा अ०सामान्यपणे कहिवो कह्युछे जा०
यावत से० ते एह वु० सुगडांग सुत्रते बीजो अंग कह्यो २ से० ते एह किं० कुणतं०तेठा० ठाणांग सुत्रना भेद कुण: जी०जीवादिक पदार्थछे अ० अजी
वादिक पदार्थ जिहां ठा० स्थापीइं जी० जीव अ० अजीव विछइ जिहां ठा० स्थापीइं लो० लोकना भावथापीइ ते लोकछतोछे अ० अलोकतुथा
पवो ते अलोक भाव ठा० थापीइ लो० लोकना भावथापीइं ते लोकछतोछे एभाव थापीने स०स्वसमय जिनमतिने स्थापीये प०पर समय ते अन्यमतीने

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



दय:तथायत् कूटमुपरिकुब्जाग्रयत् कुब्जं तत्प्राग्भारं यद्वा यत्पूर्वं तस्योपरिहस्तिकुम्भाकृतिकुब्जं विनिर्गतं तत्प्राग्भारं कुण्डानिगङ्गा कुण्डादीनिगुहास्ति मिस्रगुहादय: आकरारूप्यसुवर्णाद्युत्पत्तिस्थानानि ह्रदा: पौण्टरीकादय: नद्यो गङ्गासिंध्वादय: आख्यायंते तथाख्यानेन अथवा स्थानेणमिति वाक्या लंकारे एकाद्येकोत्तरिकया दशस्थानकं यावत् विवर्द्धितानां भावानां प्ररूपणा आख्यायतेकिमुक्तं भवति एकसंख्यायां द्विसंख्यायां यावद्दशसंख्यायां ये ये भावा यथायथान्तर्भवन्ति तथा२ ते ते प्ररूप्यंते इत्यर्थ: यथाएगे आयाइत्यादि तथाजंदूत्थंचणं लोके तंसव्वंदुपडोयारं तंजहा जीवाचेव अजीवा

सूत्र

विज्जंतिट्ठाणेणं एगाइयाए एगुत्तरियाए वुड्ढीए दसट्ठाणगाविवड्ढियाणं भावाणंपरूवणा आघविज्जइट्ठाणेणं परित्तावाय णासंखिज्जाअणुओगदारा संखिज्जावेढा संखिज्जासिलोगा संखिज्जाओ निजुत्तीओ संखिज्जासंगहणीओ संखिज्जाओ

भाषा

यापीने स्वसमय स्थापीने स० स्वसमय जिनमति प० पर समय अन्यमतीने उथापीने ट्ठा० ठाणांगमध्ये टं० टंकिसुख कु० कुटकह्याछे सि० सिखरसहित कह्या प० ते घोडापर्वत कह्याछे कु० गंगादिक गु० तिमिस्रादिक गुफाक आ०रुपासोनादिकना आगरद० पद्मादिक द्रह आ० सामान्यथी संखेप कहीछे जा० यावत शब्द थकी ए० एक आदिछे ते प्रथम एहवा तिण यावत शब्दे६ लगे ए० एकथी मांडीने पि० दूम करीवधारे भा० भाव जेतलादिकनी प० परुपणाकरीछे आ० सामान्यपणे करी सहितछे जा० यावत ट्ठा० ठाणांगने विषे प० परित्ताते संख्यातीवा० वाचणा ते सुत्रार्थ प्रदानरुप तेआचार्यशिष्य नेभणी सं० संख्या अ० अनुयोग ४छे ते माटे संख्याता ते छंदविशेषछे सं० संख्याता गाथानी रचनाविशेष: सं० संख्याती सं० संग्रहणी ते संग्रहार्थपणे हेतुपणे संगना अर्थनीगाथा सं० संख्याती निर्युक्तिपणे प्रकारे अवतारवो सं० संख्याती प० पत्तिते जे एकवे जावद सलगे से० तेम० संगार्थ आश्री त०

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



चेव इत्यादि ठाणसयंपरित्तावाइणा इत्यादि सर्वं प्राग्वत् परिभावनीयं पदपरिमाणंच पूर्व्वस्मात् अंगादुत्तरस्मिन्नुत्तरस्मिन्नंगे द्विगुणमवसेयं शेषंपाठसि
द्धं यावन्निगमनं सेकिंतमित्यादि अथ कोयं समवाय: सम्यग् आवयोनिश्चयो जीवादीनां पदार्थानां यस्मात् समवाय: तथाचाह सूरि: समवायेणमि

सूत्र

पडिवत्तोओ सेणंअंगठ्ठयाएतइए अंगेएगेसुयक्खंधे दस अज्झयणाएगवीसं उद्देसणकाला एक्कवीसंसमुद्देसणकाला
वात्तरिपयसहस्सापयग्गेणं संखिज्जा अक्खरा अणंतागमा अणंतापज्जवा परित्तातसा अणंताथावरा सासयकडनि
बद्धनिकाइया जिण पन्नत्ता भावा आघविज्जंति पन्नविज्जंति दंसिज्जंति निदंसिज्जंति उवदंसिज्जंति सेएवं आया
एवं नाया एवंविन्नाया एवंचरणकरणपरूवणा आघविज्जइ सेतंठाणे सेकिंतं समवाए समवाएणं जीवासमासिज्ज

भाषा

तीजाअंगनो ए० एक सु० श्रुत खंधवली तेहनादस अध्ययनछे ते दस अध्ययनना ए० २१ एकवीस उ० उद्देसणकालते प्रश्ननो पूछिवो ए० एकवीसज स०
समुद्देसनकाल तेहना पूछ्यानो उतरछे वा० बहुतर पदना स० सहस्रछे प० प्रमाण तेपदनो प्रमाण जे सुत्रार्थनी समाप्ति जिहांछे ते सुत्रनो पदनो ते
अर्थ जुदोपडेते पदनो परिमाण कह्योछे ते७२ सहस्र एतलोपदानो प्रमाण संखेपजाणवो सं० संख्याता अक्षरते अक्षरछे अ० अनंतागम अर्थविशेषफिर
ताअर्थ परिछेदरूपछे अ० अनंतपर्याय अक्षर प० त्रसजीव संख्याता तथा असंख्याताछे अ० अनंता था० थावर ते वनस्पति सहित सा० ते एभाव केहवाछे
ते धर्मास्तिकाय सासताछे तथा द्रव्यार्थपणेकरी अविछेदनयपणे असासताछे वलीकेहवाछे क० पर्यायार्थपणे समय नि० तेसुत्रथकी गुंथ्यातेनिर्युक्तिसंग्रह
णी उदाहरणे करीने नि० ते भूमिकाचित निवड्या जि० जिनते श्रीवीतरागे परूप्याछे भा एहवा भाव पदार्थ अनेरापिण प० फलदेखाडवे करीने

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



त्यादि समवायेण यद्वा समवायेणमिति वाक्यालंकारे जीवा: समाश्रीयंते समिति सम्यग्यथावस्थिततया श्रीयंते बुद्धास्वीक्रियंते अथवा जीवा: सम स्यंते कुप्ररूपणाभ्य: सम्यक्सम्यग्प्ररूपणायां प्रक्षिप्यन्ते शेषमानिगमनं भिगदसिद्धं नवरमेकादिकानामेकोत्तराणां शतस्थानकयावत् विवर्द्धितानां भावानां प्ररूपणा आख्यायते अयमत्रभावार्थ: एकसंख्यायां द्विसंख्यायां यावत् शतसंख्यायां ये ये भावायथा २ यत्र यत्रांतर्भवन्ति ते२ तत्र२ तथा२

सूत्र

ति अजीवा समासिज्जंति जीवाजीवसमासिज्जंति ससमएसमासिज्जंति परसमएसमासिज्जंति ससमयपरसमयस मासिज्जंति लोएसमासिज्जइ अलोए समासिज्जइ लोयालोए समासिज्जइ समवाएणं एगाइयाणं एगुत्तरियाणं

भाषा

जाणवो प० नामस्वरूपने कहिवे करी प्ररूपो दं० यथाभेदने देखाडवे करी देखाड्यो नि० हेतुदृष्टांते करीने शिष्यने देखाडे उ० निश्चलपणेयापेउपदेसे करी १ ए०इम जाण्यांग एहवोछे ए०इमना० ते ग्यांन करीने ए०इम वि०ते भण्या थकी ए०इम चरण सत्तरी ७० क० करण सत्तरी प्रमुख कह्याछे प०सामान्य पणे प्ररूपणे अर्थ कह्या अ०सामान्यपणे अर्थ कह्याछे से०ते त०ए ठा०ठाणांग सूत्र मध्ये भाव कह्या ३ से० ते किं०कुण स० समवायांग ते भगवंत उत्तर कहेछे गोतम स०जीवनो जेहने विषे जी०ते समयंगे करी जीवने जाणे तेजीव अ०अजीव पदार्थ तेधर्मास्तिकायादिक ते समवायंगे करी अजीवनो जी०जीव अने स०निर्णय कीधोछे लो०पंचास्तिकायमयलोकछे अ०पंचास्तिकाय रहित अलोकनो समवायांगने विषे लो०लोक अने अलो कएवेहुंनो समवायंगने विषे स०समयपोतानासिद्धांत तेजिनमत भासाका निर्णय कह्युछे प०पर समय तेपरमत ते शास्त्रभारतादिक ते शास्त्रना निर्णय कह्याछे स० सिद्धांतनो अने प० भारथादिकनो निर्णय कह्यु: स० सकल ए बोलनी आदिछे एहवा एकार्थनी केतला एक: ए० इम वे तिणच्यार यावत्

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



द्वाणसयविवड्डियाणं भावाणंपरूवणा आघविज्जइ दुवालसविहस्स यगणिपिडगस्स पल्लवग्गो समासिज्जइ समवायस्स णं परित्ता वायणा संखिज्जा अणुओगदारा संखिज्जावेढा संखिज्जासिलोगा संखिज्जाओ निजुत्तीओ संखिज्जाओ पडिवत्तीओ सेणं अंगट्ठयाए चउत्थे अंगेएगेसु अखंधे एगे अज्झयणे एगे उद्देसणकाले एगे समुद्देसण काले एगेचउ यालप्रयसयसहस्से पयग्गेणं संखिज्जा अक्खरा अणंतागमा अणंतापज्जवा परित्तातसा अणंताथावरा सासयकडनि बद्ध निकाइया जिणपण्णत्ताभावा आघविज्जंति पण्णविज्जंति परूविज्जंति दंसिज्जंति निदंसिज्जंति उवदंसिज्जंति सेएवं आया एवंनाया एवंविन्नाया एवंचरणकरणपरूवणा आघविज्जइ सेतंसमवाए ४ सेकिंतं विवाहे२णं जीवाविवा

भाषा

द्वा० एक सोद्वाणालगे वि० परिवृद्धिकरवी भा० पणा भावकह्या के प० श्री वीतराग देवे आ० सामान्य पणे करीने जा० यावत शब्द मे सं० संख्याता वि० छंद विशेष रूप सं० संख्याता सि० स्लोक ते अनुष्टप छंद विशेष सं० संख्याती नि० निर्युक्ति पदभंजनादिक अर्थ सं० संख्याती प० प्रतिपत्तीते एक संख्याती सं० संग्रह अर्थपणे से० ते अंग अर्थयाश्री: च० चउथो अंग ए० एकश्रुतखंध ए० एक उद्देसणकाल प्रश्नरूप ए० एकसमुद्देसण कालके पडुतररूप ए०एकला ख अनेचो० ४४ सहस्रपदके प० तेपदानोपरिमाण सं० संख्याता अ० अक्षर अ० अनंतागमा अ० अनंतापर्यव अक्षरते प०परित्ता अनंतानकी तेत्रसवें द्रीयादिक अ० अनंता था०थावर ते वनस्पती विशेष: सा०द्रव्यार्थपणे करीने नि०सूत्रार्थगुणे गुथ्या बांध्याछे नि० निकाचित तेहेतु दृष्टांते करीने जि० जिनते श्रीवीतरागे आ०सामान्यप्रकारे प०फलने देखाडवेकरीने प०नाम रूपने कहिवे करी परूप्याछे द०पणा भेदने नि०हेतु दृष्टांतने कहिवेकरी

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



प्ररूप्यन्ते यथाएगे आयादृत्यादि सेकिंतमित्यादि अथ केयं व्याख्याव्याख्यायन्ते जीवादयः पदार्था अनयेति व्याख्या उपसर्गादात्त इत्यङ्प्रत्ययः तथा

सूत्र

हिज्जंति अजीवावियाहिज्जंति जीवाअजीवावियाहिज्जंति ससमए वियाहिज्जंति परसमए वियाहिज्जंति ससमय परसमए वियाहिज्जंति लोएवियाहिज्जंति अलोएवियाहिज्जंति लोयालोएवियाहिज्जइ विवाहस्सणं परित्तावायणा संखिज्जा अणुओगदारा संखिज्जावेढा संखिज्जासिलोगा संखिज्जाओ निज्जुत्तीओ संखिज्जाओसंगहणीओ संखिज्जाओपडिवत्तीओ सेणं अंगट्ठयाए पंचमे अंगे एगे सुयक्खंधे एगेसाइरेगे अज्झयण सए दसउद्देसण कालाएगसह

भाषा

